एकादशभिरेभिर्व्वा षड्भि र्व्वापि समन्वितम्।
जह्याच्छोषार्दितं जन्तुमिच्छन् सुविमलं यशः॥
कासातिसारपार्श्वार्त्ति स्वरभेदारुचिज्वरैः।
त्रिभिर्व्वा पीडितं लिङ्गैः कासश्वासासृगामयैः॥
सर्व्वैरर्द्धैस्त्रिभिर्वापि लिङ्गैर्मांसबलक्षये।
युक्तोवर्ज्ज्यं चिकित्स्यस्तु सर्व्वरूपोप्यतोन्यथा॥७॥
महाशनं क्षीयमानमतीसारनिपीडितम्।
शूनमुष्कोदरञ्चैव यक्ष्मिणं परिवर्ज्जयेत्॥
रागानुबन्धरहितं वेगवन्तं क्रियासहम्।

एकादशवचनेनैव बोधयति संपूर्णे यक्ष्मणि एकादशैव रूपाणि भवन्तीति॥५॥

जह्यादिति। बलमांसक्षये सतीति शेषः तथाच चरकः।
वातव्याधिरपस्मारी कुष्ठीअर्शो चिरज्वरी।
गुल्मी च मधुमेही च राजयक्ष्मी च यो नरः॥
चिकित्स्या भवन्त्ये ते बलमांस परिक्षयात्।
स्वल्पेष्वपि विकारेषु भिषगेतान् विवर्ज्जयेत्॥६॥

सर्व्वैरर्द्धैरित्यादि। ननु सर्व्वरूपाण्येकादश एकादशानामर्द्धसार्द्धपञ्च भवन्ति तत् कथमत्रार्द्धत्वं किं भूतं वा भवति उच्यते एकस्य रूपस्यार्द्धत्वाभावे पटपञ्च रूपयोरर्द्धयोरत्र दृष्टत्वात्। षड्रूपैः एवार्द्धैरशद्धैः लिङ्गैर्युक्त इति सम्बन्धः। अतोऽन्यथेति बलमांसक्षयाभावे सति॥७॥

महाशनं क्षीयमाणमित्यक्रमसाध्यलक्षणं विशिष्टरूप-

उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरम् ।
शुक्लाक्षमन्नद्वेष्टारमूर्ध्वश्वासनिपीडितम् ॥
कृच्छ्रेण बहुमेहन्तं यक्ष्मा हन्तीह मानवम् ॥८॥
व्यवायशोकवार्द्धक्यव्यायामाध्वप्रशोषितान् ।
व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणैः शृणु ॥

त्वात् । अतीसारनिपीडितमिति द्वितीयम् । यक्ष्मिणो मन्नायत्तं[1] जीवितत्वस्योक्तत्वात् शूनमुष्कोदरमिति तृतीयं मुष्कशोथस्य विरेकसाध्यत्वेन विरुद्धोपक्रमत्वात् । उपक्रमेत् चिकित्सेत् अकृशमित्यनेन वयःस्थोऽपि प्रत्याख्यायोप-क्रम्यत इति सूच्यते । यदुक्तमन्यत्र ।

परं दिनसहस्रन्तु[2] यदि जीवति मानवः ।
सुभिषग्भिरुपक्रान्तस्तरुणः शोषपीडित इति ॥
शुक्लाक्षत्वादयः एकैकशोऽसाध्यलक्षणानि ॥८॥

व्यवायादिजनितधातुशोषमात्रे राजयक्ष्मत्वं निरस्यन्नाह ।

व्यवायेत्यादि । यदुक्तं सुश्रुते केषाञ्चिदेव शोषो हि

---

(१) मन्नायत्तं जीवितस्येति । मन्नायत्तं मन्नाधीनं यज्जीवितं जीवनं तस्योक्तत्वादित्यर्थः । अकृशमित्यादि । अकृशः कार्श्यरहितः एतेन वयःस्थएवमुच्यते । वयःस्थोऽपीत्यत्र अपिशब्दस्य कैमुतिकार्थत्वात् किमुत-बालकश्च इत्यर्थः । प्रत्याख्यायोपक्रमः प्रत्याख्याय रोगिणं साध्यत्वे उपक्रम-श्चिकित्सा । न चासाध्यस्य क्रियाविधानं निरर्थकमिति वाच्यं यत्नाप-नाय नतु निवर्त्तये यापनार्थं क्रियाविधिरिति वचनात् । अतएवोक्तं प्रन्ति प्राणानसाध्यास्तु नराणामक्रिया वतामिति ॥

(२) एतदुपपदेनाह यदुक्तमन्यत्र परं दिनसहस्रमित्यादि ।

व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः ।
पाण्डुदेहो यथापूर्वं क्षीयन्ते चास्य धातवः ॥९॥
प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः ॥१०॥
जराशोषी कृशो मन्दः स्वल्पबुद्धिबलेन्द्रियः ।
कम्पनोऽरुचिमान् भिन्नकांस्यपात्रहतः स्वरः ॥११॥

क्षयैर्भेदमागतः न तु विशेषलिङ्गानां समस्तानां निपातनम् ॥ (७)क्षया एव हि ते ज्ञेया केवलं धातुभक्षिता इति वृद्धस्य भावो वार्द्धक्यमिति स्वार्थिकः ष्यञिति कार्त्तिकः । शुक्रस्य क्षयलिङ्गैरिति सुश्रुतोक्तैः । तद्यथा शुक्रक्षये मेढ्रवृषणवेदना । अशक्तिर्मैथुने, चिराद्वा प्रसेकः प्रसेके चाल्पदर्शनं शुक्रस्य रक्तस्य चेति ॥९॥

प्रध्यानेत्यादिना शोक शोष्यपि तादृश इति शुक्रस्य क्षयलक्षणव्यतिरिक्त शुक्रशोषलिङ्गेन युक्तः यदुक्तं सुश्रुतेन विना शुक्रक्षयकृतै(८)र्विकारैरुपलक्ष्यते इति ॥१०॥

कम्पनः कम्पयुक्तः भिन्नस्य भग्नस्य कांस्यपात्रस्य हतस्य दण्डादिनेव स्वरो यस्य स तथा ॥११॥

वयसः सहस्रायुषं यदा मनुष्यः भवति तदा परमित्यर- भावे दिनसहस्रं यावत् यदीति सम्भावनायां जीवति नतु ततःपर- मिति । केचित्त्विति पुरुषाणाम् ॥

(७) क्षया इति । ते रोगाः पञ्चधातुसंश्रिताः क्षया एव ज्ञेया धातुक्षयसंज्ञका इत्यर्थः ॥

(८) विना शुक्रेत्यादि । शोकशोषी शुक्रक्षयकृतैर्विकारैर्विन- उपलक्ष्यते पाण्डुदेहाद्युपसर्गश्च भवतीत्यर्थः ॥

ष्ठीवति श्लेष्मणा हीनं गौरवारतिपीडितः।
संप्रस्रुतास्यनासाक्षः शुष्करूक्षमलच्छविः॥१२॥
अध्वशोषी च स्रस्ताङ्गः संभृष्टपरुषच्छविः।
प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः॥१॥
व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः।
लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विना॥१३॥

ष्ठीवति श्लेष्मणा हीनमिति श्लेष्महरणाय यत्नकृतेऽपि न श्लेष्मनिःसरणम्। शुष्करूक्षमलच्छविरिति शुष्करूक्षे यथाक्रमं मलच्छवी यस्य तथा॥१२॥

संभृष्टस्येव भर्जितस्येव परुषः छविर्वर्णो यस्य स तथा प्रसुप्तः स्पर्शानभिज्ञः क्लोम पिपासास्थानं क्लोमस्थाने तालु इति पाठान्तरम्। एभिरिति स्रस्ताङ्गत्वादिभिरध्वशोषलक्षणैः अध्वनो व्यायाममात्रसामान्यात् भूयिष्ठमत्यर्थम् अध्वशोषेऽल्पानि लक्षणानि व्यायामजे तु महान्तीत्यर्थः। तथा स चोरःक्षतैर्लिङ्गैः[९] सह युक्तः क्षतं विनेति सुगमपाठः गदाधरस्तु लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षतं विनेति पठति व्याचष्टे च उरःक्षतेन व्यायामभाराध्ययनप्लुतयानादिहेतुना यः कृतः शोषः सोऽप्येभिरेवाध्वशोषलिङ्गैर्भूयिष्ठं संयुक्तः क्षतं विना क्षतकार्यं विनाक्षतज

---

(९) स चोरःक्षतैर्लिङ्गैरित्यादि। स एव व्यायामशोषी उरःक्षतैर्लिङ्गैरिति लिङ्गलिङ्गिनोरभेदोपचारात् उरःक्षतं शोषलिङ्गैरित्यर्थः। उरःक्षतेनेति। उरःक्षतं येन स उरःक्षतस्तेन॥

रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् ।
व्रणितस्य भवेच्छोषः स चासाध्यतमो मतः ॥१४॥

कार्य्यन्तु सुश्रुते यथा तस्योरसि क्षते रक्तं पूयः श्लेष्मा च गच्छति इत्यारभ्य भिन्नवर्णस्वरो नर इत्यन्तमेतान्येव लक्षणानि अतोऽधिकानि उरःक्षतकारण व्यायामभारादिकृत शोषस्य लक्षणमेव भूयिष्ठं यत्तदेवोरःक्षतकारणमात्रत्वादुक्तमपीत्यर्थः । अथवा क्षतं विना व्रणं विना उरः क्षतनिमित्तभाराध्ययनादि नातिमात्रेण यः कृतः शोषः सोऽप्येभिरेवात्यर्थाध्वशोषलिङ्गैः समन्वित इति प्रकृतेन सम्बन्धः । व्रणस्य तु वक्ष्यमाणमेव लक्षणमिति ॥१३॥

कारणान्तरेण शोषलक्षणमाह ।

रक्तक्षयादित्यादि । वेदना व्रणवेदना आभिरपि भयशोकक्रमणः क्षोभात् वातप्रकोपादेव शोषः स चासाध्यतम इति स्वार्थिकस्तमः यथा युधिष्ठिरः श्रेष्ठतमः कुरूणामिति । अनेनैवातिशायिकप्रत्ययेन प्राशस्त्यप्रतिपादितत्वात् अथवा याप्यापेक्षयाऽसाध्यतमत्वेन प्रत्याख्येयत्वमुच्यते याप्यस्यासाध्यत्वात् नन्वेवं क्षतानां व्रणशोषिणां बृंहणीयो विधिः कार्य्य इति सुश्रुतेनैवोक्तं चिकित्सितं विरुध्यते उच्यते प्रबलशोषे प्रत्याख्येयत्वं नातिप्रबले चिकित्साविधानमिति समर्थनीयं चन्द्रिकाकारस्तु स चासाध्यतमः स्मृतः इत्यस्य स्थाने याप्यासाध्यतमस्तु सः इति । पठति चिकित्सायां बृंहण विधेरभिधानात् ॥१४॥

धनुषा यास्यतोऽत्यर्थं भारमुद्वहतो गुरुम्।
युध्यमानस्य बलिभिः पततो विषमोच्चतः॥
वृषं हयं वा धावन्तं दम्यं वान्यं निगृह्णतः।
शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः परान्॥
अधीयानस्य वात्युच्चै दूरं वा व्रजतो द्रुतम्।
महानदीर्वा तरतो हयैर्वा सह धावतः॥
सहसोत्पततो दूरं तूर्णं वापि प्रनृत्यतः।
तथान्यैः कर्मभिः क्रूरैर्भृशमभ्याहतस्य वा॥
विक्षते वक्षसि व्याधिर्बलवान् समुदीर्यते।
स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः॥

शोषनिदाने नैव साहसादिना क्षतः क्षतस्य सम्भवात्
क्षतः क्षतेनापि शोषसम्भवात् शोषाधिकारे
स निदानमुरःक्षतस्य।

धनुषेत्यादि। आयास्य इति आयासं कुर्वतो नरस्य आयास्यत इति पाठान्तरे विदीर्यमाणहृदयस्य। दम्यं दमनार्हं वृषादिकमेव बलवन्तमित्यर्थः अन्यं वा गजोष्ट्रादिकं निगृह्णतः विधारतः शिला कुर्पाशिला अश्म तदितरः प्रस्तरखण्डः निर्घातोऽस्त्रविशेषः किम्वा निर्घातः शिलादीनां प्रेरणविशेषः अतिबलसम्पादितः निघ्नतः परान् ताड़यतः शत्रून्। अधीयानस्य पठतः महानदी तरत इति बाहुभ्यामिति शेषः तूर्णं शीघ्रं तथान्यैः

अव्यक्तं लक्षणं तस्य पूर्व्वरूपमिति स्मृतम् ॥१६॥
उरोरुक्शोणितच्छर्द्दिः कासो वैशेषिकः क्षते ।
क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटीग्रहाः ॥
अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नरः ।
परिसंवत्सरो याप्यः सर्व्वलिङ्गन्तु वर्ज्जयेत् ॥१८॥

इति राजयक्ष्मक्षतक्षीणनिदानम् ।

विवद्ध इति जेज्जड़ः स पुरुष क्षत इति उरः क्षतवान् क्षीयते धातुशोषमाप्नोति न केवलं क्षतादेव क्षीयते किन्तर्हि स्त्रीसेवादिनाप्युक्तौ अतोः क्षयादपीत्याह तथेत्यादि ॥१५॥

पूर्व्वरूपमाह ।

अव्यक्तेत्यादि ॥१६॥

क्षतक्षीणयोरसाधारणलक्षणमाह ।

उरोरुगित्यादि । वैशेषिको विशिष्टः कासः स च विशेष उक्त दुष्टश्यावादिकफसंयुक्तत्वं किम्वा वैशेषिक उद्भूतक्षत इति छेदः । क्षीण इति क्षयेऽसाध्यलक्षणमाह अल्पेत्यादि ॥१७॥

इति व्याख्यामधुकोषे राजयक्ष्मक्षतक्षीणनिदानम् ।

इति व्याख्या मधुकोषपञ्जिकायां राजयक्ष्मक्षतक्षीणनिदानम् ।

अथ कासनिदानम् ।

धूमोपघाताद्रजस स्तथैव व्यायामरूक्षान्न निषेवनाच्च । विमार्गगत्वाच्च हि भोजनस्य वेगावरोधात् क्षवथो स्तथैव ॥ प्राणोह्युदानानुगतः प्रदुष्टः संभिन्नकांस्य स्वन तुल्य घोषः । निरेतिवक्त्रात् सहसा स दोषो मनीषिभि कास इति प्रदिष्टः ॥१॥

---

* क्षयरूपे कासपाठात् कासापेक्षया च क्षयोत्पत्ते स्तदनन्तरं कासनिदानमाह ।

धूमोपघातादित्यादि । धूमेन मुखनासाप्रविष्टेनोपघातो धूमोपघातः रजस इति यातेनोर्द्धं नीतादाम्बरस्मात् रजस इति पाठान्तरे मुखनासाप्रविष्टधूलेरित्यर्थः विमार्गगत्वञ्च भोजनस्याद्रुताहारादिना च शब्दः समुच्चये हि पादपूरणे वेगावरोधादिति पुरीषादे र्वेगैन च्छि वायुरुद्गमस्यात् क्षवथो स्तथैवेति वेगावरोधादिति प्रकृतेन सम्बन्धः प्राणोवायुरुदानेन दुष्टेनानुगतो वक्त्रान्निरेति संभिन्नकांस्यपात्रवत् हतस्वनः कास इति प्रदिष्टः सदोषः सकफपित्तः वातिकपैत्तिकादिभेदात् भिन्न एतेनैव समानस्थाननिदानाभ्यां हिक्काश्वासाभ्यामस्य भेदः नहि तत्र वातिकपैत्तिकादिभेदेन व्यपदेश इति गदाधरः कसति शिरः-

---

कासनिदानं सुगमत्वादुपेक्षितम् ।

पञ्चकासाः स्मृतावातपित्तश्लेष्मक्षतक्षयैः।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्॥२॥
पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता।
कण्ठे कण्डूश्च भोज्यानामवबोधश्च जायते॥३॥

हृच्छङ्खमूर्द्धोदरपार्श्वशूलीक्षामाननः क्षीणबलस्वरौजाः। प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासतिशुष्कमेव॥४॥

कण्ठादूर्द्धं गच्छति वायुरिति कास कसगति शासनयोरित्यस्मात् कसनात् काश इति चरके पाठ कासनं काश इति वा भिन्नस्वरः कासतिशुष्कमेवेति सुश्रुतदर्शनात्॥१॥

पञ्चकासा इति संख्येयनिर्द्देशादेव संख्यायां लब्धायां पञ्चग्रहणं जरा कासस्य दोषजेषु क्षयजेषु चान्तर्भूतस्याधिकत्व निरासार्थं पञ्चानामपि क्षयकारणत्व प्रतिपादनार्थमिति। क्षयाय धातुक्षयाय॥२॥

पूर्व्वरूपमाह। भोज्यानामवरोध इत्यरुचिरभ्यवहारा वा सामर्थ्यं वा॥३॥

वातिककासरूपमाह।

हृदित्यादि। शङ्खो ललाटैकदेशः क्षामाननः शुष्कमुखोवातेन शोषणात् प्रसक्तवेगः सतत कासवेग शुष्कमिति श्लेष्मादि ष्ठीवनरहितम्॥४॥

उरो विदाहज्वरवक्त्रशोषैरभ्यर्दितस्तिक्त-
मुखस्तृषार्त्तः। पित्तेन पीतानि वमेत् कटूनि
कासेत् स पाण्डुः परिदह्यमानः ॥५॥

प्रलिप्यमानेन मुखेन सीदन् शिरोरुजार्त्तः
कफपूर्णदेहः। अभक्तरुग्गौरवसादयुक्तः कासे-
द्भृशं सान्द्रकफः कफेन ॥६॥

अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः।
रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमाचरेत् ॥७॥
स पूर्व्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम्।
कण्ठेन रुजतात्यर्थं विरुग्णेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभि स्तुद्यमानेन शूलिना।
दुःखस्पर्शेन शूलेन भेदपीडाभितापिना ॥

पैत्तिकमाह।

उर इत्यादि। अभ्यर्द्दितः पीड़ितः ॥५॥

कफजमाह।

प्रलिप्यमानेनेत्यादि। प्रलिप्यमानेन श्लेष्मलिप्तेन मुखेनोपलक्षितः सीदन् अवसादयुक्तः अभक्तरुगरुचिः ॥६॥

क्षतजकासमाह।

अतिव्यवायेत्यादि। विग्रहो विधारणं युद्धस्योपात्तत्वाद्विग्रह इति पाठे स एवार्थः ॥७॥

ततः ष्ठीवेत् सशोणितमिति कासाभिघातेन हृदय-

पर्श्वभेदज्वर श्वासतृष्णावैस्वर्य्यपीडितः।
पारावत इवा कूजन् कासवेगात् चतोद्भवात्॥८॥
विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात्।
घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः॥
कुपिता चयजं कासं कुर्य्युर्देह चयप्रदम्॥९॥

विदारणात् कण्ठेनेति उपलक्षणे तृतीया एव सुरसेति विरुग्णेनेव भग्नेनेव सूचीभिरिव तुद्यमानेन शूलिना दुःखस्पर्शेन चोरसेति सम्बन्धः दुःखस्पर्शत्वं स्पर्शासहत्वं शूलेनोपलक्षितः तत्र पार्श्वादौ बोध्यं वाभटेनापि पठ्यते पार्श्वशूलोतिभेद पीडाभितापि नेति शूलविशेषणं पारावत इव कूजन् भवतीति शेषः॥८॥

चयजकासमाह।

विषमेत्यादि। घृणिनां शोचतां चाहाराभावात् कुपितेन वायुनाग्नेरुपघाताद्दोषत्रयप्रकोप इति चयजमिति शुक्रादि धातुचयजं ननु राजयक्ष्मजे त्रिदोषजेपि राजयक्ष्मणिकासः कफेनैव क्रियते यदुक्तं कासः कण्ठस्य चोर्ध्वंसोवज्ञेयः कफकोपत इति चयं कासस्तु त्रिदोषज इति। ननु कासादेव चयो जायते तत्कथं चयजकास इति उक्तं हि कासात् संजायते चय इति उच्यते दृष्टो हि परस्पर व्यक्तिभेदेन कार्य्यकारणभावो बहुशः यथातीसारार्शोमान्द्यादयः इति॥९॥

सगात्रशूलज्वरदाहमोहान् प्राणक्षयञ्चोपलभेतकासी। शुष्यन् विनिष्ठीवति दुर्ब्बलस्तु प्रक्षीणमांसोरुधिरं सपूयम्॥ तं सर्व्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति। इत्येष क्षयजः कासः क्षीणानां देहनाशनः॥ साध्योबलवतां वास्याद्याप्यस्त्वेवं क्षतोत्थितः। नवौ कदाचित् सिध्येतामपि पादगुणान्वितौ॥ स्थविराणां जराकासः सर्व्वोयाप्यः प्रकीर्त्तितः। त्रीन् पूर्व्वान् साधयेत्साध्यान् पथ्यैर्य्याप्यांस्तु यापयेत्॥१०॥

इति कासनिदानम्।

सगात्रशूलेत्यादि। श्लोकार्द्धस्य क्षयजकासमध्येपाठो न युक्तः सुश्रुते क्षतजकासे पठितत्वात् क्षयकासचात्र चरकसुश्रुतवाक्याभ्यां मेलयित्वामाधवेन लिखितः उच्यते सगात्र शूलेत्याद्यनन्तरं क्षयकासः सुश्रुतेन पठितः तेन सगात्रशूलेत्यादि श्लोकस्य परेण सम्बन्धात् क्षयकासत्वमिति माधवस्याभिप्रायः एतच्चान्येनाप्युमन्यन्ते यतः क्षतजकासस्यावस्थायामसाध्यत्वख्यापनपरमेतद्व्याख्यानं जेज्जडेन गयदासेनापि क्षतजकासरूपत्वेनेति। पादगुणान्वितावितिवैद्यादि चतुष्पादसम्पत्तौ। स्थविराणां वृद्धानां

स्थविराणामित्युक्तेऽपि जराशब्दोपादानं जरानिमित्त धातुक्षयज एव कासो याप्यः अपचारजनितदोषज साध्य इति बोधनार्थम् ॥१०॥

इति व्याख्यामधुकोषे कासनिदानम् ।

अथ हिक्काश्वासनिदानम् ।

विदाहि गुरुविष्टम्भि[1] रूक्षाभिष्यन्दिभोजनैः ।
शीत पानाशनस्थान रजोधूमातपानिलैः ॥

समाननिदानत्वात् कासानन्तरं हिक्काश्वासावन्वेतयो प्रायस्तुल्यनिदानचिकित्सितत्वेन एकाधिकारे कथमनभिधानम् उच्यते यदि कासश्वास हिक्कानां निदानं समानं तथापि कासस्य दोषभेदाद्भेदः यथा वातिकः पैत्तिकः श्लैष्मिक इत्यादि । हिक्काश्वासौ तु कफवातात्मकावेव यदाह दृढ़बलः कफवातात्मकावेतौ पित्तस्थानसमुद्भवाविति सुश्रुतोऽप्याह वायुः कफेनानुगतः पञ्चहिक्काः करोति हि भेदस्त्वनयोः सम्प्राप्तिभेदाद्वेगक्रियादिना नतु कासवद्दोषभेदेन । श्वासकासाभ्यां हिक्कायाः स्वरतोऽपि भेदः ।

---

(1) विदाह्यादि सूत्रम् । विदाहि कृशा पच्यांत्समलपदहित जनकं यत्तु तच्च आममूलक कषाय मधुरादि । अभिष्यन्दि तु दोषधातु मलस्रोतसां क्लेदजनकं पक्वतच्च आमकारमतस्य कदन फाणितादि ॥

व्यायामकर्म्मभाराध्ववेगाघातापतर्पणैः ।
हिक्काश्वासश्च कासश्च नृणां समुपजायते ॥१॥

मुहुर्मुहु र्वायु रुदेति सस्वनो यकृत्प्लीहान्त्राणि मुखादि वाक्षिपन्। सघोषवानाशु हिनस्त्यसून यतस्ततस्तु हिक्केत्यभिधीयते बुधैः ॥२॥

पित्तस्थानसमुद्भवाविति विशेषणं सुश्रुतमते क्षुद्रां न प्राप्नोति सा हि जत्रुमूलात् प्रधावितेति पठ्यते चरकमते तु व्यपेतां न प्राप्नोति सापि जत्रुमूलादसम्बद्धेति पठ्यते तस्मात् पित्तस्थानसमुद्भवाविति विशेषणं कतिपयो गच्छन्तीति न्यायेन बोध्यम्। शीतशब्दः पानादिभि स्त्रिभिः सम्बध्यते रजो धूलिः सा च धूमवज्ज्ञासादि प्रवेशात् कारणम्। व्यायामकर्म्मधनुराकर्षणादि व्यापारः वेगाघातोमलादि वेगविधारणम् अपतर्पणमनशनादि कासश्चोक्तोऽप्येकनिदानत्व प्रतिपादनार्थं पुनरभिहित इति ॥१॥

हिक्कानां स्वरूपं निरुक्तिञ्चाह ।

मुहुर्म्मुहुरित्यादि। वायुरत्र ह्युदानः प्राण इत्यन्ये उदेति ऊर्द्ध्वं गच्छति सस्वन इति हिगिति शब्दवान्नूर्द्ध्वगमनमेव विशिनष्टि। यकृदित्यादि अत्र प्लीहेति ह्रस्वे कारत्वं छन्दोऽनुरोधात् मुखादितिल्यब्लोपे पञ्चमी तेन यकृत् प्लीहान्त्राणिमुखमानीय क्षाक्षिपन्निव

अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा ।
वायुः कफेनानुगतः पञ्च हिक्काः करोति हि ॥३॥
कण्ठोरसोर्गुरुत्वञ्च वदनस्य कषायता ।
हिक्कानां पूर्व्वरूपाणि कुक्षेराटोप एव च ॥?॥
पानान्नैरतिसंभुक्तैः सहसा पीडितोनिलः ।
हिक्कयत्यूर्द्धगो भूत्वा तां विद्यादन्नजां भिषक् ॥१॥
चिरेण यमलैर्व्वेगैर्या हिक्का संप्रवर्त्तते ।
कम्पयन्ती शिरोग्रीवां यमलां तां विनिर्द्दिशेत् ॥२
विकृष्टकालैर्या वेगैर्मन्दैः समभिवर्त्तते ।
क्षुद्रिका नाम सा हिक्का जत्रुमूलात्प्रधाविता ॥१

हि:मारयन्निवेद्यशः स इति वायुर्हि नत्यसून इति हिक्केति निरुक्तिः पृषोदरादिना रूपसिद्धिः हि गिति कृत्वा कायति शब्दायति इति हिक्केति शाब्दिकाः ॥२॥

तासां भेदं संप्राप्तिश्चाह ।

अन्नजामित्यादि । यमलैव चरके व्यपेतेति नाम्ना पठ्यते अन्नपाने व्यपेति परिणते जायत इत्यतो हेतोः अस्याश्चानुक्तमपि यमलवेगत्वं श्रुतदर्शनाद्विज्ञेयम् । अन्नजायाः साध्यत्वेन प्राशस्त्यात् पूर्व्वमभिधानम् ॥३॥

वदनस्य कषायता वातात् नतु कफान्माधुर्य्यं व्याभि-प्रभावात् । हिक्कयति हिक्कां करोति । कम्पयन्ती शिरो-ग्रीवा मित्युपलक्षणं तेन चरकोक्त मत्तापमूर्च्छाभिभि-

नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी।
अनेकोपद्रववती गम्भीरानाम सा स्मृता ॥१॥
मर्म्माण्युत्पीडयन्तीव सततं या प्रवर्त्तते। महा-
हिक्केति सा ज्ञेया सर्व्वगात्रविकम्पिनी ॥१॥४॥

आयम्यते हिक्कतो यस्य देहो दृष्टिश्चोर्द्धं
नाम्यते यस्य नित्यम्। क्षीणोऽन्नद्विट्क्षौति
यश्चाति मात्रं तौ द्वौ चान्त्यौ वर्ज्जयेद्धिक्क-
मानौ ॥५॥

तृष्णावैचित्यजृम्भाविम्, ताश्चत्व मुखशोषावोध्या इति गय-दासः। विलष्टकालैश्चिरेण जत्रुकण्ठोरसोः सन्धिरिति जेज्जड़: जत्रु ग्रीवामूलग्रहणेन हृदयक्लोमकण्ठस्य ग्रहण-मिति गयदासः। नाभिप्रवृत्तेति नाभितः प्रभृति सञ्जाता अतएवास्यागम्भीरत्वम् अनेकोपद्रववती तृष्णाज्वरादियुक्ता मर्म्माणीति प्रधानानि वस्तिहृदयशिरांसि ॥४॥

अवस्थायामसाध्यत्वमाह।

आयम्यत इति आयम्यते विस्तार्य्यत इव दृष्टिश्चोर्द्धं भवतीति शेषः नाम्यते आकुञ्च्यते देह इति सम्बन्ध इति जेज्जड़ गयदासौ। ताम्यतीति पाठान्तरे मुह्यति हिक्की। क्षौति हिक्कति तौ द्वाविति आयम्यत इत्यादिना नित्य-मित्यन्ते नैकावस्थो हिक्की क्षीणेत्यादिनातिमात्रान्तेना-परः। साध्यानामपिमध्ये एवंविधौ वर्ज्जयेदित्यर्थः। ग-

अतिसन्धितदोषस्य भक्तच्छेदकृशस्य च ।
व्याधिभिः क्षीणदेहस्य वृद्धस्यातिव्यवायिनः ॥
आसां या सा समुत्पन्ना हिक्का हन्त्याशुजी-
वितम् ॥६॥
यमिका च प्रलापार्त्तिमोहतृष्णासमन्विता ।
अक्षीणश्चाप्यदीनश्च स्थिरधात्विन्द्रियश्च यः ॥
तस्य साधयितुं शक्या यमिका हन्त्यतोऽन्यथा ॥७॥

गम्भीरा महत्योः स्वभावादेवासाध्यत्वमिति तदुक्तौ हिक्का-मानावन्त्यौ शेषपठितावसाध्यौ पाठान्तराणि व्याख्याविशेषाश्च विस्तरभयान्न लिखिताः ॥५॥

आसां यासेति आसांसाध्य हिक्कानां मध्ये याति सञ्चितदोषादे र्भवति सा हन्तीति योज्यम् अथवा आसामिति पञ्चविधानामेव तेन महती प्रभृतीनां स्वरूपेण यदसाध्यत्वमुक्तं तत्प्रायिकं यदाह जतुकर्णः आद्याश्चतस्रो दुःसाध्या यमिका मोहतृष्णावतः सद्यः प्राणहृदिति ॥६॥

यमिकेत्यादि । [२]यमिका चेत्यनेन क्षुद्रा अन्नजा च साध्यत्वेनोक्ता सा यमकै र्वेगै र्हन्तीति योज्यम् । सैवा क्षीणादे र्व्यभिचरति इत्याह अक्षीण

---

(२) यमिकेत्यादि । क्षुद्रा अन्नजाता साध्यत्वेनोक्ता सा मोहतृष्णा समन्विता यमिकाय मकेन वेगेन जायमाना आशुजीवितं हन्तीत्यर्थः ॥

महोर्द्धच्छिन्नतमक क्षुद्रभेदैस्तु पञ्चधा।
भिद्यते स महाव्याधिः श्वास एकोविशेषतः ॥८॥
वाताधिको भवेत् क्षुद्र स्तमकस्तु कफोद्भवः।
कफ वाताधिकाश्चैव संसृष्टः छिन्नसंज्ञकः ॥
श्वासो मारुतसंसृष्टो महानूर्द्ध स्ततोमतः ॥१॥
प्राग्रूपं तस्य हृत्पीडा शूलमाध्मानमेव च।
आनाहो वक्त्रवैरस्यं शङ्खनिस्तोद एवच ॥१॥

इत्यादि। अक्षीणो बलवान् अदीनः प्रसन्नमनाः अन्ये तु अन्नलां यमलामित्यादि सुश्रुतग्रन्थपठितां यमलां यमिकाशब्देन व्याचक्षते तन्न यमिका च मलापार्त्तिरित्यादि श्लोक चरके पठितः तत्र यमला यमिकानाम्ना न पठितैव हिक्कं ति यमिका शब्देनैवार्थगत्या व्यपेतेति चेन्न तर्हि व्यपेता च मलापार्त्तिरित्येवमभिदध्यात् ॥७॥

श्वासनाह।

महोर्द्धेत्यादि। एको विशेषत इति श्वासत्वेन एक एव सन् विशेषहेतु लिङ्गभेदं प्राप्य पञ्चधा भिद्यते पञ्चसु श्वासत्वं वेगवदूर्द्धवाततं यदुक्तमन्यैः श्वासस्तु वस्तिकाध्मान यत्र वातोर्द्धगामितेति संख्येव निर्द्देशादेव पञ्चप्रकारत्वे सिद्धे पञ्चवचनं तमकभेदस्य प्रतमकस्य पृथक् संख्या निरासार्थम् ॥८॥

यदा स्रोतांसि संरुध्य मारुतः कफपूर्वकः।
विष्वग्‌व्रजति संरुद्धस्तदा श्वासान् करोति सः॥
उद्धूयमानवातोयः शब्दवद्दुःखितो नरः।
उच्चैःश्वसिति संरुद्धो मत्तर्षभ इवानिशम्॥९॥
प्रनष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः।
विवृताक्षाननो बद्धमूत्रवर्चा विशीर्णवाक्॥
दीनः प्रश्वसितञ्चास्य दूराद्विज्ञायते भृशम्।
महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते॥१०॥

यदेत्यादि संप्राप्तिः। स्रोतांसीति हिक्कानिर्दिष्टप्राणोदकान्नवहानि कफः पूर्व्वं प्रधानं यस्य स तथा तेनैव कफेन रुद्धः निरुद्धस्वमार्गगति विमार्गगत्वेन विष्वग् व्रजति विश्वमुच्चतीति विश्वकसर्व्वत इत्यर्थः। उद्धूयमानवात इति ऊर्द्धं धूयमानोनीयमानो वातो यस्य स तथा शब्दवत् सशब्दं यथा भवति उच्चैर्दीर्घं संरुद्धो मत्तर्षभ इवेति स्वरविशेषज्ञापनार्थमयं दृष्टान्तः॥९॥

ज्ञानं शास्त्रं विज्ञानं तदर्थनिश्चयः विभ्रान्तलोचनश्चञ्चलनेत्रः विवृते स्तब्धेऽक्ष्यानने यस्य स तथा नेत्रस्य विभ्रान्तस्तब्धत्वे कालभेदादिति जेज्जटः। विशीर्णवाक् वक्रवचनः मन्दवचनो वा। दीनः क्लान्तमनाः क्षीणमिति पाठान्तरमयुक्तम्। दूरादिव ज्ञायते भृशमित्यनुपपत्तेरित्याह॥१०॥

ऊर्द्ध्वं श्वसिति यो दीर्घं नच प्रत्याहरत्यधः।
श्लेष्मावृतमुखस्रोतः क्रुद्धगन्धवहार्दितः॥
ऊर्द्ध्वं दृष्टिर्विपश्यंस्तु विभ्रान्ताक्ष इतस्ततः।
प्रमुह्यन् वेदनार्त्तश्च शुष्कास्योऽरतिपीडितः॥
ऊर्द्ध्वश्वासे प्रकुपिते ह्यधःश्वासो निरुध्यते।
मुह्यतस्ताम्यतश्चोर्द्ध्वं श्वासस्तस्यैव हन्त्यसून्॥११॥
यस्तु श्वसितिविच्छिन्नं सर्व्वप्राणेन पीडितः।
नवाश्वसिति दुःखार्त्तो मर्म्मच्छेदरुगर्दितः॥

ऊर्द्ध्वमित्यादिना ऊर्द्ध्वश्वासलक्षणम् ऊर्द्ध्वमिति विशेषपरं सर्व्वश्वासानां तथा विधत्वात्। दीर्घमिति दीर्घकालम्। नच प्रत्याहरत्यधः इति न श्वासमधः करोति श्लेष्मावृत मुखस्रोत इति श्लेष्मणावृतानिमुखस्रोतांसि च यस्य स तथा क्रुद्धगन्धवहार्दित कुपितवातपीड़ितः समस्त पाठे श्लेष्मावृतमुखस्रोत स्तेन क्रुद्धो यो गन्धवह स्तेनार्द्दितः विपश्यन् इतस्ततो विकृतिं ऊर्द्ध्वंश्वसिति। यो दीर्घं नेच प्रत्याह रत्यध इति यदुक्तं तत्र हेतुमाह। ऊर्द्ध्वश्वास इत्यादि। निरुध्यत इति हृदय एवातिस्तम्भितः अथवा श्वासो वातः सोऽधोनवर्त्तते ऊर्द्ध्वं श्वास ऊर्द्ध्वश्वासः ताम्यतोऽग्लायतो मुह्यतस्तस्यासून् प्राणान् हन्ति नान्यस्येति॥११॥

यस्त्वित्यादि। विच्छिन्नं स विच्छेदं सर्व्वप्राणेन यावद्बलेन न श्वसिति श्वासं न लभते। मर्म्मच्छेदरुगर्द्दित इति हृदयच्छेदः वेदनया पीड़ितः। दह्यमानेन वस्तिना

आनाहस्वेदमूर्च्छार्त्तो दह्यमानेन वस्तिना।
विप्लुताक्षः परिक्षीणः श्वसन् रक्तैकलोचनः॥
विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः।
छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून्॥१२
प्रतिलोमं यदा वायुः स्रोतांसि प्रतिपद्यते।
ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य्य च॥
करोति पीनसं तेन रुद्धो घुर्घुरकं तथा।
अतीव तीव्रवेगञ्च श्वासं प्राणप्रपीडकम्॥
प्रताम्यति स वेगेन तृष्यते सन्निरुध्यते॥
प्रमोहं कासमानश्च स गच्छति मुहुर्मुहुः॥
श्लेष्मण्यमुच्यमाने तु भृशं भवति दुःखितः।
तस्यैव च विमोक्षान्ते मुहूर्त्तं लभते सुखम्॥

उपलक्षितः एतेन वातस्य पित्तानुबन्धो दर्शितः। विप्लुताक्षः चलचक्षुः अश्रुपूर्णचक्षुर्वा रक्तैकलोचनत्वं व्याधिप्रभावात् दोषाच्च द्वयोरपि स्यात विचेता उद्विग्नचेता छिन्नो विमोक्षितसन्धिबन्धः पीड़ित इत्यन्ये विद्रुत इति पाठान्तरम्॥१२॥

प्रतिलोममित्यादि। श्लेष्माणं समुदीर्य्य च इत्यनेन सामान्यसंप्राप्तिलब्धस्यापि श्लेष्मणः पुनरभिधानादिह विशेषेण कारणत्वं बोधयति तेन रुद्धः कफेनावृतः घुर्घुरशब्दं प्राणपीड़कं प्राणाधिष्ठानहृदयप्रपीड़कं प्रताम्यति तमसि

तथाप्यासीनो लभते कण्ठः सञ्जायते अतिभायितुम्।
नचापि लभते निद्रां शयानः श्वासपीडितः॥
पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः।
आसीनो लभते सौख्यमुष्णञ्चैवाभिनन्दति।
उच्छ्रिताक्षो ललाटेन स्विद्यताभृशमर्त्तिमान्॥
विशुष्कास्यो मुहुःश्वासो मुहुश्चैवावधम्यते।
मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते॥
स याप्यस्तमकः श्वासः साध्यो वा स्यान्नवोत्थितः॥१३॥
ज्वरमूर्च्छापरीतस्य विद्यात् प्रतमकन्तु तम्॥१४॥
उदावर्त्तरजोजीर्णक्लिन्नकायनिरोधजः।

प्रतिश्यायेनाभिरुध्यते निश्चेष्टो भवतीति चक्रः। जेज्जटस्तु अभिरुध्यते श्वास इति तस्यैवेति श्लेषगः। मुखमिव मुखं कण्ठमो कण्डूयते पार्श्व इति कर्मपदम् अवगृह्णाति पीडयति उष्णमभिनन्दति वातकफारब्धत्वात् उच्छ्रिताक्ष उत्कटनेत्रः ललाटेनेति इत्यम्भूतलक्षणे तृतीया अवधम्यते गलाकृष्यते सर्वगात्रं चाल्यते तम कस्यैव विशेषानुबन्धात्॥१३॥

ज्वरादियोगेन प्रतमकसंज्ञामाह।

ज्वरेत्यादि। ज्वरमूर्च्छाभ्यां परीतो ज्वरमूर्च्छापरीत ज्वरे वा मूर्च्छा वा मूर्च्छेति जेज्जटः॥१४॥

तमसा वर्द्धतेऽत्यर्थं शीतैश्चाशु प्रशाम्यति ॥
मज्जतस्तमसीवास्य विद्यात् सन्तमकन्तु तम् ॥१५॥

एतस्यैव परलक्षणं कारणञ्च ।

उदावर्त्त इत्यादि । उदावर्त्तो रोगः रजो धूलिः अजीर्णमामादि क्लिन्नं विदग्धं कार्यवेगानां निरोधः अथवा क्लिन्नकायो दुर्बलनर इत्याहुः निरोधो वेगनिरोधः अथवा कुयोगिनां कुम्भकादि रूप एवात्र निरोध इति जेज्जड़ः । तमसा अन्धकारेण मानसदोषेण वा अत्यर्थमिति इतरकारणापेक्षया विशेषेण वातकफारब्धोऽपि पित्तसम्बन्धात् शीतैरुपशाम्यतीत्याहुः । संतमक प्रतमक एवेति । अन्ये तु उदावर्त्तेत्यादिना प्रतमकस्य उपसर्गमाहुरिति जेज्जड़ः ॥१५॥

---

(१) उद्धूयमानेत्यादि मूलम् । यो नर उद्धूयमान वात ऊर्द्धं गम्यमान वातो दुःखितः सन् सशब्दं यथा भवति तथा उच्चैः दीर्घं तथाऽनिशं निरन्तरं संरुद्धोमत्तर्षभ इव श्वसिति प्रनष्टज्ञान विज्ञानाद्युपपन्न महाश्वासोपसृष्टः क्षिप्रमेव विपद्यते म्रियते इत्युत्तरेणान्वयः । अस्य ज्ञानम् अत्यर्थं प्रकम्पितं श्वासं दूरात् विजानीयात् इति ॥

(२) ऊर्द्धं श्वसितीत्यादि यो दीर्घकालं व्याप्य ऊर्द्धं श्वसिति न च अधः प्रत्याहरति न श्वासमधः करोति श्लेष्मावृत मुखस्रोतो इत्यादि विशेषणाक्रान्तः स ऊर्द्धश्वासी भवतीत्युक्तम् ॥

(३) प्रतिलोममित्यादि । यदा वायुः प्रतिलोमं यथा भवति तथा स्रोतांसि प्रतिपद्यते प्राप्नोति तदा ग्रीवां शिरश्च संरुध्य संरोधनया व्याप्य श्लेष्माणं समुदीर्य वर्द्धयित्वा च पीनसं करोति तेन रुद्धः कफेनावृतो

रूक्षायासोद्भवः कोष्ठे क्षुद्रो वात उदीरयन्।
क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः॥

क्षुद्रश्वासमाह।

रूक्षेत्यादि। रूक्षमन्नपानं क्षुद्रोऽल्पनिदानलिङ्गः उदीरयन् ऊर्ध्वं गच्छन् इतरे ऊर्ध्वश्वासादयः स साध्य उक्तः

वायुर्घुर्घुरकं कण्ठे घुर्घुरशब्दं तथा अतीवतीव्रवेगं प्राणप्रपीडकं श्वासञ्च करोतीति योज्यं यस्य एवं भवेत् स वेगेन श्वासवेगेन प्रताम्यति तमसि प्रविशतीव तथास्यते एवं सम्विवर्धते निश्चेष्टो भवति तथा-श्वसमानः सन् मोहं मुहुर्मुहुः गच्छति प्राप्नोतीत्यर्थः। अमुच्यमाने च श्लेष्मणि स भृशं दुःखितो भवति तस्यैव तु श्लेष्मणः विमोक्षान्ते मुहूर्त-मिव सुखं सुखवत् प्रतीयमानं न तु प्रकृतं सुखं पीडितावस्थायां तादृश सुखस्य अभावात् मुहूर्तं लभते तथा अस्य विमुच्यमान श्लेष्मणः कण्ठ ऊर्ध्वं च ते कण्डूयति कृच्छ्रात् स भाषितुं कथयितुं शक्नोति शयानोऽपि श्वासपीडितः सन् न निद्रां लभते एवं शयानस्य तस्य समीरणो वायुः पार्श्वे अवगृह्णाति पीडयतीत्यर्थः। स आसीनः सन् सौख्यं लभते उष्णाभिनन्दति इच्छति उच्छ्रिताक्ष उन्नताक्षः विद्यता स्वेद-युक्तेन ललाटेनोपलक्षितः भृशमत्यर्थम् अर्तिमान् विशुष्कास्यं यस्य स तथा मुहुःश्वासो मुहुः श्वासयुक्तः तथा मुहुरेवावधम्यते एवम्भूतस्य तस्य मेघाम्बुशीत प्राग्वातैः श्लेष्मलैः श्लेष्मवर्धकैश्च यो विवर्धते स तमकः श्वासो याप्यः नवोत्थितः साध्यो वा स्यात्। स उदावर्त रजोऽजीर्ण क्लिन्न-कायनिरोधजः तमसाऽत्यर्थं वर्धते शीतैश्चाशु प्रशाम्यति तमसि मज्जत इवास्यतं अन्तरकं विद्यादित्यन्वयः॥

(४)रूक्षायासोद्भवः इत्यादि। कोष्ठे रूक्षायासोद्भवः क्षुद्रो वात उदी-रयन् ऊर्ध्वं गच्छन् क्षुद्रश्वासो भवति स क्षुद्रश्वासः अत्यर्थं दुःखेन अङ्ग-प्रबाधेन न गात्राणि हिनस्ति न च दुःखः दुःखजनकः यथा इतरे

हिनस्ति न स गात्राणि न च दुःखो यथेतरे ।
न च भोजनपानानां निरुणद्ध्युचितां गतिम् ॥
नेन्द्रियाणां व्यथां नापि काञ्चिदापादयेद्रुजम् ।
स साध्य उक्तो बलिनः सर्व्वे चाव्यक्तलक्षणाः ॥

क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते ।
त्रयः श्वासा न सिद्ध्यन्ति तमको दुर्ब्बलस्य च ॥१६॥
कामं प्राणहरा रोगा बहवो न तु ते तथा ।
यथा श्वासश्च हिक्का च हरतः प्राणमाशु च ॥१७॥

इति हिक्काश्वासनिदानम् ॥

इति केचित् । सर्व्वे महाश्वासादयोऽव्यक्तलक्षणाः यत्नतः साध्या इति योज्यम् । त्रयः श्वासा न सिध्यन्ति महोर्द्ध-छिन्नाः सम्पूर्णलक्षणाः उपेक्षमाणाः ॥१६॥

अत्युग्रतमाभ्यां हिक्काश्वासयोः भीमतमत्व-मारकत्वमाह ।

काममित्यादि[1] । काममित्यादि काममनुमतौ प्राणहाराः सन्निपातादयः शेषं सुबोधमिति ॥१७॥

इति व्याख्यामधुकोषे हिक्काश्वासनिदानम् ।

अत्र[1] गात्रादयः दुःखकराः न च भोजनपानानाम् उचितां गतिं

अथ स्वरभेदनिदानम् ।

अत्युच्चभाषणविषाध्ययनाभिघातसंदूषणैः प्रकुपिताः पवनादयस्तु । स्रोतःसुते स्वरवहेषु गताः प्रतिष्ठां हन्युःस्वरं भवति चापि हि

प्राणोदानदुष्टि साधर्म्यात् श्वासे च स्वरभेदो भवति इति श्वासानन्तरं स्वरभेदमाह ।

अत्युच्चभाषणमित्यादि । अध्ययनम् उच्चैर्वेदादिपाठः अभिघातः कण्ठादिदेशेषु गुडादिभिः एतैः संदूषणैश्चान्यैश्च यथास्वं वातादिकोपनैः । विषस्तु सर्वदोषप्रकोपनमेव स्रोतः सुस्वरवहेषु चतुर्षु यदुक्तं सुश्रुते द्वाभ्यां भाषते द्वाभ्यां घोषं करोति भाषणा घोषणयोरल्पत्वमहत्त्वाभ्यां

निवर्तते । न इन्द्रियाणां व्यथां नापि काञ्चित रुजम् आपादयेत् उत्पादयेत् स साध्यः उक्तः ॥

(५) काममित्यादि । काममनुमतौ इति मेदिनीकार हेमचन्द्रौ । अनुमतिरत्र सम्मतिः । बहवो रोगाः प्राणहरास्ते तु न तथा यथा श्वासश्च हिक्का च आशु प्राणं हरत इत्यन्वयः । अत्र काममित्यनेन सन्निपात ज्वरादीनां प्राणनाशकत्वे सम्मतेऽपि पुनस्ते तु न तथा यथा श्वास हिक्के शीघ्रमवश्यं प्राणं हरत इति कथनादे तदुक्तं भवति श्वास हिक्कयोरवश्यमाशु प्राणनाशकत्वं सन्निपात ज्वरादीनान्तु कादाचित्कमिति । श्वासश्च हिक्का चेत्यत्र द्वन्द्वार्थक चकारद्वय अवणात् ते इति पदाध्याहारादेव्याहरत इति क्रियायां द्विवचनं यथा तवौर्ज स्वी द्वः पादाम् राजाराज्ञी चेति माघः ॥

इति व्याख्यामधुकोषपञ्चिकायां श्वासनिदानम् ।

षड्विधः सः॥ वातादिभिः पृथक्समस्तैर्मेदसा च क्षये न च॥१॥

वातेन कृष्णनयनानन मूत्रवर्चा भिन्नं शनैर्वदति गर्द्दभवत् खरञ्च॥२॥

पित्तेन पीतनयनानन मूत्रवर्चा ब्रूयाद्गलेन स च दाहसमन्वितेन॥३॥

ब्रूयात् कफेन सततं कफरुद्धकण्ठः स्वल्पं शनैर्वदति चापि दिवा विशेषात्॥४॥

सर्वात्मके भवति सर्वविकारसम्पत्

भेदः प्रतिष्ठां स्थितिं हन्युः नाश इति स्वरभेदः षड्विधो वातपित्तकफ सन्निपातक्षयमेदोज भेदात्॥१॥

वातेत्यादि कृष्णत्वं मूत्रादिषु स्वरभेदारम्भकदोषस्य सर्वाङ्गव्यापकत्वात् भिन्नवत् भिन्नं भिन्नस्वरं तदेवाह गर्द्दभवत् खरं परुषं निष्ठुरं उद्वेजकमिति यावत्॥२॥

गलेनेति विशेष्योपदर्शनं दाहसमन्वितेनेति विशेषणस्य विशेष्याधीनत्वात् गलस्य सदाहो भवतीत्यर्थः॥३॥

दिवा विशेषादिति दिने सूर्य्यरश्मिभिः कफस्य मन्दीभावात् विशेषाद्विशिष्टं वदतीत्यर्थः दिवाविशेष इति पाठान्तरेऽप्ययमर्थः॥४॥

तच्चाप्यसाध्यक्षयजः स्वरभेदमाहुः ॥५॥

धूप्येतवाक्क्षयकृते क्षयमाप्नुयाच्च वागेष चापि हतवाक् परिवर्जनीयः ॥६॥

अन्तर्गतं स्वरमलक्ष्यपदं चिरेण मेदोन्वयाद्वदति दिग्धगलस्तृषार्त्तः ॥७॥

सर्वविकारसम्पदिति उक्तवातादिस्वरभेदलिङ्गयोगः तच्चाप्यसाध्यमिति अपिशब्दोऽभिन्नक्रमे असाध्यमपि तेन सर्वजे क्षयजे चापि प्रत्याख्याय चरेत् क्रियामिति सुश्रुतवचनमुपपन्नं भवतीति ॥५॥

धूप्येतवागिति धूममिव निर्गच्छन्ती वेदनयाऽनुभूयते क्षयकृत इति धातुक्षयकृते स्वरभेदे क्षयमाप्नुयाच्च वागिति पदच्छेदः एष च यदा हतवाग्भवति ओजःक्षयाद्धतवाक्तदाऽसाध्यते अन्यथा साध्यः तेन प्रत्याख्यायक्रियाकरणमुपपन्नं भवति एष चापीति पाठे वातादिस्वरभेदेषु मध्ये हतवागसाध्यः किन्त्वयं पाठष्टीकाकारैर्न व्याख्यातः ॥६॥

अन्तर्गतस्वरमित्यादिना मेदोजलक्षणम् ।

अन्तर्गतस्वरमिति क्रियाविशेषणम् अन्तर्गतं स्वरमिति पाठे कण्ठस्यान्तर्गतं यथा भवति तथा स्वरं वचनं वदतीतिबोध्यम् अन्तर्गतमिति पाठान्तरे गलस्यान्तर्गतं तद्गतं स्वरं वदतीत्यर्थः दिग्धगल इति श्लेष्ममेदसा वा लिप्तगल इत्यर्थः । तृषार्त्तो मेदोवहस्रोतस्त्वात् ॥७॥

क्षीणस्य वृद्धस्य कृशस्य वापि चिरोत्थितो यश्च सहोपजातः । मेदस्विनः सर्व्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति ॥८॥

इति स्वरभेदनिदानम् ।

क्षीणस्येत्यादिना सहोपजात इत्यन्तेन उक्ता वातादिजाना सेवामप्यायामसाध्यत्वमाह क्षीणस्यामसस्य कृशस्य क्षीणमांसस्य सहोपजातः जन्मप्रभृति बद्धः काकस्वर इत्यादि लोके सहोपजात इत्यत्र मदोपजात इति पाठान्तरं मेदोरोगविशेषः मेदस्विनोऽतिस्थूलस्य मेदसावृतस्रोत सोनयोः जातः अमेदस्विनस्तु मेदो दुष्ट्याजातः साध्यः सपूर्व्वमुक्त इति न विरोधः सर्व्वसमुद्भवश्चात्र गाढः सम्पूर्णलिङ्गो वा असाध्यो द्रष्टव्य इति ॥८॥

इति स्वरभेदनिदानम् ।

स्वरभेदरोगस्य निदानं समाप्तमेतितम् ॥

अथारोचकनिदानम्।

वातादिभिः शोकभयातिलोभक्रोधैर्मनोघ्नाशनरूपगन्धैः ॥१॥

अरोचकाः स्युः परिहृष्टदन्तः कषायवक्त्रश्च मतोऽनिलेन। कट्वम्लमुष्णं विरसञ्च पूति पित्तेन विद्याल्लवणञ्च वक्त्रम्॥ माधुर्य्यपैच्छिल्यगुरुत्वशैत्यविबद्धसंबद्धयुतं कफेन ॥२॥

ऊर्द्ध्वगविकारसाधर्म्यादरोचकमाह।

वातादिभिरित्यादि। एकैकशो वातादिभिस्त्रयः सन्निपातेनैकः शोकादिनागन्तुस्तेनान्तुरेक एव गणनीयः यतः पञ्चानामेव लक्षणं वक्ष्यति सुश्रुतेनोक्तं भक्तोपघातमिह पञ्चविधं वदन्तीति शोकादिजस्तु यद्यपि वातादिजः तथापि हेतुप्रत्यनीकचिकित्साकरणार्थं पृथगुक्तः अतिलोभादत्याहितस्य सततोपयोगहेतुतया दोषप्रकोप इति दर्शयति अरोचकाः स्युरिति छेदः ॥१॥

परिहृष्टदन्त इति अम्लभक्षणेनेव कटुरवतिक्तागाची यदाह विदेहः पित्तमतिक्तास्यविदाहकरस्यात् स्वाद्वास्य श्लक्ष्णाभकरः कफेन। लवणमित्यादि कफजः विदग्धस्य श्लेष्मणो लवणरसत्वात् उक्तं हि सुश्रुते श्लेष्मा विदग्धो लवणः स्मृतः। पक्वं विदग्धमन्नमिति, विबद्धसम्बन्धयुतमिति विबद्धश्च सम्बन्धयुतश्चेति विबन्धसम्बन्धयुतम् अत्र विबद्धं

अरोचके शोकभयातिलोभक्रोधाद्यहृद्याशुचिगन्धजे स्यात्। स्वाभाविकञ्चास्य मथारुचिश्च त्रिदोषजेऽनैकरसं भवेत्तु ॥३॥

हृच्छूलपीडनयुतं पवनेन पित्तात् तृड्दाहचोषबहुलं सकफप्रसेकम्। श्लेष्मात्मकं बहु-

---

बहुमिव भक्ष्याद्यसामर्थ्यात् सन्नद्रुयुतं कफस्रेति शेषः भावेन: कफजिर्ममित्यर्थः विदग्धसव्यस्ययुतमिति पाठान्तरं सुगमं विवद्ध सन्नद्रुयुतमिति पाठे विवद्ध सन्नद्रः अप्रकृतत्वात् कफस्य सनद्धो बद्धः गाढबन्धन तुल्यत्वाद्धातोः पूर्व्ववत् क्तादि। विवद्ध संसव्ययुतमिति काश्मीराः ॥२॥

अहृद्य गन्धोत्राणोद्भवकोगन्धः स्वाभाविकञ्चास्यमिति अविकृतमुखरसत्वं नतु वातजादिवत् कषायत्वादि। त्रिदोषजेऽनैकरसमिति वातजाद्युक्त कषायाद्यनेकवक्त्वम् ॥३॥

वातजादिभेदेन मुखविकृतिमभिधायान्यदेशविकृतिमाह।

हृच्छूलमिति। हृदिशूलेन पीडनं चोषश्चयथावत् पीडाचक्रमिरिति त्रिदोषैः वैगुण्यमोहजडताभिरथापरमिति उपलक्षणे तृतीया वैगुण्यं मनसो व्याकुलत्वम् अपरमिति दोषजादन्यदागन्तुजमित्यर्थः सत्यामपि बुभुक्षायाम् अभ्यवहारासामर्थ्यम् अरुचिः अभिलषित-

रुचं वक्तुभिन्न विद्याद्दैगुण्य मोहजडताभि-
रयापरञ्च ॥४॥

इति अरोचकनिदानम्।

मधुरं दीयमानं नाभ्यवहरतीत्यनन्नाभिनन्दनम् यस्तु अवलोकनस्पर्शनगन्धस्पर्शैर्योद्विजते स भक्तद्वेष एवं त्रिविधोऽपि रोगश्चरकसुश्रुताभ्याम् अरोचकशब्देन गृहीतः उक्तं हि दृढभोजेन।

प्रक्षिप्तन्तु मुखे चान्नं जन्तोर्नास्वदते मुहुः।
अरोचकः स विज्ञेयो भक्तद्वेषमतः शृणु ॥
चिन्तयित्वा तु मनसा दृष्ट्वा श्रुत्वा तु भोजनम्।
द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते।
यस्य नान्ने भवेत् श्रद्धा सोऽभक्तच्छन्द उच्यते।
कुपितस्य भयार्त्तस्य यस्य भक्तनिरोधनमिति ॥४॥

इति अरोचकनिदानम्।

अथ छर्दिनिदानम् ।

दुष्टैर्दोषैः पृथक् सर्वैर्बीभत्सालोचनादिभिः ।
छर्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते ॥
[1]अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि ।
अकाले चातिमात्रैश्च तथासात्म्यैश्च भोजनैः ॥
श्रमाद्भयात्तथोद्वेगादजीर्णात् क्रिमिदोषतः ।
नार्याश्चापन्नसत्त्वायास्तथा विद्रुतमश्नतः ॥
बीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात् ।

छर्द्यामप्यरुचेर्भावात्तथारोचकवत् पञ्चविधत्वाद्वारोचका-नन्तरं छर्दिं तस्या निदानानि विवक्षुराह ।

दुष्टैरित्यादि । बीभत्सालोचनं विकृतिदर्शनम् आदि-शब्देन निन्द्यगन्धभक्षणादीनां ग्रहणम् । नार्याश्चापन्न-सत्त्वाया इति गर्भिण्यास्तस्या गर्भोत्पीडनेन वातवैगुण्या

(1) अतिद्रवैरित्यादि मूलम् । अतिद्रवादिभिः बीभत्सैः विकृत-हेतुभिरन्यैरनिष्टगन्धादि हेतुभिश्च द्रुतं शीघ्रमुत्क्लेशितः कुपितः वक्त्रं प्रधावितो दोषः बलात् वेगमुखं छादयन् पूरयन् अङ्गभञ्जनैश्च वेदनैश्च पीडयन् सन् छर्दिरिति निरुच्यते । कृशाङ्गपीडना-दिभिर्मुक्तः उपचरितो वा आशीनरः महता वेगेन उद्गारशब्दप्रबलं सफेनं विच्छिन्नमत्यन्तमुष्णं कषायम् अल्पं कृच्छ्रेण च दुःखं यथा स्या-त्तथा अनिलात् छर्दयतीति सम्बन्धः । छर्दयतीति छर्दतुः वमने इत्यस्य रूपम् । शूला विपाकेत्यादि । त्रिदोषात् सर्वथा नीलं सान्द्रोष्णरक्तं लवणं निरन्तरं वमतां क्ष्मां शूलादिभिः प्रमोहाद्यैः प्रबलाभ्यर्दिः स्यादित्यर्थः ।

छादयत्याननं वेगै रर्दयन्नङ्गभञ्जनैः ॥
निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावितः ॥१॥
हृल्लासोद्गार रोधश्च प्रसेको लवण स्तनुः ।
द्वेषोऽन्नपाने च भृशं वमीनां पूर्वलक्षणम् ॥२॥
हृत्पार्श्वपीडा मुखशोष शीर्षनाभ्यर्त्तिकास स्वरभेदतोदैः । उद्गारशब्दं प्रबलं सफेनं विच्छिन्नमुष्णं तनुकं कषायम् ॥ कृच्छ्रेण चाल्पं महता च वेगे नार्त्तोनिला छर्दयतीह दुःखम् ॥३॥

छर्दिः । छादयत्याननमित्यादि । वेगैर्मुखं पूरयन् अर्दयन् पीडयन् अङ्गभञ्जनैरङ्गभेदैः छादयतिमुखम् अर्दयत्यङ्गानीति छर्दिः छद अपवारणे अर्द हिंसायाम् अनयोः पृषोदरादित्वेन रूपसिद्धिः ॥१॥

उद्गारावरोध उद्गाराप्रवृत्तिः प्रसेको मुखप्रसेकः आस्य लवणत्वं प्रभावात् आमाशयोत्क्लेशकत्वेन कफविदाहाद्वा तनुरघनोऽल्पो वा ॥ २ ॥

शीर्षनाभ्यर्त्तिः मस्तकेनाभौ च शूलं तोदैरित्यनन्तरं युक्त इति शेषः उपलक्षणे वा तृतीया आर्त्तो नरश्छर्दयतीति योज्यम् । किंभूतं छर्दयतीत्याह । उद्गारेत्यादि । उद्गारशब्दाभ्यां प्रबलम् उद्गारशब्दप्रबलं विच्छिन्नं शान्तवेगम् अल्पद्रवं वातस्य द्रवत्वाभावात् तनुकम् अघनं कषायं कषायरसं कषायस्य वातकृतत्वात् ॥३॥

मूर्च्छापिपासामुखशोषमूर्द्धताल्वक्षिसन्तापतमोभ्रमार्त्तः। पीतं भृशोष्णं हरितं सतिक्तं धूम्रञ्च पित्तेन वमेत् सदाहम्॥४॥

तन्द्रास्यमाधुर्य्यकफप्रसेकसन्तोषनिद्रारुचिगौरवार्त्तः। स्निग्धं घनं स्वादु कफाद्विशुद्धं सलोमहर्षोऽल्परुजं वमेत्तु॥५॥

शूलाविपाकारुचिदाहतृष्णाश्वासप्रमोहप्रबला प्रसक्तम्। छर्द्दिस्त्रिदोषाल्लवणाम्लनीलसान्द्रोष्णरक्तं वमतां नृणां स्यात्॥६॥

[2]विट्स्वेदमूत्राम्बुवहानि वायुः स्रोतांसि संरुध्य

तमोऽन्धकारदर्शनमिव धूम्रं कृष्णलोहितम्॥४॥

आस्यमाधुर्य्यं मुखस्य मधुररसत्वम्। सन्तोष इति सन्तोष इव सन्तोष अन्नानभिलाष इत्यर्थः ह्यसौ हि नान्नमभिलषति अपचिरव्यवहारार्थमर्थं स्वादु मधुरं विशुद्धमतिशुभ्रं कथ्यते शुक्लं श्वेतं सान्द्रं कफेनेति पाठात्॥५॥

शूलादिभिः प्रमोहान्तैः प्रबला शूलादि प्रबलाः प्रसक्तं निरन्तरं त्रिदोषादित्यत्र त्रिदोषेति पाठान्तरे त्रिदोषजे इत्यर्थः॥६॥

---

(२) विट्स्वेद इत्यादि। विट्स्वेदमूत्राम्बुवहानि स्रोतांसि संरुध्य यदा वायुरूर्द्ध्वं एति गच्छति तदा स एव वायुरुद्धतदोषस्य

यदोर्द्ध्वमेति। उत्सन्नदोषस्य समाचितं तं दोषं समुद्धूय नरस्य कोष्ठात्॥ विण्मूत्रयोस्तत्सम-गन्धवर्णं तृट्श्वासहिक्कार्त्तियुतं प्रसक्तम्। प्रच्छर्दयेद्दुष्टमिहातिवेगात्तयार्दितश्चाशु विनाश-मेति॥७॥

'बीभत्सजा दौहृदजामजा च असात्म्य-

असाध्यमाह।

विडित्यादि। उत्सन्नदोषस्य उद्धतदोषस्य दोषमिति पित्तं कफं वा स्वेदादिकान् वातदुष्टान् धातुमलान् तानिति यस्माद्विडादिवाहि स्रोतो रुद्धं ततो हेतो र्विण्मूत्रयोः समगन्धवर्णं छर्दयतीति योज्यम्। इयन्तु छर्दिर्विकृतिवि-षमसमवाया त्रिदोषजेति केचित् अन्ये त्वाहुः सर्वा एव छर्दयः प्रसक्ता एवंविधाः सत्योऽसाध्याः स्युरिति॥७॥

उद्धतदोषस्य नरस्य समाचितं सञ्चितं दोषं पित्तं कफञ्च स्वेदादिकान् वातदुष्टान् धातुमलान् वा कोष्ठात् समुद्धूय सञ्चाल्य ततः यस्मात् विट्-स्वेदादि वाहिस्रोतो रुद्धस्तस्मात् विण्मूत्रयोः समगन्धवर्णं तृट् श्वास कासार्तियुक्तं तं दोषम् अतिवेगात् प्रसक्तं निरन्तरं प्रच्छर्दयेत् नाशयेदित्यर्थः तया छर्द्या अर्दितो नरः आशु विनाशम् एति प्राप्नो-नोति।

(१) बीभत्सजेत्यादि। आगन्तु जन्यसामान्यात् बीभत्सजा स्वादिना क्रिमिजामेकत्वेनैव गणनीया सा हि पञ्चतीतास्य आदौ उक्तं वातादिच्छर्दिवच्च तथा दोषोन्नयेनैव दोषस्य हृद्याविभा-

तीव्रा क्रिमिजा च या हि । सा पञ्चमी तांश्च
विभावयेच्च दोषोच्छ्रयेणैव यथोक्तमादौ ॥८॥
शूलहृल्लासबहुला क्रिमिजा च विशेषतः ।
क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ॥९॥

आगन्तुजामाह ।

बीभत्सेत्यादि । दौर्हृदजा लोभजा आमजा अजीर्णजा असात्म्यत इति असात्म्यभक्षणजा क्रिमिजा कोष्ठ-क्रिमिसम्भवा बीभत्सेत्यादिना क्रिमिजान्ते नैकत्वेनैव गणनीया आगन्तुजत्व सामान्यात् । सा पञ्चमीति त्रिदोष-अपेक्षया सामान्येन गन्तुजैरागन्तु ज्वरवत् । यद्यपि बीभत्सजापेक्षया क्रिमिजा पञ्चमीति गण्यन्ते तदा तांश्च विभावयेत् दोषोदयेनैव इत्यनेन क्रिमिजाया एव दोष-सम्बन्धः स्यात् ततश्च बीभत्सजादीनां चिकित्सोपयोगि-दोषसम्बन्धो न लभ्यते अन्ये तद्दोषपरिहारार्थं सा पञ्चमी तांश्चेति स्थाने अपनान्तं पठन्ति एवं सति अन्तर्गणनमप्र-योजनमित्यन्तर्गणना नाद्रियन्ते कथं तत्र दोषोच्छ्रयो विभावनीय इत्याह यथोक्तमादाविति आदौ वातादि हृद्-लक्षणमित्यर्थः ॥८॥

क्रिमिजाया लक्षणमाह ।

शूलेत्यादि । क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षि-

कथन्तु आगन्तोर्वातादिसम्बन्धः । तथा च वातजादीनां बहुत्वमुक्तं तदपि दोषद्वारा बीभत्सजादीनां [illegible]मिति भावः ।

क्षीणस्य या छर्दिरतिप्रसक्ता सोपद्रवा शोणितपूययुक्ता। स चन्द्रिकां तां प्रवदेदसाध्यां साध्यांश्चिकित्सेन्निरुपद्रवाञ्च ॥१०॥

इति छर्दिनिदानम्।

तेति क्रिमिहृद्रोगे क्रिमिभक्षणवत् पिडादिकं तदृत्या भवतीत्यर्थः ॥८॥

स चन्द्रिकामिति मेदः प्रभृति धातुनां स्नेहप्रवर्त्ति-मानोमयुरपिच्छचन्द्रवत् प्रतिभाति। अनुपद्रवामिति कासाद्युपद्रवरहितां तदुक्तम् ॥

कासः श्वासोज्वरो हिक्का तृष्णा वैचित्यमेव च।
हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्द्देरुपद्रवाः ॥१०॥

इति छर्द्दिनिदानम्।

इति व्याख्यामधुकोषपञ्जिकायां छर्दिनिदानम्।

अथ तृष्णानिदानम्।

भयश्रमाभ्यां बलसंक्षयाद्वा ऊर्ध्वं चितं पित्तविवर्धनैश्च। पित्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत् पिपासाम्॥ स्रोतःस्वपांवाहिषु दूषितेषु दोषैश्च तृट् संभवतीह जन्तोः॥१॥

तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथा-

छर्दिस्तृष्णोपद्रवत्वात् छर्द्यनन्तरं तृष्णानिदानं संप्राप्तिश्चाह।

भयेत्यादि। पित्तविवर्द्धनैरिति कट्वम्लोष्णादिभिः क्रोधोपवासादिभिश्च स्वस्थान एव चितं कुपितं पित्तं वातश्च भयश्रमबलक्षयैः कुपितः ऊर्ध्वं प्रसरत् पिपासां जनयति तालुस्थितत्वपलक्षणं क्लोमाद्यपि बोध्यं तस्य पिपासास्थानत्वेनोक्तत्वात् चरकेणुक्तं रसवाहिनी च धमनीर्जिह्वामूलगलतालुक्लोम्नः संशोष्य नृणां देहे कुरुत तृष्णामतिमात्रामिति। वक्ष्यमाणानां संप्राप्तिमाह। स्रोत इत्यादि ननु अपां वाहिस्विति बहुवचनं विरुद्धं द्वे उदकवहे इति सुश्रुतेनोक्तत्वात् नैव तयोरेवानेकप्रतानयोगादिति। दोषैरिति वक्ष्यमाणैर्दुष्टिकर्तृत्वात् दुष्टदोषसम्बन्धाद्वा क्षतामयोरपि दोषत्वमिति गदाधरः॥१॥

उपद्रवत्वेति उपद्रव उपद्रुवेति प्रश्नः।

क्षयामसमुद्भवा च। भक्तोद्भवा सप्तमिकेति तासां निबोधलिङ्गान्यनुपूर्वशस्तु ॥२॥

क्षामास्यता मारुतसंभवायां तोदस्तथा शङ्खशिरःसु चापि। स्रोतोनिरोधो विरसञ्च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति ॥३॥

मूर्च्छान्नविद्वेषविलापदाहा रक्तेक्षणत्वं प्रततश्च शोषः। शीताभिनन्दा मुखतिक्तता च पित्तात्मिकायां परिदूयनञ्च ॥४॥

तिस्र इति वातादिभिः प्रत्येकं क्षतजेति क्षतनिमित्त-तृष्णा या भवतीति चतुर्थीत्यनेन उक्तानां चतसृणां सुखसाध्यत्वं बोधयति अन्यासां कष्टसाध्यत्वम् ॥२॥

क्षामास्यता शुष्कदीनमुखत्वं स्रोतो निरोधो रसाम्बुवाहि धमनीनिरोधः शीताभिरद्भिरित्यनेन वायोः शीतस्य शीताम्बुनाऽवृद्धिरित्यनुपशयनिदर्शनं चकारात् चरकोक्त निद्रानाशादयो ग्राह्याः यदाह चरकः निद्रानाशः शिरसो भ्रम स्तथा शुष्कगलतालुरिति ॥३॥

मूर्च्छेत्यादिना पित्तजा। विलापः प्रलापः प्रततश्च शोषः अतीव भवतीत्यर्थः शीताभिनन्दा शीतेच्छा सुरोष इव इत्याकारप्रत्ययः परिदूयनमनुतापः परिधूमनमिति पाठे धूमः क्षोभणं धूमनिर्गम इव वा। चकारात् पीतविण्मूत्रत्वादयो ग्राह्याः ॥४॥

बाष्पावरोधात् कफसंवृतेऽग्नौ तृष्णा बलासेन भवेत्तथा तु। निद्रा गुरुत्वं मधुरास्यता च तृष्णार्दितः शुष्यति चातिमात्रम्॥५॥

बाष्पेत्यादि। स्वकारणकुपितेन कफेन कफविदाहा-च्छादितेऽन्तरग्नौ कफविरुद्ध बाष्पेन पावकोष्मणाऽधो-गते माधुर्य्यस्य स्रोतः शोषणात् कफजा तृष्णा भवति। ननु कफजा तृष्णा अनुपपन्ना कफस्य द्रवस्य केवल द्रवस्य पिपासा कर्तृत्वायोगात् वातपित्तयोरेव तृष्णाकर्तृत्वे-नोक्तत्वात्। यदुक्तं पित्तं सवातं कुपितं नराणामित्यादि चरकेऽप्युक्तं नाप्यं विनातर्षः पवनाग्नी तौ हि शोषणे हेतू इति। सुश्रुतेऽप्युक्तम्॥

सर्वास्वासां चयापचय शुष्काणाम् अङ्गानि तु स्रोतांसि शोषयेयातां ततस्तृष्णाप्रवर्त्तत इति॥

अत आह तथेति उक्तप्रकारेण कफावृताग्निबाष्पाव-रोधादिना न तु स्वकारणेन अतएव चरके कफजा तृष्णा न पठितैव सुश्रुतेनापि चिकित्साभेदार्थं पठिता वाग्भटे-नापि उपचितेन च कफजा तृष्णा पठिता न तु केवलेन यदाह।

कफावयवाजीर्णैः क्रुद्धः श्लेष्मावरोधया।
प्रपद्याम्बुवहं स्रोतस्तृष्णां संजनयेन्नृणाम्॥
शिरसो गौरवं तन्द्रामाधुर्यं महद्गस्य च।
अङ्गद्वेषः प्रसेकश्च निद्राधिक्यं तथैव च॥
एतैर्लिङ्गैर्विजानीयात् तृष्णां कफसमुद्भवामिति॥५॥

क्षतस्य रक्तोपचितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु ॥ ६ ॥

रसक्षयाद्यारसयसक्षवासा तयाभिभूतश्च दिनादिनेषु । पेपीयतेऽम्भः ससुखं न याति तां सन्निपातादिति केचिदाहुः ॥ रसक्षयो-क्तानि च लक्षणानि तस्यामशेषेण भिषग्व्यव-स्येत् । त्रिदोषलिङ्गा समुद्भवा च हृच्छूल निष्ठीवन सादकर्त्री ॥ ७॥

स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्वन्नमेवाशु तृषां करोति ॥ ८॥

क्षतस्येति शस्त्रादिक्षतयुक्तस्य ॥ ६ ॥

क्षयशब्दस्यानेकविषयत्वात् क्षयजं विशेषयन्नाह ।

रसक्षयेत्यादि । पेपीयते पुनः पुनः पिबति अतश्च विशेषपरं सर्वक्षयाच्च तथा भूतत्वात् तदाह सुश्रुतः सततं यः पिबेद्वारि न तृप्तिमधिगच्छति । पुनः काङ्क्षति तोयञ्च तं तृष्णार्दितमादिशेत् । रसक्षयोक्तानि च लक्षणानि सुश्रुतोक्तानि तद्यथा रसक्षये हृत्पीडा कम्पः शोषः शून्यताचेति । तस्यां क्षयजायामशेषेण ज्ञातुं चेन त्रिदोषलिङ्गात्रिदोषलिङ्गयुक्ता चामेऽपि क्षयोत्थेऽजीर्णात्-त्रिदोषकोपः स्यादिति ॥ ७ ॥

भक्तोद्भवामाह ।

स्निग्धमित्यादि । चरकात् कटु च । अथ तिक्तक-

दीनस्वरः प्रताम्यन् दीनः संशुष्कवक्त्रगल-
तालुः । भवति खलु योपसर्गात्तृष्णा सा चौ-
पसर्गिकी कष्टा ॥८॥

ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानां

माधवमधुराम्लवर्णः । गुरुपाकेन भक्ता गुरुद्रव्य सृष्ट च भ-
ज्यते इद्वचनेन तु वाक्यस्याः पठिताः वातपित्तक्षयामोप-
सर्गजा यत्र कफजा आमजायामेव वक्तव्या वातजा वात-
जायां भक्तजा च वातजायां मद्यावरणे वातप्रकोपात्
पित्तजायां वा विदाहेन पित्तप्रकोपात् सूच्यते चोपसर्गजा
यथास्वं दोषजासु । ननु मद्यजापि सुश्रुत मदात्यये
पठिता तत्कथं समेत्युच्यते सत्यं तस्या वातपित्तजायामन्त-
र्भाव एवं द्रष्टव्यमतोपि ॥७॥

तत्रोपसर्गजामाह ।

दीनेत्यादि । दीनस्वरः क्षामस्वनः प्रताम्यन् ग्लायन्
दीनः क्षामः उपसर्गादित्युपद्रवात् उपद्रवश्च व्याध्यन्त-
रोत्पन्नोऽपि वर्तते यथा निरूढोपद्रवचिकित्सितं व्याख्या-
स्याम इति कष्टा कष्टसाध्या व्याधिकर्शितदेहत्वात् ॥८॥

---

(1) दीनस्वर इत्यादि मूलम्। उपसर्गात् उपद्रवात् उपद्रवश्च व्याध्य-
न्तरो व्याधिरेव जायते पश्चात्तदुपसर्गजाता औपसर्गिकी
अविहत योपसर्गिका । कष्टा वा कष्टा कष्टसाध्यात्वा नरः प्रताम्यन्
दीनस्वरादि भवति इत्यनूपसर्गजा ज्वरमोह क्षयकासश्वासाद्युपसृष्ट-
देहानां नराणां भवेत इति तात्पर्यार्थोऽयम्भावः ॥

सर्वास्त्वति प्रसक्ता रोगकृशानां वमिप्रसक्तानाम्। घोरोपद्रवयुक्ता तृष्णा मरणाय विज्ञेया ॥१०॥

तासामेवोपसर्गमाह।

ज्वरेत्यादि॥ आदिशब्देनातीसारादीनां ग्रहणम्। असाध्यामाह सर्वास्त्वित्यादि सर्वा वातजाद्याः अतिप्रसक्ता अतिप्रवृद्धाः घोरोपद्रवयुक्ता मुखशोषादिभिर्मांसक्षयाद्युपद्रवैः समन्विता इति जेज्जटः ॥१०॥

इति तृष्णानिदानम्।

अथ मूर्च्छाभ्रमनिद्रासंन्यास निदानम्।

क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः।
वेगाघातादभिघाताद्धीनसत्वस्य वा पुनः ॥

तृष्णाया मोहो भवतीति तृष्णानन्तरं मूर्च्छा उक्ता वि कृषितो मोहमायातीति निदानं संप्राप्तिञ्चाह। क्षीणस्येत्यादि। बहुदोषस्येति विपुलदोषस्य मल-

---

इति व्याख्यामधुकोषपञ्जिकायां तृष्णानिदानम्।

करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः॥१॥
संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत्॥

नैकदोषस्य तथा सति एकदोषजायाः संप्राप्तिर्नोक्ता स्यात् वेगाघातात् मलादि वेगधारणात् अभिघातात् अशुद्धादिभिः क्षीणसत्त्वस्य हीनसत्त्वगुणस्य करणं मनः तस्यायतनानि बाह्यानि चक्षुरादीनि अभ्यन्तराणि मनोवहानि स्रोतांसि येनागत्य मनश्चक्षुरादीन्यधितिष्ठति अथवा बाह्यानि कर्मेन्द्रियाणि अभ्यन्तराणि धीन्द्रियाणि तेषु यदोग्रा दोषा निविशन्ते तदा मूर्च्छन्तीति योज्यम्॥१॥

पुनः कया संप्राप्त्या इत्यत आह।

संज्ञावहास्वित्यादि। संज्ञावहानाडीशब्देन शिरा धमनी स्रोतसां ग्रहणमित्याहुः। यतस्तैः संज्ञ इन्द्रियादि देशं प्राप्नोति पिहितासु आवृतासु तमोमनोगुणः अज्ञानहेतुः अभ्युपैति वर्द्धते सहसा झटिति अन्येषु तमोबहुलेषु रोगेषु मदात्ययादिषु सत्वरजसोर्ह्रासे तेन तथा नोच्यते यथा मूर्च्छायामित्यत आह सुखदुःखव्यपोहकृदिति सुखदुःखयो रविज्ञप्तिकारणम् (१)एतत्तु प्रायिकत्वेनोक्तं

(१) अवज्ञिप्तिकरमिति पाठान्तरम्। एतत्तु प्रायिकत्वेनोक्तमिति। एतच्च सुखदुःखव्यपोहकृदिति तु प्रायिकाभिप्रायेणोक्तं न तु नियमत एतदेव इति भावः। हेयोपादेयोपेक्षणीय भेदादिति

सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् ।
मोहो मूर्च्छेति तामाहुः षड्विधा सा प्रकीर्तिता ॥२॥
वातादिभिः शोणितेन मद्येन च विषेण च ।
षट्स्वप्येतासु पित्तन्तु प्रभुत्वेनावतिष्ठते ॥३॥
हृत्पीडा जृम्भणं ग्लानिः संज्ञा दौर्बल्यमेव च ।

त्रिविधं ज्ञानं भवति हेयोपादेयोपेक्षणीयभेदात् तेनो-
पेक्षणीय ज्ञानाभावोऽपि ज्ञेयः । व्यवहारार्थं तत्सङ्कोच-
मात् । मोहो मूर्च्छेति ॥२॥

वातादिभि स्तिस्रः शोणितमद्यविषैश्च तिस्रः एवं षट्
प्रभुत्वेनेति व्यापकत्वेन तेन वातजादिष्वपि ज्वरवत् रोग
महिम्नावश्यं पित्तसम्बन्धः अतएव वक्ष्यति मूर्च्छा पित्ततमः
प्रायेति चिकित्सायाञ्च शीतक्रियाविधानमिति ॥३॥

संज्ञादौर्बल्यम् असम्यग्ज्ञानता सर्वासां पूर्वरूप-

हेयोपादेय हेयं दुःखम् उपादेयं सुखं तद्विषयकम् अत्र दुःखोत्पादा-
कारकम् उपेक्षणीयं सुखदुःखात्मकमुदासीनविषयकम् एतयोर्भेदात् ज्ञानं
द्विविधमिति । तेन सुखदुःखव्यपोहादित्यस्य प्राधान्येन । भुवि
मानवा इति । भुवि इत्यत्र निमित्त सप्तमी तस्याः हि द्विविधोऽर्थः
च प्रकृत्यर्थे अन्य पदार्थस्य कारणत्वं रूपं निमित्तत्वमित्येकः यथा रूप-
रागे ज्ञाननिमित्त स्वप्रकृत्यर्थे चक्षुषो ज्ञानस्य कारणत्वात् । च प्रकृत्यर्थं
प्रति अन्यस्य निमित्तत्वमित्यपरोऽर्थः यथा कन्या पुत्र विवाहे नान्दी-
मुखनिमित्त स्वप्रकृत्यर्थं विवाहं प्रति नान्दीमुखस्य कारणत्वात् ।
प्रकृते तु स्वप्रकृत्यर्थे भुवि मानवस्य कारणत्वात् भुविनिमित्ता मानवा
इत्यर्थः तथाच कारणगुणा हि कार्यगुणमारभन्त इति न्यायात्
भवगुणा मानवा इति निष्कर्षार्थमाह पाञ्चभौतिकत्वेपीत्यादि ।

सर्वासां पूर्वरूपाणि यथास्वञ्च विभावयेत्॥४॥

नीलञ्च यदि वा कृष्णमाकाशमथवारुणम्।
पश्यंस्तमः प्रविशति शीघ्रञ्च प्रतिबुध्यते॥
वेपथुश्चाङ्गमर्दश्च प्रपीडा हृदयस्य च।
कार्श्यं श्यावारुणा छाया मूर्च्छायै वातसम्भवे॥५॥

रक्तं हरितवर्णं वा वियत्पीतमथापि वा।
पश्यंस्तमः प्रविशति सस्वेदश्च प्रबुध्यते॥
सपिपासः ससन्तापो रक्तपीताकुलेक्षणः।
संभिन्नवर्चाः पीताभो मूर्च्छायै पित्तसम्भवे॥६॥

मेघसङ्काशमाकाशमावृतं वा तमोघनैः।
पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते॥

शीतिच्छेदः। यथा स्वं विभावयेदिति तां मूर्च्छां वातादिभेदेन जानीयात् व्यक्तरूपावस्थायां न तु पूर्वरूपावस्थायामिति भावः॥४॥

तत्र वातजामाह नीलमित्यादि। नीलं स्निग्धकृष्णं कृष्णं रूक्षकृष्णम् अरुणमीषल्लोहितं तमः प्रविशत्यन्धकारमिव प्रविशति मूर्च्छतीत्यर्थः। शीघ्रञ्च प्रतिबुध्यत इति वायोः शीघ्रकारित्वात् कार्श्यं श्यावारुणा छाया गात्रस्येति शेषः मूर्च्छायै शब्दो मूर्च्छापर्यायः॥५॥

रक्तमित्यादि। वियदाकाशम् अत्र च सपिपासः ससन्तापो रक्तपीताकुलेक्षण इति क्वचिदधिकः पाठः॥६॥

गुरुभिः प्रावृतैरङ्गैर्यथैवार्द्रेण चर्म्मणा ।
सप्रसेकः सहृल्लासो मूर्च्छायां कफसम्भवे ॥७॥
सर्व्वाकृतिः सन्निपातादपस्मार इवागतः ।
स जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः ॥८॥
पृथिव्यापस्तमोरूपं रक्तगन्धस्तदन्वयः ।

मेघेत्यादि । तमोघनैरिति तमोभिर्घनैश्च तमोऽन्धकारो घनोऽत्र मेघवाची ॥७॥

सर्व्वेत्यादि । ननु सर्व्वाकृतिरिति विरुद्धम् उद्देशे षड्विधा सा प्रकीर्त्तितेति अभिहितत्वात् सन्निपातजया सह सप्तत्वं प्रसज्येत उच्यते उद्देशः सुश्रुतग्रन्थेन चरकग्रन्थेन च विवरणं चरके हि एक व्यस्त्रदोषजा चतस्रः पञ्चन्ते यदुक्तमष्टोदरी ये चत्वारो मूर्च्छाया अपस्मारे व्याख्याता इति रक्तमद्यविषजानां यथा दोषमेतास्वन्तर्भावः सुश्रुते चैतासां चिकित्साभेदख्यापनार्थं साक्षात् पठिताः त्रिदोषजायाः प्रत्येकमास्वन्तर्भावः इत्यभिप्रायः । आचार्य्ययोः संग्रहे चात्र सर्व्वतन्त्रस्वीकारात् उभयमपि लिखितमित्यदोषः अपस्मार इवेति महताभिघातेन पतति चिरेण प्रतिबुध्यते अपस्मारे फेनवमित्वदन्तघट्टनाक्षिवक्रताधिकमधिकमिति भेदः । बीभत्सचेष्टितैरिति फेनवमनित्यादिभिरेव ॥८॥

रक्तमूर्च्छामाह पृथिव्याप इत्यादि पृथिवी

तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः ।
द्रव्यस्वभाव इत्येके दृष्ट्वा यदभिमुह्यति ॥८॥

आपश्च एतद्द्वयं तमोरूपं तमोबहुलम् उक्तं हि, तमोबहुला पृथिवी तमोबहुला आप इति पृथिव्यश्च इति पाठे अयमेवार्थः तदन्वयः पृथिव्यम्बोमय सम्भव इति पाठे पृथिवी जलमयः प्रकृतिविकारभावे मयट् । तस्मादिति यस्मात् पृथिव्यापस्तमोरूपं रक्तगन्ध तदन्वयः मूर्च्छा च तमःप्राया तस्मादित्यर्थः । भुवि मानवा इति पञ्चभौतिकत्वेऽपि शरीरस्योद्भूतभूमिगुणाधिक्ये ते भुवि मानवाः पार्थिवा तामसा इत्यर्थः । न राजसाः सात्त्विका वा । ननु चम्पकादिगन्धेनापि मूर्च्छा प्रसज्येत तथापि गन्धस्य पार्थिवत्वात् पृथिव्याश्च तमोरूपत्वादित्याह द्रव्यस्वभाव इत्यादि । रक्तस्यायं प्रभावः । तेन तद्गत एव गन्धो मूर्च्छयतीति स्वभावमेव द्रढयति यद्दृष्ट्वापि मुह्यतीति । अन्ये तु गन्धासम्बन्धादपि दर्शनमात्रान्मूर्च्छोपलम्भादनैकान्तिकत्वं गन्धस्य मन्यमानाः स्वभावमेवाहुः एतेन गन्धस्य प्रायिकत्वमुक्तं यदाह भोजः रक्ताद्दृष्टिर्भवति [illegible] तदुत्थास [illegible] च दर्शनादन्ये रक्तगन्धाच्चैव प्रमुह्यति इति । पृथिव्यापस्तमोरूपमिति पाठान्तरं व्यक्तं पृथिव्याश्च तमोरूपं रक्तगन्धेन तत् त्रयमिति पाठान्तरस्य जेज्जडलिखितस्यायमर्थः रक्तगन्धेन तु यत् त्रयमव्यभिचारित्वं प्रकृतिविकारयो तादर्थ्यात् किं तत् त्रयमि-

गुणास्तीक्ष्णतरत्वेन स्थितास्तु विषमद्ययोः ।
तएव तस्मात्तस्मात्तु मोहौ स्यातां यथोदितौ॥१०॥

अत उक्तं दधिव्यम्लसमोत्कर्षमिति दधिव्यम्लसमवर्णं रूप-मित्यर्थः शेषं पूर्ववत् । हृद्यमिति रक्तमिति शेषः ॥८॥

विषमद्ययोः प्राह ।

गुणा इत्यादि । गुणा दश यदुक्तं दृढ़बलेन लघुरुक्ष-माशु विशदं व्यवायि तीक्ष्णं विकाशि सूक्ष्मम् उष्णम-निर्देश्यरसं दशगुणयुतं विषं तद्वद्विरिति ते तैजसौ

(१) विशदमित्यादि । विशदं निर्मलं व्यक्तम् व्यवायि सकल-कायव्यापकपूर्वकं पाकागमनशीलम् अथवा तेजस्वि : अवाप्तं तेज इति मेदिनी । विकाशि ओजः शैथिल्यपूर्वकं सन्धिबन्ध शिथिली-करणशीलम् ॥

(२) अनिर्देश्य रसमिति । अनिर्देश्यार्थात् पाकानन्तरेण रस-स्यानुत्पादात् अकथितो रसो यस्य तद् अपाकि इति यावत् । तदुक्तं सुश्रुतेन रुक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशु व्यवायि च । विकाशि विश-दञ्चैव लघ्वपाकि च ते दश । तैर्युक्तैर्विषस्य कार्यमाह रौक्ष्यात् कोपयेद्वायुमौष्ण्यात् पित्तं सशोणितं तैक्ष्ण्यात् मतिं मोहयति मर्म-बन्धांश्छिनत्ति हि । शरीरावयवान् सौक्ष्म्यात् प्रविशेत् विकरोति च । आशुत्वादाशु तद्धन्ति व्यवायात् प्रकृतिं भजेत् । विकाशित्वात् भवति दोषान् धातून् मलानपि । अतिरिक्तत्वेन वैशद्यात् दुश्चिकित्स्य-लघुत्वात् । दुर्जरत्वा विपाकित्वात् तस्मात् क्लेशयते चिरम् । तत् शरीरं शरीरावयवानित्यत्र समासेन गुर्वी भूतस्यापि शरीरस्यावयव समवायेन शरार्थः । प्रकृतिं भजेदिति शरीरं विकृतं करोतीत्यर्थः। भवति दूषीकरोति एतेन वमनविरेचनादिकमपि कारयतीत्यर्थः

स्तब्धाङ्गदृष्टिस्तद्वगूढोच्छ्वासश्च मू-
र्च्छितः ॥९॥ मद्येन विलपन् शेते नष्टविभ्रान्त-
मानसः। गात्राणि विक्षिपन् भूमौ जरां यावन्न-

गुणास्तीव्राः सन्निविषमद्ययोस्तु तीव्रतराः अत एवैता-
हिभिर्न मोहः किन्तु विषमद्याभ्यामिति। तत्र वेगित्वया
लघुत्वादयः सप्तैरिताविति विषजो मोहो न स्वयं निव-
र्त्तते विषस्यापाकित्वात् मद्यजस्तु मद्यपरिणामात् प्रा-
म्यति अयञ्च भेदो विषमद्ययोः प्रभावात् उक्तं हि तन्त्रा-
न्तरे ये विषस्य गुणाः प्रोक्ताः। सन्निपात प्रकोपणाः
तएव मद्ये दृश्यन्ते विषे च बलवत्तरा इति ॥१०॥

रक्तादिमूर्च्छात्रयस्य रूपाण्याह।

स्तब्धाङ्गेत्यादि। मूर्च्छित इत्यन्तं रक्तजायाः गूढो-
च्छ्वासश्चाव्यक्तोच्छ्वासः। मूढवदिति पाठे सन्निपातः इत्यर्थः
इति जेज्जटः। मद्येनेत्यादि तदित्यन्तं मद्यजायाः। नष्ट
विभ्रान्तमानस इत्यत्र निटतन् भ्रान्तमानस इति पाठा-
न्तरे निटतन् शब्दं कुर्वन् वेपथ्वादि विषजायाः यथाक्रं

भवति। कतिदिनान्तमद्यपानात् अपक्व तैलबिन्दुवत् विसृतं भव-
तीत्यर्थः। दुर्विभिन्नस्य वायवादिति बहुनामित्वात् चिकित्सा-
व्यापारस्याप्राप्तमित्यर्थः।

(१) प्रातिस्विकमिति। स्वं स्वं प्रतिवर्त्तते यस्मात् प्रतिस्वं तत्र
भवं प्रातिस्विकम् व्यापारमित्यर्थः। मद्येन विलपन्नित्यादि सूक्तम्।
मद्येन मूर्च्छितो विलपन्नित्यर्थः॥

याति तत् ॥१॥ [5]वेपथुस्वप्नतृष्णाः स्युस्तमश्च विषमूर्च्छिते ॥ वेदितव्यं तीव्रतरं यथास्वं विषलक्षणैः ।१॥११॥

मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः ।
चक्रवद्भ्रमतो गात्रं भूमौ पतति सर्व्वदा ॥
भ्रमरोग इति ज्ञेयो रजः पित्तानिलात्मकः ।
तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा ॥१२॥
इन्द्रियार्थेष्वसंवित्ति गौरवं जृम्भणं क्लमः ।

विषलक्षणैरिति विषस्य मूलपत्रक्षीरादि भेदेनोक्तस्य प्रातिस्विकं लक्षणमुक्तं [4]सौश्रुतकल्पस्थाने तल्लक्षणयुक्ता मूर्च्छा भवतीत्यर्थः ॥११॥

संज्ञानाश साधर्म्येऽपि मूर्च्छानां को भेद इत्याह ।

मूर्च्छापित्ततमः प्रायेत्यादि । तमो वातकफादिति समाहारद्वन्द्वः । निद्रातन्द्रयोश्चैतानि कारणानि व्यस्तसमस्तानि तेन सुश्रुते यदभिलषितलक्षणे निद्रातन्द्रे पठिते विनैव कफादित्यतिलङ्घितस्य संशयहेतुत्वात् ॥१२॥

तन्द्रालक्षणमाह ।

इन्द्रियार्थेष्वित्यादि । निद्राभ्रमयोस्तु लक्षणं नोक्तं

---

(५) वेपथुरित्यादि । विषमूर्च्छिते विषजन्य मूर्च्छायां वेपथ्वादयो भवन्ति तथा यथास्वं विषलक्षणैः विषस्य मूलपत्रादिभेदेन असाधारणं लक्षणमुक्तं तैस्तीव्रतरं गाढतरं तमश्च वेदितव्यमित्यर्थः । सुश्रुते । सुश्रुताचार्य्या स्थितइति ग्रंथ त्वाच: समनेकतत्व नियमते इति ।

निद्रासंज्ञैव यस्यैषा तस्य तन्द्रां विनिर्दिशेत् ॥१३॥
दोषेषु मदमूर्च्छाया हृतवेगेषु देहिनाम् ।
स्वयमेवोपशाम्यन्ति संन्यासो नौषधं विना ॥१४॥
वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः ।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः ॥
स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः ।
प्राणैर्विमुच्यते शीघ्रं मुक्त्वा सद्यः फलां क्रियां ॥१५॥

इष्टातिप्रसिद्धत्वात् निद्रानातिविवृत मनसः सर्व्वेन्द्रियाणां स्वविषयनिवृत्तिः यदाह चरकः यदा तु मनसि क्लान्ते कर्म्मात्मानः क्लमान्विताः । विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानव इति अत्र कर्म्मात्मान इति इन्द्रियाणि । निरिन्द्रियात्मप्रदेशे मनसोऽवस्थितिरिति मतेऽप्ययमेवार्थः । निद्रातन्द्रयोस्तु कारणभेदाद्भेदः उद्भूतश्लेष्मादेवानुभवसिद्धत्वादिति तथा निद्रायामिन्द्रियमनोमोहः तन्द्रायां मनोमोहः श्रमलक्षणं चक्षुस्थितस्यैव श्रमवत्तु दर्शनमिति ॥१३॥

संन्यासस्य मूर्च्छादिभ्यो भेदमाह ।

दोषेष्वित्यादि ॥१४॥

तल्लक्षणमाह ।

वागित्यादि । अतिबला इत्यनेन मूर्च्छादिकारकदोषेभ्योऽधिकत्वेन प्रवृद्धा दोषा इति बोधयति । सद-

स्रोतांसि रोधयन्ति च मानुषम: संन्यासः संन्यास-पीड़ितः काष्ठीभूतः इति अचलत्त निश्चलत्वेन काष्ठमेव काष्ठवद्भूतः । अतएव मृतोपम इति अचेत एव मृतोपम इति मुक्ता चाह्रः चर्चा क्रियामिति सूचीव्यधनाञ्जना-रपीड़न् शुकशिम्बावलघर्षणादिरूपा न यदि क्रियते तदा प्राणै र्विमुच्यते ॥१५॥

इति व्याख्यामधुकोषे मूर्च्छानिद्रातन्द्रासंन्यासनिदानम् ।

अथ पानात्ययपरमदपानाजीर्णपान-विभ्रमनिदानम् ।

ये विषस्यगुणाः प्रोक्तास्तेऽपिमद्ये प्रतिष्ठिताः ।
तेन मिथ्योपचारेण भवत्युग्रो मदात्ययः ॥१॥

मूर्च्छामद्येन च विषेणचेति वचनात् मूर्च्छानन्तरं मदात्ययादीनाह । ननु कथं मद्यं मादयतीत्याह ये विषस्येत्यादि ते च विषगुणामूर्च्छाध्याये निर्दिष्टाः ।

इति व्याख्यामधुकोषरक्षितायां मूर्च्छानिदानम् ।

किन्तु तस्य स्वभावेन यथैवान्नं तथा मृतम्।
अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम् ॥२॥
प्राणाः प्राणभृतामन्नं तदयुक्त्या निहन्त्यसून्।
विषं प्राणहरं तच्च युक्तियुक्तं रसायनम् ॥३॥

मिथ्योपयुक्तेनेत्यादि अयथाविधिपीतेन विधिश्चायं तद्यथा। कुसुमितलतोपगूढैः मकरन्द निरन्तर नवांकुरनिकररोमाञ्च मधुकरमधुरझङ्कार सीत्कारैर्मत्तकलकण्ठकलकण्ठकूजिते दक्षिणसमीरणसमुल्लासित पल्लवकरप्रचारैः ललितवनिताभिरूपकान्तरतिभिरतिशोभनेषु भवनोपवनेषु तुषारकिरणराजिपराजिततापदोषे प्रदोषे शृङ्गारसमुचितालङ्कृतिकमनीय कामिनीसेवितं ललितललनोपनीयमान सुरभिबधिरकृपरमोपदंशकं नाम परिमित परार्द्ध्यमधुपानं न मूर्च्छयति परके च विस्तरेणैवोक्तम् ॥१॥

ननु विषस्य ये गुणास्ते चेन्मद्येऽपि सन्ति तर्हि विषवन्मद्यमनुपयोज्यं प्रसज्येत अत आह।

किन्त्वित्यादि। यथैवान्नमिति देहधारकस्वभावं तदेवायुक्तियुक्तमविधियुक्तं रोगाय तथाऽद्धितमपि। विधिनोपयुक्तं हितं हितमप्यविधिनोपयुक्तमनर्थाय भवतीति ॥२॥

अत्रैव दृष्टान्तमाह।

प्राणा इत्यादि। तदयुक्त्येति अतिमात्रत्वादिना विरूक्षादिकं हत्वा मारयतीत्यर्थः युक्तियुक्तमिति। यथा

विधिना मात्रया काले हितैरन्नैर्यथा बलम् ।
प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतोपमम् ॥४॥

चरकरसायनप्रयोगे उक्तं द्वौ यवावत्र हेमशुक्तिकं दद्यात् विषस्य चेति यव तिलमिति तिलप्रमाणम् ॥२॥

विधिनोपयुक्तस्य फलमाह ॥

[1]विधिनेत्यादि । काले इत्यादि नित्यगे चावस्थिके च तद्यथा ग्रीष्मे शीतं मधुरं माध्वीकादि । शीते उष्णं तीक्ष्णं गौडिकं पैष्टिकादि तथा वाते स्निग्धादि । एवं वयस्युदाहार्य्यम् । हितैरन्नैरिति वक्ष्यमाणैः स्निग्धादिभिर्मद्यविपरीतगुणैः स्निग्धैरित्युपलक्षणं तेनान्यैरपि मद्यविपरीत गुणैरिति बोद्धव्यं यदुक्तं सुश्रुते ।

(१) विधिस्थायं यथेति । कुसुमितया न तया उपगूढा आलिङ्गिता यैः एवं प्रफुल्लानां निरन्तराणां यो निकरः समूहः स एव रोमाञ्च रोमहर्षो येषां तैः मधुकराणां भ्रमराणां झङ्कार एवगीतकारो येषां तैस्तथा मृदुकण्ठानां कलकण्ठानां कोकिलानां कलकूजितं वेणु तैः दक्षिण समीरण समुच्छ्रितः पल्लव एव करप्रचारो हस्त प्रचारणं येषां तथा तैः उपकान्ता आरम्भास्तिर्वै तैः एवम् तैः नृत्यतद्भिरिव तदामिरति ग्रीष्मेषु भवनोपवनेषु तथारवस्य हिमकरस्य किरण वर्जिता पराजितो दूरीकृतोऽयं तापएव दोषो यस्मिन् प्रदोषे रजनीमुखे पायं मद्य इति यावत् शृङ्गारे मधुर्ननु द्विरामरं करकाकारशीतकामि तथा सेवितं स्वयं समुचितं तथा चकितया बौद्धयौवनया कामिन्या उपनीयमानं प्रयुज्यमानं सुरभिः सुगन्धः सुचिरवर्त्ती रक्तोत्पल सुचिरदायपरमम सनोहर रजनां उपदंशः मद्य पानानन्तर भक्षणीय द्रव्य विशेषो यस्मिन् तदूपरि एव परिवार मधुपानं शरीरस्य विशिष्ट चेष्ट मद्यपानं न सुखकर नाम सम्बन्धानायां अपि

[1]स्निग्धैस्तद्भक्ष्यमांसैश्च भक्ष्यैश्च सह सेवितम्।
भवेदायुः प्रकर्षाय बलायोपचयाय च ॥५॥

मद्यमम्लं तथा तीक्ष्णं सूक्ष्मं विशद मेव च।
व्यवायाशुकरञ्चैव व्यवायि च विकाशि च।

अत्र (स्नेहस्याप्युद्धृतत्वेनोक्तं यदुक्तं मद्यस्य सर्वेषामम्लजातीनां मद्यं मूर्ध्नि व्यवस्थितमिति मूर्ध्नि व्यवस्थित मुत्कृष्टं चान्योपसर्ग रसाः सन्ति बहवश्च भोज्याः। सेवेयं मदिरा सीधु चतुर्थं मधु चोच्यते एकैकं मदरसमाचरतो मत्तमिच्यते[2] इति ॥४॥

अत्र भक्ष्यपानयो रुपादानेन प्रायो लेह्यं द्रव्यान्तर

वर्णं प्रकरणेन। इहतु तस्य तद्वद् नवीन मानस्यावहारस्य व्यवारोपात् समासोक्तिरलङ्कारोऽयं। तल्लक्षणं यथा समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः। व्यवहार समारोपः प्रस्तुतेऽन्यस्य वस्तुन इति। दर्पणकारादि।

(२) मिच्यत इति। दधत उद्धृतात्वस्येन मद्यं यत्नं मिच्यत इत्यन्वयः।

(१) स्निग्धैरित्यादिमूलम्। स्निग्धैरित्युपलक्षणात् स्निग्धोष्णादिकैस्तद्भक्ष्यैर्वा विपरीतगुणैःप्रविदैरन्नै रोदन सूपादिभि स्तथा मांसैर्भक्ष्यैमोदक सक्तुभिश्च सह सेवितं प्रकरणानयात् मद्यं आयुःप्रकर्षाय बलाय उपचयायेव भवेदित्यन्वयः। अत्रभक्ष्यो भेदस्तु यदुक्तं भाव प्रकाशे चाहार्यं चतुर्विधं भोज्यं भक्ष्यं चर्व्यं तथैव च। लेह्यं चुष्यं तथापेयं मद्दुरावस्थानिष्ठ। भोज्यं वेदेन सूपादि चर्व्यं, मोदक सक्तुकम्। चर्व्यं विधीतं धन्वादि रसालादि निष्यते। चुष्य आम्रफलेक्षवादि पीयते पानं ध्रुवः। भक्ष्यं भक्षणात् भक्ष्या इति यस्य प्रविदिः सत्र चाषादि भक्ष्यं तस्य सेवनात्। रसाना नाना सुमनि द्रव्य संयुत योग विद्धः।

काम्यता मनसस्तुष्टिस्तेजो विक्रम एव च।
विधिवत् सेव्यमाने तु मद्ये सन्निहिता गुणाः ॥६॥

बुद्धिस्मृतिप्रीतिकरः सुखश्च पानान्ननिद्रा-
रतिवर्द्धनश्च। संपाठगीत स्वरवर्द्धनश्च प्रोक्तो-
ऽतिरम्यः प्रथमो मदो हि ॥७॥

पानञ्च मद्यपानोचितं न भवतीति दर्शयति अनभ्यस्ता-भ्यां मद्येऽपि मांसग्रहणं विशेषेण हितत्वोपदर्शनार्थं बलं शक्तिः उपचयः स्थौल्यम् ॥५॥

काम्यतेत्यादि। काम्यता कमनीयमूर्त्तिता मनसस्तुष्टिः सन्तोषः काम्यता मनस इति कमनीयवर्णा मनोवृत्तिः तुष्टिश्च मनस एवेति केचित् तेज उत्साहः विक्रमः पराभिभवार्थं बलवती शरीरचेष्टा। उक्त विधिविपर्ययेण सेव्यमानं मद्यं मदात्ययाय सम्पद्यते ॥६॥

स च त्रिविधो भवति पूर्वो मध्यमोऽन्तिमश्चेति। एषां क्रमेण लक्षणमाह।

बुद्धीत्यादि। बुद्धिरनुभवः स्मृतिरनुभूतार्थानुसन्धानं पानान्ननिद्रारतिवर्द्धनश्चेति पानादिषु रतिरनुराग वर्द्धनः। संपाठः सम्यक् पाठः। गयदासस्तु संपाठ्येति पठित्वा गीतनृत्यवाद्यानि मिलितानि संपाठ्यमुच्यते गीतन्तु केवलमेव व्याचष्टे स्वरो ध्वनिः। प्रोक्तोऽतिरम्य इति मनो विकारित्वेऽपि तदात्वे न दुःखावहत्वात् अतएव सुश्रुतेन मानसविकारेषु हर्षः पठितः ॥७॥

अव्यक्तबुद्धिस्थितिवाग्विचेष्टः सोन्मत्तलीलाकृतिरप्रशान्तः। आलस्यनिद्राभिहतो मुहुश्च मध्येन मत्तः पुरुषो मदेन ॥८॥

गच्छेदगम्यां न गुरूंश्च मन्येत् खादेदभक्ष्याणि च नष्टसंज्ञः। ब्रूयाच्च गुह्यानि हृदि स्थितानि मदे तृतीये पुरुषोऽस्वतन्त्रः ॥९॥

विचेष्टो विरुद्धचेष्टः उन्मत्तस्य लीलाकृतिर्या चेष्टा तया सह वर्त्तत इति सोन्मत्तलीलाकृतिरव्यक्तसमास इत्यर्थः अप्रशान्तः अचञ्चलः ॥८॥

तृतीय मदमाह।

गच्छेदित्यादि। ननु चरके द्वितीयतृतीययोर्मध्ये मदान्तरं पठितं यदाह।

मध्यमं मदमुत्क्रम्य मदमप्राप्य चोत्तरं न किञ्चिदशुभं कुर्युर्नरा राजसतामसाः। कोऽमदं तादृशं गच्छेदुन्मादमिव चापरमिति।

तत् कुतोऽत्र न पठितं उच्यते द्वितीयमदान्ते तृतीयमदस्य पूर्वावस्थैवातिनिन्द्या सुतरां तृतीयो मद इति प्रतिपादनार्थं तन्न पठितं ननु तयोः परमार्थतोऽन्तराल

(*) मध्यम मित्यादि मध्यमम्। द्वितीयं मदं उत्क्रम्य उल्लङ्घ्य अतिक्रम्य उत्तरार्द्धं प्राप्तमचरमिति यावत् उत्तरं तृतीयं मदमप्राप्य अर्थतरुपेण न कदा प्रथमार्द्धं प्राप्तं प्रारब्धवद्भिः राजसतामसाः रजस्तमोगुण भाविताः नराः यदा किञ्चिदपि अशुभं न कुर्वन्ति सर्वथैव शुभं कुर्वन्त्येव।

चतुर्थे तु मदे मूढो भग्नदार्विव निष्क्रियः।
कार्य्याकार्य्यविभागज्ञो मृता दप्यपरो मृतः॥१०॥
को मदं तादृशं गच्छेदुन्मादमिव चापरम्।
बहुदोषमिवा मूढः कान्तारं स्ववशः कृती॥११॥

एवङ्गन्धान्तरमाह यथा कुम्भमीनराश्योर्मध्ये यदा चरति चन्द्रमाः नाडीरेकाद्यकाङ्गानि गमकेऽन्ताख्यां दिश मिति मत चि कुम्भस्य शेषांशो मीनस्य प्रथमांश एतद्द्वयं मध्यग्रन्थे नोच्यते इत्या जैज्जटादयः हरिचन्द्रव्याख्यानमनु सिद्धार व्याख्यालिखितम्। अगम्यान् गुरुदाराहीन् दुष्टाः-नाहींच नष्टसंज्ञ इति संज्ञानमोक्षेन संज्ञाज्ञानं नष्टं यस्य स तथा, गुह्यानि गोप्यानि यस्तनमोमदपरवशः॥९॥

कार्य्याकार्य्यविभागज्ञः कार्य्यमकार्य्यं गुह्यं जानाति कार्य्याकार्य्यविभागज्ञ इति पाठे कार्य्याकार्य्यविभागयोरज्ञ इत्यर्थः। मृतादप्यपरो मृत इति मृतमपेक्ष्यापरोऽयं मृत इव चेतन्याज्ञानचाचर्य्यात्। अधम इति पाठान्तरे मृता-दप्यधम इत्यर्थः तथा विधावस्थायाः स्वयं कृतत्वात्॥१०॥

क इत्यादि कः कृती पण्डितो(५) कृतकृत्यो वा स्ववशोऽपरा-धीन तादृश मुक्तप्रकारेण निन्दितं मदं गच्छेत् प्राप्नुयात् न कश्चिदेवं विधं प्राप्नुयादित्यर्थः किमिवेत्याह बहुदोषमिवा मूढः कान्तारमिति बहुदोषं हिंस्रादियुक्तं कान्तारं(६) दुर-

(५) कृतीति कृती बुधवान् कृतकृत्यः सिद्धार्थः प्रयोजनाभाव रहितः निर्दोष इति यावत्।

(६) दुरध्वमिति। दुरो विकटः मूढो दुर्गमार्गः रहितः दुरवगाहो मूढवर्त्मिनं यत्र कण्टकादिवत् विशेषेण विशेषभाव विकटता

निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम्। आपादयेत् कष्टतमान् विकारान् आपादयेच्चापि शरीरभेदम्॥१२॥

नूनं मद्यानां यदुक्तं चरके मद्यं हृद्यात्मनसमं बलदोष विपर्ययः एवं विदेहेऽपि पठितमिति यथा सत्वमद्योमया-त्मनिष्ठकत्वेन। ननु चरक विदेह वाग्भटादिभिस्तुर्यो न पठित स्तत्कथं सुश्रुते पठित उच्यते चरके या द्वितीय-तृतीययो रन्तराऽवस्था पठिता सैव सुश्रुतेन तृतीयो मद इतित्वा पठितः यस्तु चरके तृतीयः स च सुश्रुते चतुर्थः पठित इत्यविरोधः वस्तुगत्यास्तत्रय एव मदा इत्युपपादितं ननु किं कारणमेतत् त्रैविध्यमिति चेदु-च्यते मद्यं हि वह्नितुल्यं यथाग्निः सुवर्णानामुत्तम-मध्यमाधमानामभिव्यञ्जक स्तथा मद्यमपि प्राणिनां सत्वर-जस्तमो भूयिष्ठानां व्यञ्जकमिति तथाच चरकः।

प्रधानाधममध्यानां रुक्माणां व्यक्तिदर्शकः।
यथाग्निरेवं सत्वादौ मद्यं प्रकृति दर्शकमिति॥

तस्मात् प्रथमद्वितीयतृतीय मदाः सत्वरजस्तमो भूयिष्ठानां क्रमेण भवन्तीत्यर्थः॥ ११।

अविधिमद्यपानस्य विकारान्तरहेतुत्वमाह।

निर्भक्तमित्यादि। अन्वयमर्थः स्निग्धैः खाद्यैरित्या-दिना यदुक्तं तद्विपर्ययेणैव तस्यैतत्फलं पुनरुच्यते।

विशेषण समासः मद्यपः शब्द इति। मद्योपेक्ष वीक्षितः शब्दः स शब्दाः समास विशेषणद्वैरित्यादिना यदुक्तं तद्विपर्ययेण कष्टतम

क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन। व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन चापि। अत्यम्लभक्षावततोदरेण साजीर्णभुक्तेन तथा बलेन। उष्णाभितप्तेनच सेव्यमानं करोतिमद्यं विविधान् विकारान् ॥१३॥

पानात्ययं परमदं पानाजीर्णमथापि वा॥
पानविभ्रममुग्रञ्च तेषां वक्ष्यामिलक्षणम् ॥१४॥

नैवं पूर्व्वं मद्यपानगुणाभिधानार्थमुक्तं इदन्तु कष्टतमव्याधिकर्त्तृत्वाभिधानार्थमिति भेदः यत्परः शब्दः सशब्दार्थ इत्यभिप्रायः कष्टतमान् विकारानिति वक्ष्यमाणपानात्ययादीन्। भेदं विनाशं शरीरस्य: ॥१२॥

अन्नसहितस्यापि मद्यस्य क्रुद्धत्वादिकारणसहितस्य-विकारित्व प्रदर्शनार्थमाह।

क्रुद्धेनेत्यादि। परिक्षतेन क्षीणेन अवततं व्याप्तं विविधान् विकारान् पानात्ययादीन्॥१३॥

तानेव विवृणोति पानात्ययमित्यादि। नन्वयमर्थं आपादयेत् कष्टतमान् विकारानित्यनेनैवोक्तत्वात् पुनरुक्त उच्यते पूर्वेण कष्टतमविकारकारित्वमुक्तं अनेन तु नानाविध विकारित्वमितिभेदः ॥१४॥

हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः ।
विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम् ॥१॥
तृष्णादाहज्वरस्वेदमोहातिसारविभ्रमैः ।
विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ॥१॥
छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः ।
विद्याच्छीतपरीतस्य कफप्रायं मदात्ययं ॥१॥
ज्ञेयस्त्रिदोषजश्चापि सर्वलिङ्गैर्मदात्ययं ॥१५॥
श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च विण्मू-
त्रसक्तिरथतन्द्रिररोचकश्च । लिङ्गं परस्य च

तेषामुत्कृष्टानां लक्षणमाह ।

हिक्केत्यादि । प्रजागरो निद्राविच्छेदः वातप्रायमित्यनेन सर्वे वातादिप्राया मदात्ययास्त्रिदोषजा उद्रिक्तत्वेन व्यपदेश इति चरके दर्शितं यदाह ये विषस्य गुणाः प्रोक्ताः सर्वदोषप्रकोपना इत्यारभ्य यावत् सर्वं मदात्ययं त्रिदोषजमिति एवं चरकसम्वादात् सुश्रुतेऽपि बोध्यं विभ्रमो भ्रमः । हरितं वर्णस्येत्यनेन हरितवर्णतापि लक्षणम् ॥ १५ ॥

व्यापि कर्हत्वं न बुध्यतेऽतो निसृते पर्यवकाशदतः पृथगुक्तमित्यभिप्रायः ।

(७) पानेत्यादि मूलम् । पीयते यत्तत् पानं कर्मण्यनट् पाने मद्य अजीर्णमुपगच्छति सति अर्थात् पानाजीर्णं विकारे एतानि लक्षणानि आध्मानादीनि भवन्तीत्यर्थः । भवन्त्यखिलेति । अखिलेन समस्तभावेन उपलभ्यन्ते ।

मदस्य वदन्ति तज्ज्ञास्तृष्णारुजाशिरसि सन्धिषु चापि भेदः ॥१६॥

आध्मानमुग्रमथ चोद्गिरणं विदाहः पाने जरां समुपगच्छति लक्षणानि ॥१७॥

हृद्गात्रतोदकफसंस्रवकण्ठधूमा मूर्च्छावमिज्वरशिरोरुजन प्रदाहाः। द्वेषः सुरान्नविकृतेष्वपि तेषु तेषु तं पानविभ्रम मुशन्त्यखिलेन धीराः ॥१८॥

परमदमाह।

श्लेष्मोच्छ्रय इत्यादि। श्लेष्मोच्छ्रयश्चात्र न्यासाख्यावादिना शयः शक्तिः सङ्ग असम्यक्तिरिति यावत् तन्मि सन्धापरस्य मदस्येति परमदस्य छन्दोनुरोधात् द्वाभ्यामनिर्देशः ॥१६॥

पानाजीर्णमाह।

आध्मानमित्यादि। उद्गीरणं वान्तिः उद्गारो वा। पाने मद्येऽजीर्णमुपगच्छति अपक्वतामुपगच्छतीति पानाजीर्णविकार इत्यर्थः ॥१७॥

पानविभ्रममाह।

हृदित्यादि। कण्ठधूमः कण्ठाद्धूमनिर्गतवत् पीडा शिरोरुजनं शिरःशूलं सुरान्नविकृतेष्विति सुराविकृतेषु अन्नविकृतेषु भावेषु। तेषु तेष्विति नानाप्रकारेषु सुरामैरेय पिष्टकलङ्कादिषु उशन्ति इच्छन्ति। एते च परमदादयस्त्रयो न चरके पठिताः सन्निपातेऽन्तर्भूतत्वात्

हीनोत्तरौष्ठमतिशीतममन्ददाहं तैलप्रभास्य-
मपि पानहतं त्यजेत्तु । जिह्वौष्ठदन्तमसितन्त्वथ
वापि नीलं पीतञ्च यस्य नयने रुधिरप्रभे वा॥[१८]॥
हिक्काज्वरौ वमथुवेपथुपार्श्वशूलाः कास-

भ्रमयुतेन तु त्रिदोषज मदात्ययात् पृथगेते पठिताः वि-
शत्या पूर्व्वलक्षणवैलक्षण्याभिधानार्थमित्याहुः॥१८॥

असाध्यलक्षणमाह ।

हीनेत्यादि । हीनोत्तरौष्ठं प्रलम्बमानोपरितनौष्ठं
अतिशीतं बहिः अमन्ददाहमन्तरे तैलप्रभास्यं तैलाक्त
मुखमिव ॥१९॥

उपद्रवानाह ।

हिक्केत्यादि । एतैः कष्टसाध्यं भवति न त्वसाध्यं
असाध्यलक्षणेभ्यः पृथक्पाठादिति जेज्जटः । ध्वंसकविक्षे-
पकावपि मद्यविकारौ चरके पठितौ तद्यथा ।

विच्छिन्नमद्यः सहसा योऽतिमद्यं निषेवते ।
ध्वंसो विक्षेपकश्चैव रोगस्तस्यैव जायते ॥
श्लेष्मप्रसेकः कण्ठास्यशोषः शब्दासहिष्णुता ।
तन्द्रा निद्राभियोगश्च ज्ञेयं ध्वंसकलक्षणं ॥
हृत्कण्ठरोधः सम्मोहश्छर्द्दिरङ्गरुजाज्वरः ।
तृष्णाकासशिरःशूलमेतद्विक्षेपलक्षणम् ॥

---

(१८) जिह्वौष्ठदन्तमित्यादिसूत्रम् । यस्य जिह्वौष्ठ दन्तमसितं कृष्ण-
वर्णं अथवा विनील नीलवर्णं नयने च पीते हरिद्रे रुधिर प्रभे वा तं
पानहतं त्यजेदिति पूर्व्वं सम्बन्धः ॥

उभावपि च प्रानं हतं भजन्ते ॥२०॥

अथ दाहनिदानम् ।

त्वचं प्राप्तः सपानोष्मा पित्तरक्ताभिमूर्च्छितः ।
दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजम् ॥१॥
कृत्स्नदेहानुगं रक्तमुद्रिक्तं दहति ध्रुवम् ।

व्याधिभिः क्षीणदेहस्य दुश्चिकित्स्य तमावुभौ इति ॥

मुश्रुतेन विच्छिन्न मद्यः सहसा योऽतिमद्यं निषेवते । तस्य पानात्ययोद्दिष्टाविकाराः सम्भवन्ति इत्यनेन संश्लिष्टौ बोध्यौ न वा चिकित्साभेद स्तयोरुक्तः यत चरक एवोक्तवान । तयोः कर्म्मचिकित्सा च वातिके यन्मदात्यये इति ।२०॥

इति व्याख्यामधुकोषे पानात्ययादि निदानम् ।

मदात्ययेपि दाहो भवत्यतः सप्तप्रकारं दाहमाह तत्र मद्यजमाह ।

त्वचमित्यादि । सपानोष्मा समद्यपानकुपितपित्तोष्मा ॥ समानश्चेति पाठान्तरमहृक्त श्रूयते पानात्यये श्लोकस्यास्य पाठात् । पित्तजोऽप्ययं हेतुभेदात् प्रथक् पठितः ॥१॥

रक्तजमाह ।

कृत्स्नेत्यादि । स उच्यते समीपस्थेनेव वह्निना तप्यते

इति व्याख्यामधुकोष पञ्जिकायां पानात्ययादि निदानम्

स उच्यते तृष्यते वा ताम्राभ स्ताम्रलोचनः।
लोहगन्धाङ्गवदनो वह्निनेवावकीर्य्यते ॥२॥
पित्तज्वरसमः पित्तात् स चाप्यस्य विधिःस्मृत ॥३॥

तृष्णानिरोधादब्धातौ क्षीणेतेज समुद्गतं सबाह्याभ्यन्तरं देहं प्रदहेन्मन्दचेतसः। संशुष्कगलताल्वोष्ठोजिह्वां निस्कृष्य वेपते॥४॥

असृजः पूर्णकोष्ठस्य दाहोन्यः स्यात् सुदुस्तरम् ॥५॥

सन्तृप्यत इति पाठान्तरे धातुपथावत् वेदनामनु भवति ताम्राभ इति पाठे। लोहगन्धाङ्गवदन इति लोहस्येव गन्धोऽङ्गे वदने यस्य स तथा ॥२॥

पित्तजमाह।

पित्तेत्यादि। पित्तज्वरसमः पित्तज्वरलिङ्गयुतः पित्तज्वरेऽरत्यामाशयवृष्टादयोऽधिका इति भेदः स चाप्यस्य विधिरिति पित्तज्वरचिकित्सा ॥३॥

तृष्णानिरोधजमाह।

तृष्णेत्यादि। तेजः समुद्गतं पित्तोष्मा दृढमित्यर्थः। निष्कृष्य निःसार्य्यः ॥४॥

अवगाढशस्त्रप्रहारजनित रक्तपूर्णकोष्ठजमाह।

असृज इत्यादि। तथोक्तं रक्तजेनास्य पौनरुक्तं लघुदेहानुगमिति वचनात् कारणभेदाच्च असृजः पूर्णकोष्ठ-

दाहोक्तादायाधारनिदानं मुणमदा दुर्पेक्षितम्।

उन्माद हेतुर्भयहर्षपूर्वो मनोऽभिघातो विषमाश्च चेष्टा॥२॥

तैरल्पसत्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदुष्य। स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयन्त्याशु नरस्य चेतः॥३॥

सामान्यहेतुमाह।

विरुद्धेत्यादि। दुष्टं गरसंयुक्तमन्नादि प्रधर्षणं धर्षणं प्रधर्षणमित्यस्मात् प्रधर्षणमभिभवः। भयहर्षपूर्वो मनोऽभिघात इति भयहर्षाभ्यां मनसोऽभिभवः भयहर्षपूर्व इति भयं हर्षो वा पूर्वं यस्य स तथा पूर्वशब्दोऽत्र कारणवाची चकारोऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः तेन कामक्रोधलोभादयोऽपि कारणमिति जेज्जटः अन्ये त्वाहुः क्रोधादिभिरपि भयहर्षपूर्वक एव भवतीति तेन तौ निर्दिष्टौ विषमाश्च चेष्टा इति विषमाङ्गत्या सत्त्ववद्विग्रहादयः उन्मादहेतव इत्यपि योज्यम्॥२॥

संप्राप्तिमाह।

तैरित्यादि। तैरुक्तहेतुभिरल्पसत्त्वस्याल्पसत्त्वगुणस्येति चक्रः जेज्जटस्त्वाह सत्त्वं मनस्तस्य चाल्पत्वं रजस्तमोभ्यामावृतत्वेनाल्पज्ञानजनकत्वात्। मला वातादयः बुद्धेर्निवासं हृदयमित्यनेन हृदयस्याश्रयस्य दुष्ट्या तदाश्रितस्यापि दुष्टिर्भवतीति दर्शयति स्रोतांसि मनोवहानीति हृदयाश्रिता दशधमन्यः एतच्च विशेषेण बोध्यं निखिलदेहस्रोतसामेव मनोधिष्ठानत्वे चरके दर्शितत्वात्। अधिष्ठाय व्याप्येत्यर्थः॥३॥

धीविभ्रम सत्वपरिप्लवश्च पर्य्याकुला दृष्टिरधी-
रता च। अबद्धवाक्त्वं हृदयञ्च शून्यं सामान्य-
मुन्मादगदस्य लिङ्गम्। रूक्षाल्पशीतान्नविरेक-
धातुक्षयोपवासैरनिलोऽतिवृद्धः। चिन्तादि दुष्टं
हृदयं प्रदूष्य बुद्धिं स्मृतिञ्चाप्युपहन्ति शीघ्रम्
॥४॥

अस्थानहास्यस्मितनृत्यगीतवागङ्गविक्षेपण रो-
दनानि। पारुष्यकार्श्यारुण वर्णता च जीर्णे
बलञ्चानिलजस्य रूपम् ॥५॥

सामान्यरूपमाह।

धीविभ्रम इत्यादि। एतत् सामान्यं पूर्व्वरूपमिति जेज्जडः। सामान्यरूपं वा इति चक्रः। धीविभ्रमो भ्रान्त ज्ञानत्वं सत्वपरिप्लवो मनसश्चञ्चलत्वं अधीरता कातरत्वं अबद्धवाकत्वम सम्बन्ध वचनत्वं लिङ्ग्यतेऽनेनेति लिङ्गं तेन पूर्व्वरूपं रूपञ्चेति व्याख्यातं विरेक शब्देनात्र वान्तिरप्यभिधीयते विरेचयति देहान्मलं पृथक करोतीति व्युपत्त्या ॥४॥

वातजमाह।

अस्थानहास्येत्यादि। अस्थानेऽविषये हास्योऽस्थानहास्यः एव मस्थानशब्दः स्मितादिषु प्रयोज्यः स्मितमीषद्धासः अङ्गविक्षेपो विरुद्धचेष्टा। जीर्णे बलमिति जीर्णे आहारे व्याधेर्बलं भवति अप्रीतेरिति उष्णैः ॥५॥

अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैश्चितं पित्त-मुदीर्णवेगम्। उन्मादमत्युग्रमनात्मकस्य हृदि स्थितं पूर्व्ववदाशु कुर्य्यात्। अमर्षसंरम्भविनग्नभावाः सन्तर्ज्जनातिद्रवणौष्ण्यरोषाः। प्रच्छायशीतान्नजलाभिलाषाः पीता च भा पित्तकृतस्य लिङ्गम् ॥६॥

संपूरणैर्मन्दविचेष्टितस्य सोष्मा कफो मर्म्मणि संप्रदुष्टः। बुद्धिं स्मृतिञ्चाप्युपहत्य चित्तं प्रमोह-

---

पित्तजमाह अजीर्णेत्यादि। उन्मादमत्युग्रमिति अत्युग्रं तीव्रवेदनं उन्मादयतु ग्रमिति पाठान्तरे उग्रं यथा भवति तथा उन्मादं जनयति कुर्य्यादिति वक्ष्यमाणं लिङ्गमिति शेषः अनात्मकस्य अनात्मवतः पूर्व्ववदिति धिन्वादि दुष्टं हृदयस्य बुद्ध्यादिक मुपहत्येत्यादि संप्राप्त्या कुर्य्यादिति। अत्र मते किं तल्लिङ्गमित्याह अमर्षेत्यादि। अमर्षो असहिष्णुत्वं नतु रोषः तस्य वक्ष्यमाणत्वात् विनग्नभावो नग्नत्वं संरम्भ आरभटी सन्तर्ज्जनं परत्रासनं अतिद्रवणं पलायनं औष्ण्यं गात्रस्य औष्ण्यमिति पाठान्तरे विकृतौष्ठत्वम्। प्रच्छाय शीतान्नजलाभिलाषा इति छायायां शीतयोरन्नजलयोरभिलाषः ॥६॥

कफजमाह।

संपूरणैरित्यादि। मन्दविचेष्टित व्यायामशून्यस्य संपू-

यन् संजनयेद्विकारान् ॥ वाक् चेष्टितं मन्दमरोचकश्च नारी विविक्तप्रियता च निद्रा । छर्द्दिश्च लाला च बलञ्च भुक्ते नखादि शौक्लञ्च कफात्मके स्यात् ॥७॥

यः सन्निपात प्रभवोऽतिघोरः सर्वैः समस्तैः स

रचौ र्भोजनादिभिः कफो दुष्टति सम्बन्धः सोष्मा सपित्तः कफेनापि क्रियमाण उन्मादोऽवश्यं स पित्तेन क्रियते व्याधि महिम्ना यथा मूर्च्छा । अन्येत्वाहुः केवल कफेनापि क्रियते सोष्मपदेन तु द्वन्द्वजोऽपि भवतीति सूच्यते । अन्ये त्वाहु उष्मशब्देन शक्ति रुच्यते तेनोत्कृष्टशक्तिकः कफ इत्यर्थः । मर्म्माणीति हृदये विकार उन्मादं नारी विविक्तप्रियतेति नारी प्रियता विजनप्रियता च बलञ्च भुक्ते इति व्याधेरिति शेषः । आदि शब्देन त्वङ्मूत्रनेत्रादीनां ग्रहणम् ॥७॥

सर्वैः समस्तैरिति सर्वैरितिकृत्वा यत्समस्तैरिति करोति तेनैवं बोधयति वातादयोऽनेकैः स्वनिदानैः कुपिता उन्मादं जनयन्ति नतु प्रत्येक निदानकुपिताः । विरुद्धभैषज्यविधि र्विवर्ज्य इति अयमभिसन्धिः त्रिदोषजे प्रत्येकं वातादि प्रत्यनीकाक्रियानकार्य्या सा च परस्पर विरोधिनी त्रिदोषहरञ्च किञ्चिदेव द्रव्यमामलकादि तच्च नात्र यौगिकं नहि सर्व्वाणि सर्व्वत्र यौगिकानि भवन्तीति वचनात् । ननु यद्येवं तदा सर्व्वएव हि त्रिदोषज विकारा

च हेतुभिस्स्यात्। सर्वाणि रूपाणि विभर्त्ति तादृ-
ग्विरुद्धभैषज्यविधिर्विवर्ज्यः॥८॥

चोरैर्नरेन्द्रपुरुषैररिभिस्तथान्यैर्वित्रासित-
स्य धनबान्धवसंक्षयाद्वा। गाढं क्षते मनसि
च प्रियया रिरंसोर्जायते चोत्कटतरो मनसो
विकारः॥९॥

चित्रं ब्रवीति च मनोनुगतं विसंज्ञो गाय-
त्यथो हसति रोदिति चापि मूढः॥१०॥

रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः श्यावान-
नो विषकृतेऽथ भवेद्विसंज्ञः॥११॥

असाध्या भवेयुरित्यत्र उक्तं तादृगिति कोऽप्ययं संप्राप्ति-
विशेषो रोगविशेषो वा येनायं विरुद्धभैषज्यविधिर्न सह्य
इत्यर्थः। अन्ये त्वाहुः सर्वैः समस्तैर्हेतुभिर्यः कृतः स
एवासाध्यः नत्वल्पहेतुकृत इति॥८॥

शोकादिजमाह।

चौरैरित्यादि। क्षते चोपहते तया रिरंसोः कामुकस्य
अप्राप्तया प्रियया क्षते मनसीति सम्बन्धः॥९॥

चित्रमित्यादि। चित्रं विविधं मनोनुगतं गोप्यमपि
विसंज्ञो विपरीतज्ञानः अतएव मूढः॥१०॥

रक्तेक्षण इत्यादि। हतबलेन्द्रियभा इति हतं बलमि-
न्द्रियाणि भा च यस्य स तथा भा दीप्तिः॥११॥

अवाञ्ची वाप्युदञ्ची वा क्षीणमांसबलो नरः॥
जागरूको ह्यसन्देहमुन्मादेन विनश्यति ॥१२॥

असमर्थवाग्विक्रमवीर्य्यचेष्टो ज्ञानादिविज्ञानबलादिभिर्यः। उन्मादकालोऽनियतश्च यस्य भूतोत्थमुन्मादमुदाहरेत्तम् ॥१३॥

सन्तुष्टः शुचिरतिदिव्यमाल्यगन्धो निस्तन्द्रीरवितथसंस्कृतप्रभाषी। तेजस्वी स्थिरनयनो

असाध्यलक्षणमाह।

अवाञ्चीत्यादि। अवाञ्ची अधोमुखः उदञ्ची ऊर्द्धमुखः अतएवान्ये अवाङ्मुख उदङ्मुखोवेति पठन्ति जागरूकोऽनिद्रः ॥१२॥

भौतिकोन्माद सामान्य लक्षणमाह।

असमर्थ्य वागित्यादि। असमर्था असमृद्धा अनुचिता वा वागादयो यस्य स तथा विक्रमः पराक्रमः वीर्य्यं शक्तिः चेष्टा शारीरीक्रिया ज्ञानादिभिरिति उपलक्षणे तृतीया। ज्ञानं तत्वज्ञानं विज्ञानं शिल्पादिज्ञानं किं वा ज्ञानं शास्त्रं विज्ञानं तदर्थनिश्चयः आदिशब्देन स्मृत्यादीनां ग्रहणं तेषां बलं। अनियत इति न वातादिवदाहारजीर्णादि कालवत् कालनियमः नियत इति पाठे तु वक्ष्यमाणानियततिथ्यादीनां ग्रहणं देवग्रहाः पौर्णमास्यामित्यादि। भूतशब्देनात्र सर्व्व एव वक्ष्यमाणा देवादयो गृह्यन्ते ॥१३॥

अतिदिव्यमाल्य इति अतिदिव्यमाल्यस्येव गन्धः यस्य

वर प्रदाता ब्रह्मण्यो भवति नरः सदेवजुष्टः॥
संस्वेदीहिजगुरुदेवदोषवक्ताजिह्माक्षोविगतभयो
विमार्गदृष्टिः। सन्तुष्टो न भवति चान्नपानजातै
दुष्टात्मा भवति सदेवग्रहजुष्टः॥१४॥

हृष्टात्मापुलिनवनान्तरोपसेवीस्वाचारः प्रिय-
परिगीतगन्धमाल्यः। नृत्यन्वै प्रहसति चारु
चाल्पशब्दं गन्धर्वग्रहपरिपिडितो मनुष्यः१५॥

ताम्राक्षः प्रियतनुरक्तवस्त्रधारी गम्भीरो द्रुत-
गतिरल्पवाक् सहिष्णुः। तेजस्वी वदति च किं
ददामि कस्मै यो जक्षग्रहपरिपीड़ितो मनुष्यः
॥१६॥

तथा निखन्द्रीरनिद्रः। अवितथं सत्यं विदेहेऽपि निःसत्वः
सत्वसंस्कृतभाविथमिति पठित ब्रह्मण्यो ब्राह्मणानुरक्तः
देवभूतजुष्टो देवग्रहपीड़ितः। देवभूतग्रहयोग गयमाहका
इयोऽपि ग्राह्याः विदेहेपि पच्यते कोपनः स्वस्य सर्वाङ्गो
नानाभेयाविज्ञानजः। निद्राजु कम्पनो मुक्तो गयमाहमि-
दर्शित इति।१४॥

पुलिनं तोयोत्थिततटं वनान्तरं मध्यं विशेषो वा स्वाचा-
रोऽनिन्दिताचारः प्रियेत्यादि प्रियाणि परितः सर्वतः
गीतगन्धमाल्यानि यस्य स तथा। नृत्यन्नित्यादि चारु-
त्वम् अल्पशब्दं यथा भवति तथा प्रहसतीति योज्यम्॥१५॥

प्रेतानां सदिशति संस्तरेषु पिण्डान् शान्तात्मा जलमपि चाप सव्यवस्त्रः। मांसेपसुस्तिलगुडपायसाभिकाम स्तद्भक्तो भवति पितृग्रहाभिजुष्टः॥१७॥

यस्तूर्द्ध्वं प्रसरतिसर्पवत् कदाचित् सृक्कण्यौ विलिहति जिह्वया तथैव। क्रोधालुर्गुडमधुदुग्धपायसेप्सु र्ज्ञातव्यो भवति भुजङ्गमेन जुष्टः॥१८॥

मांसासृग्विविधसुराविकारलिप्सु र्निर्लज्जो भृशमतिनिष्ठुरोऽतिसूरः। क्रोधाल र्विपुलबलो

प्रियेत्यादि प्रियं शोभनं तनु सूक्ष्मं वस्त्रं धर्तुं शीलं यस्य स तथा ॥१६॥

प्रेतानां पितॄणां सम्बन्धिविवक्षितत्वात् न चतुर्थीदिशति ददाति संस्तरेषु कुशपत्ररचिता स्तरेषु अपसव्य वस्त्रः वामोत्तरीयः।॰मांसे पश्चरित्यादि। एतदभिधानप्रयोजनं यस्मिन् यसंज्ञा भवति तस्य तेनैव बलि र्दातव्यः एव मन्यत्रापि द्रष्टव्यः तद्भक्तः पितृभक्तः॥१७॥

प्रसरतिसर्पवदिति उरसा गच्छति सृक्कण्यौ ओष्ठप्रान्तौ सृक्कणीशब्द ईकारान्तोपर्यन्तोऽस्त्यत्र॥१८॥

निशाविहारी निशायामेव भ्रमणशीलः। राक्षसग्रहेण ग्रस्त राक्षसादयोपि बोध्याः। तथा राक्षसानन्तरं

निशाविहारी शौचद्विड् भवति सराक्षसैर्गृहीतः ॥१९॥

उद्धस्तः कृशपरुषोऽचिरप्रलापी दुर्गन्धो भृशमशुचि स्तथाति लोलः। बह्वाशीविजनवनान्तरोपसेवी व्याचेष्टन् भ्रमति रुदन् पिशाचजुष्टः॥ ॥२०॥

स्थूलाक्षो द्रुतमटनः सफेनलेही निद्रालुःप-

विदेहेऽपि पठ्यते देवविप्रगुरुद्वेषी वेदवेदाङ्गवित् शुचिः आत्मपीड़ाकरो हासी ब्रह्मराक्षससेवित इति ॥१९॥

उद्धस्त उद्धाङ्गः। ऊद्धस्त इति पाठान्तरं न्याय्यं विदेहेऽपि दिगम्बरपाठात् परुषो रूक्षः लोलः सर्व्वस्मिन् अन्नपाने सलोभः। लोलुरिति पाठान्तरे स एवार्थः। व्याचेष्टन्निति विरुद्धमाचेष्टन। त्रिविधं हिंसाक्रीड़ापूजार्थं ग्रहा गृह्णन्ति। यदुक्तं अशुचिं भिन्नमर्यादं क्षतं वा यदि वाक्षतम्। हिंस्युः हिंसाविहारार्थं सत्कारार्थमथापि चेति ॥२०॥

तत्र हिंसार्थिग्रहीतो असाध्यो भवति तस्य श्लोकार्द्धेन लक्षणमाह।

स्थूलाक्ष इत्यादि। स्थूलाक्षो विकृतनेत्र इति जेज्जटः द्रुतमटनो द्रुतगतिः अतएव त्वरितगतिरिति जेज्जटपठितम्। यश्चेत्यादि पर्व्वतादिपतितं स्वस्मिन् यो म्रियते सोऽप्यसाध्यः। नगो वृक्षः सर्व्व एवोन्मादी त्रयोदशे

ततिकम्पते च यो हि। मद्यादिर्द्विरदनगादि विच्युतः स्यात् सोऽसाध्यो भवति तथा तयो-दग्धाब्दे ॥२१॥

देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि।
गन्धर्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ॥
पितरः कृष्णक्षये हिंस्युः पञ्चम्यामपि चोरगाः।
रक्षांसि रात्रौ पिशाचाश्चतुर्दश्यां विशन्ति हि ॥२२॥

दर्पणादीन् यथा छायाशीतोष्णं प्राणिनो यथा।

ब्दे इत्यादि शीतोष्णऽसाध्यः। विदेहेऽभिकमपामा-भालक्षणं पठ्यते। मेदप्रहतः क्षतजः सास्रुतः स्नुतमा-षिकः। यथाजनः पूतिगर्भोऽलसागति दुर्विध इत्यादि॥२१॥

देवादीनां ग्रहणकालमाह।

देवग्रहा इत्यादि। पौर्णमास्यां पूर्णिमायां कृष्णक्षयेऽ-मावास्यायां प्रायो ग्रहणादन्यत्रापि तिथ्यभिधानप्रयोजनं लक्षणार्थं तत्तिथौ बलिदानार्थञ्च ॥२२॥

ननु यदि ग्रहाविष्टानां पुंसामुन्मादः स्यात् तदा-विशन्तो ग्रहाः कुतो नोपलभ्यन्ते अत आह दर्पणादि-मित्यादि अदर्शनादिदर्शनायोग्यत्वान्न दृश्यन्त इत्यर्थः आदि शब्देन प्रकारवाचिना जलतैलादीनां ग्रहणं छायाप्रभृतिः शीतोष्णमिति कर्तृरूपं प्राणिन इति कर्मपदं समनि-

रोमहर्षः प्रलापश्च पार्श्वपृष्ठशिरोग्रहः ।
खाञ्ज्यपाङ्गुल्यकुब्जत्वं शोषोऽङ्गानामनिद्रिता।
गर्भशुक्ररजोनाशः स्पन्दनं गात्रसुप्तता ।
शिरोनासाक्षिजत्रूणां ग्रीवायाश्चापि हुण्डनं॥
भेदस्तोदार्त्तिराक्षेपो मुहुश्चायास एव च ।
एवं विधानि रूपाणि करोति कुपितोऽनिलः।
हेतुस्थानविशेषाच्च भवेद्रोगविशेषकृत् ॥४॥

करोति विविधान् व्याधीनिति यदुक्तं तद्व्याकरोति संकोच इत्यादि खाञ्ज्यं पर्व्वणामेव पाङ्गुल्यं पङ्गुता शोषोऽङ्गानामिति बाहुमुखादीनां अनिद्रतेत्यनेन अल्पनिद्रतापि बोद्धव्येत्याह। गर्भशुक्ररजोनाश इति गर्भाशयानां शय्यायां वाताधिष्ठितत्वेन गर्भाद्युपघातमिति जेज्जड़ः। गर्भादिविकृतिरप्यत्र द्रष्टव्या। स्पन्दनं कम्पनं हुण्डनं शिरःप्रभृतीनामन्तःप्रवेशो वक्रत्वं वा धातूनामनेकार्थत्वात् अन्ये त्वाहुः शिरोहुण्डनं केशभूमिस्फुटनं शङ्खललाटभेदश्च नासाहुण्डनं घ्राणनाशः अक्षिहुण्डनमक्षिव्युदासः जत्रुहुण्डनं वक्षउपरोधः ग्रीवाहुण्डनं ग्रीवः स्तयः भेद इति ओष्ठदन्तकण्ठादीनां तोदः शूलमर्त्तिः पीडा सा च पादपार्श्वश्रोण्यादिवक्षसामिति जेज्जड़ः। आक्षेप आक्षेपकादिषु वक्ष्यमाणः आयासः श्रमः। हेत्वित्यादि हेतुविशेष आवरणादि यथा वक्ष्यति मन्यास्तम्भकारी।

तत्रकोष्ठाश्रिते दुष्टे निग्रहो मूत्रवर्च्चसोः ।
ब्रध्नहृद्रोग गुल्मार्शः पार्श्वशूलञ्च मारुते ॥
सर्वाङ्गकुपिते वाते गात्रस्फुरणभञ्जनम् ।
वेदनाभिः परीतश्च स्फुटन्तीवास्य सन्धयः॥५॥
ग्रहोविण्मूत्र वातानां शूलाध्मानाश्मशर्कराः।
जङ्घोरुत्रिकपात् पृष्ठरोगशोषा गुदेस्थिते ॥१॥
रुक्पार्श्वोदर हृन्नाभे स्तृष्णोद्गारविसूचिकाः।
कासः कण्ठास्यशोषश्च श्वासश्चामाशयस्थिते॥२॥
पक्वाशयस्थोऽन्त्रकूजं शूलाटोपौ करोति च ।
कृच्छ्रमूत्र पुरीषत्व मानाहं त्रिकवेदनां ॥
श्रोत्रादिष्विन्द्रियवधं कुर्य्याद्दुष्ट समीरणः३॥६॥

स्थान विशेषः कोष्ठादि। यथा पक्वाशयस्थोऽन्त्रकूजमित्यादि ॥४॥

एतदेव विवृणोति तत्रेत्यादि । कोष्ठशब्दे ना विशेषात् सर्वं आमाशया द्युच्यन्ते आमाशयादि गतन्तु पृथगपि वक्ष्यति निग्रहोऽप्रवृत्तिः॥५॥

अश्म अश्मरीरोगोक्ता इति। गुद इत्यत्र पदे पक्वाशय इत्यर्थः नतु गुदमात्रे तथा सति अश्मरी कर्त्तृत्वानुपपत्तेः। ननु पक्वाशयस्थ इति पुनरुक्तं गुदेस्थित इत्यनेनैवोक्तत्वात् उच्यतो गुदेस्थित इति दृढवत्तस्य लक्षणं पक्वाशयस्थ इति मृदुतस्य उभयलिङ्गोपन्यासन्तु सकललिङ्गप्रदर्शनार्थं इत्यविरोधः ॥६॥

त्वग्रूक्षा स्फुटिता सुप्ता कृशा कृष्णा च तुद्यते।
आतन्यते सरागा च पर्वरुक् त्वग्गतेऽनिले॥७॥
रुजास्तीव्राः ससन्तापा वैवर्ण्यं कृशतारुचिः।
गात्रे चारूंषि भुक्तस्य स्तम्भश्चासृग्गतेऽनिले॥८॥
गुर्वङ्गं तुद्यतेऽत्यर्थं दण्डमुष्टिहतं यथा।
सरुक् श्रमितमत्यर्थं मांसमेदोगतेऽनिले॥९॥

आतन्यते विस्तार्यत इव त्वग्गन्ते इति उपधातुरूपां त्वचं प्राप्ते। चन्द्रिकाकारस्तु त्वक्शब्देन रसमाह तेन रसगत इत्यर्थः हृदयस्थस्य रसस्यामाशयसामीप्यात् आमाशयगतवातलक्षणेनैव तदधिगतेः रसगतस्यानभिधानमिति कार्त्तिकः॥७॥

अरूंषि व्रणाः भुक्तस्य स्तम्भः भुक्तवतो गात्रस्य स्तम्भः अन्नपर्णेन रक्तस्य वृद्धेः अन्ये त्वसृग्गत वातलक्षणं न पठन्ति वातरक्तेन सहाभेदात् तस्माच्च दुष्टो वायुरक्तेनावृतः कुप्यति वातरक्ते स्वकारणादुभावपि हस्ताग्रादि गमन कुपितौ विशिष्टसंप्राप्त्या हस्तपादगतावेव वातरक्ताख्यं विकारं जनयत इति॥८॥

श्रमितं श्रान्तं निःसहमित्यर्थः मांसमेदोगत वायो-रेकलिङ्गत्वं[२] अदुरान्तरेण प्रत्यासत्तेराश्रयप्रभावात् एवं मज्जास्थि कुपिते वाच्यम्॥९॥

---

(२) अदुरान्तरेणेत्यादि। अदूरदेश व्यवधानेन प्रत्यासत्तेः नैकस्य सम्बन्धस्य यः अभेदः तस्य प्रभावात् सामर्थ्यादिति तथाच मांसमेद-

[1]क्षिप्रं मुञ्चति बध्नाति शुक्रं गर्भमथापि वा ।
विकृतिं जनयेच्चापि शुक्रस्थः कुपितोऽनिलः ॥१०॥
कुर्य्याच्छिरागतः शूलं शिराकुञ्चन पूरणं ।
सवाह्याभ्यन्तरायामं खल्लीं कौब्जं तथापि वा ॥११॥
सर्वाङ्गैकाङ्गरोगांश्च कुर्य्यात् स्नायुगतोऽनिलः ॥१॥
हन्ति सन्धिगतः सन्धीन् शूलाटोपौ करोति च ॥२॥
प्राणे पित्तावृते छर्दिर्दाहश्चैवोपजायते ॥१॥
दौर्बल्यं सदनं तन्द्रा वैरस्यञ्च कफावृते ॥१॥

गर्भमिति दुष्टशुक्रारब्धत्वाद्गर्भस्य विकृतिमिति गर्भस्य शुक्रस्य च ॥१०॥

आकुञ्चनं सङ्कोचः पूरणं स्थूलत्वं यदुक्तमन्यत्र स्तम्भ-सन्धयो ह्रस्वो वा शिरागते शिरागते इति खल्लीं वक्ष्य-माणाम् ॥११॥

हन्ति सन्धीनिति विश्लेष स्तम्भादिकं करोति । पित्तक-फावृतानां प्राणादीनां षड्विंशके लिङ्गान्याह प्राण इ-त्यादि गात्रहर्षो रोमाञ्चः दण्डकोदण्डवत् स्तम्भः परस्प-रञ्च प्राणादीनामावरणादीनि विंशति र्भवति यदुक्तं चरके मारुतानां हि पञ्चानामन्योन्या वरणं स्मृतमिति एषाञ्च

मत वातयोराश्रयीभूत मांसमेदसोर दूरान्तरत्वात् तद्वायोरप्येक लिङ्ग-त्वं बोध्यम् ।

(१) क्षिप्रं मुञ्चतीत्यादिमूलम् । शुक्रस्थः कुपितोऽनिलः क्षिप्रं शुक्रं-गर्भञ्च मुञ्चति स्रावयति तथा बध्नाति रोधयति अथवा शुक्रस्य च गर्भस्य

उदाने पित्तयुक्ते तु दाहो मूर्च्छा भ्रमः क्लमः ॥१॥
अस्वेदहर्षौ मन्दोऽग्निः शीतता च कफावृते ॥१॥
स्वेददाहौष्ण्यमूर्च्छाः स्युः समाने पित्तसंवृते ॥१॥
कफेन सङ्गो विण्मूत्रे गात्रहर्षश्च जायते ॥१॥
अपाने पित्तयुक्ते तु दाहौष्ण्यं रक्तमूत्रता ॥१॥
अधःकाये गुरुत्वञ्च शीतता च कफावृते ॥१॥
व्याने पित्तावृते दाहो गात्रविक्षेपणं क्लमः ॥१॥
स्तम्भनोदण्डकश्चापि शूलशोथौ कफावृते ॥*॥१२॥
यदा तु धमनीः सर्वाः कुपितोऽभ्येति मारुतः ।
तदाक्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः ।
मुहुर्मुहुश्चाक्षेपणादाक्षेपक इति स्मृतः ॥१३॥

तथा च चरके एव द्रष्टव्यं विदेहे चैक एव वायुः स्थानकर्म्मभेदात् पञ्चधैवोच्यते इत्याहुः संसर्गिद्रव्यत्वेनैकाश्रये जलवत् पृथगवस्थानानुपपत्तेः ईशानो यथैको देवदत्तः स्थानभेदात् पाचकः स्रोतः प्रस्थः कर्म्मभेदात् कुम्भकारो मालाकार इत्युच्यते तथा वायुरपीति ॥१॥१२॥

आक्षेपकस्य सामान्यलक्षणमाह ॥

यदात्वित्यादि । सर्व्वा इति ऊर्द्ध्वाधस्तिर्य्यग्गताः आक्षिपति देहं इतस्ततः पुनः पुनः गात्रं चालयति मुहुश्चर इति हेतुगर्भविशेषणं बहिश्चर इति पाठान्तरे कोष्ठाद्बहिः शाखागत चरन् आक्षेपकं करोतीत्यर्थः ॥१३॥

च विकृतिं जनयेदित्यन्वयः । संसर्गं द्रव्यत्वेन मिलित संयोगत्वेन द्रव्यैः

[५]क्रुद्धः स्वैः कोपनैर्वायुः स्थानादूर्द्धं प्रपद्यते।
पीड़यन् हृदयं गत्वा शिरःशङ्खौ च पीड़यन्॥
धनुर्वन्नमयेद्गात्राण्याक्षिपेन्मोहयेत्तदा।
सकृच्छ्रादुच्छ्वसेच्चापि स्तब्धाक्षोऽथ निमीलकः॥
कपोतइव कूजेच्च निःसङ्गः सोपतन्त्रकः॥१॥
[६]दृष्टिं संस्तभ्य संज्ञाञ्च हत्वा कण्ठेन कूजति।
हृदि मुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः।
वायुना दारुणं प्राहुरेके तदपतानकम्॥१४॥

[४]अस्यैवावस्थाविशेषोऽपतन्त्रकोऽपतानकश्चाह क्रुद्ध इत्यारभ्य एके तदपतानकमित्यन्तेन स्वैःकोपनैरित्यनेन रुक्षादि कुपितः स्वतन्त्रः गत्यावरणाकुपितः इति दर्शयति। निमीलके। निमीलिताक्षः स्तब्धाक्षो निमीलिताक्षो वा भवतीत्यर्थः आक्षेपक चतुर्विधा भवति दण्डापतानकोऽभ्यन्तरायामो बहिरायामोऽभिघातजश्चेति हृढ़बलेन। यद्यपि आक्षेपकात् पूर्व्वमन्तरायाम बहिरायामौ पठितौ तथाप्याक्षेपकविशेषावेतौ मन्तव्यौ भुयुतदर्शनात्॥१४॥

(४) अस्यैवेत्यादि। अस्य चतुर्विधाक्षेपकस्यैवावस्था विशेषौ अपतन्त्र कापतानकौ नतु ततः पृथगिति भावः।

(५) क्रुद्धःस्वैरित्यादि मूलं। स्वैः कुपनैः रुक्षादिभिः क्रुद्ध कुपितः सन् सोवायुः स्थानात् स्वस्थानात् ऊर्द्धं प्रपद्यते गच्छति तथा हृदयं गत्वा तत् पीड़यन् शिरः शङ्खौ च पीड़यन् अथात् अस्य गात्राणि धनुर्वन्नमयेत् एवं आक्षिपेत चालयेत् तथायं मोहयेत् सकृच्छ्रात उच्छ्वसेत निमी-

कफान्वितो भृशं वायु स्तास्वेव यदि तिष्ठति।
दण्डवत् स्तम्भयेद्देहं स तु दण्डापतानकः॥१५॥
धनुस्तुल्यं नमेद्यस्तु स धनुस्तम्भ संज्ञकः॥१६॥
अङ्गुलीगुल्फजठरहृद्वक्षोगल संश्रितः।
स्नायुः प्रतानमनिलो यदाक्षिपति वेगवान्॥
विष्टब्धाक्षः स्तब्धहनुर्भग्नपार्श्वः कफं वमन्।
अभ्यन्तरं धनुरिव यदा नमति मानवम्।
तदास्याभ्यन्तरायामं कुरुते मारुतो वली॥१॥

एषां लक्षणमाह।

कफान्वित इत्यादि। भृशं कफान्वित इत्यनेन पित्तमपि नवार्य्यत इत्याहुः चरके त्वस्यासाध्यत्वं केवलं वातजत्वेन द्रष्टव्यं यदाह पाणिपादशिरःपृष्ठश्रोणीस्तभ्नाति मारुतः। दण्डवत् स्तब्धगात्रस्य दण्डकः सोऽनुपक्रमः इति तास्विति सर्व्वधमनीषु॥१५॥

अन्तरायाम वहिरायामयोः साधारणं रूपमाह।

लकः निमीलिताक्षः स्तब्धाक्षोवाभवति निःसंज्ञः सन् कपोतइव कूजेत् सोऽपतन्त्रक इत्यर्थः।

(५) दृष्टिं संस्तभ्य त्यादि। यो वायु दृष्टिं संस्तभ्य संज्ञाञ्चहत्वा कण्ठेन कूजति यस्मिन् हृदिमुक्ते स्वास्थं यस्मिन् समावे तिष्ठतीति स्वस्थास्वस्थभावकं पुनर्वायुना हतेयति मोहं नरोयाति प्राप्नोति तं दारुण मपतानकं प्राहुरित्यन्वयः। धनुस्तुल्यं नमेदिति। नमेत नमयेत् अन्तर्भूत ण्यर्थत्वात्॥

बाह्यस्नायुप्रतानस्थो बाह्यायामं करोति च ।
तमसाध्यं बुधाः प्राहुर्वक्षःकट्यूरुभञ्जनम् ॥१७॥
कफपित्तान्वितो वायुर्वायुरेव च केवलः ।
कुर्य्यादाक्षेपकं त्वन्यं चतुर्थमभिघातजम् ॥१८॥

धनुस्तुल्यं नमेद्यस्तु स धनुस्तम्भसंज्ञक इति ॥१६।

वक्षोबाह्वह्यान्तरं हृदयं तदभ्यन्तरं हनुमूलं स्नायुप्रतानं लतावदनेकप्ररोहं स्नायुजालं स्नायुरित्युपलक्षणम् तेन शिराकण्डरयोरपि ग्रहणं यदुक्तं तन्त्रान्तरे महाहेतुर्बलीवायुः शिराः सस्नायुकण्डराः । मन्याश्रिता बाह्याः संशोष्यायामयेद्दहिरित्यादि अभ्यन्तरायाम् क्रोडे नतं बाह्यायामं पृष्ठेन तं अन्तरायाम बहिरायामाभ्यां तन्त्रान्तरोक्त कुब्जस्यावरोधः यदुक्तं हृदयं यदि वा पृष्ठमुन्नतं क्रमशः स रुक । क्रुद्धो वायुर्यदा कुर्य्यात् तदा तं कुब्जमादिशेत् ॥१७॥

उक्तानामाक्षेपकादीनां कफपित्तानुबन्धमाह ।

(०)कफपित्तान्वित इत्यादि । एतच्च दण्डापतानकलक्षणमेव जेज्जड़ेन व्याख्यातं पित्तकफानुबन्धश्चात्र शैत्यशोथगुरुत्व.नित्यादिना उक्त लक्षण एव बोध्यः॥ चतुर्थमभिघातजमिति दण्डापतानकादि त्रितयापेक्ष चतुर्थत्वं अभिघातजं दण्डाद्यभिघातकुपितवातजं अस्य लक्षणं यदा तु धमनीः सर्व्वाः इत्यनेनोक्त सामान्यंलक्षणं द्रष्टव्यम् ॥१८॥

---

(०) कफपित्तोन्वितेत्यादि । कफ.न्वितः पित्तान्वितश्चापि वायुर्वायुरेव च

गर्भपातनिमित्तश्च शोणितातिस्रवाच्च यः ।
अभिघातनिमित्तश्च न सिद्ध्यत्यपतानकः ॥१९॥
गृहीत्वार्द्धं तनोर्वायुः शिराः स्नायु र्विशोष्य च ।
पक्षमन्यतमं हन्ति सन्धिबन्धान् विमोक्षयन् ॥
कृत्स्नोऽर्द्धकाय स्तस्य स्यादकर्मण्यो विचेतनः ।
एकाङ्गरोगं तं केचिदन्ये पक्षवधं विदुः ॥
सर्व्वाङ्गरोग स्तद्वच्च सर्वकायाश्रितेऽनिले ॥२०॥

असाध्यत्वमाह ।

[८] गर्भपातेत्यादि । गदाधरस्त्वाह कफपित्तान्वित इत्यादिनानिमित्तभेदेनाक्षेपका चतुर्द्धा इति तद्यथा एकः कफान्वितेन वा तेन द्वितीयः पित्तान्वितेन तृतीयः केवलेन चतुर्थोऽभिघातेनेति अत्र पक्षे गर्भपातशोणितातिस्रावजौ केवलं वातेन ग्राह्यौ तेषाञ्च मुक्तमुक्तराक्षेपणं बोध्यं आक्षेपकविशेषात् ।१९।

पक्षवधमाह ।

गृहीत्वेति अर्द्धमिति अर्द्ध मर्य्यादया अर्द्ध नारीश्वरवत् पक्षं वाहुकक्षपार्श्वादिभागं अन्यतरमिति वामं दक्षिणं वा सन्धिबन्धान कफसहित स्नायुभिर्ष्टतान् मोक्षयन्निति गदाधरः अतएव शिरास्नायुविशोष्येत्युक्तं अर्द्ध-

---

केवल आक्षेपकं कुर्य्यात् अन्यं अभिघातजं चतुर्थं विद्यादिति शेषः।

(८) गर्भपातेत्यादि । गर्भपात निमित्तश्च शोणितातिस्रवाच्च अभिघात निमित्तश्च यश्चोक्षेपकः सन सिद्धति तथा अपतानकश्च ।

दाहसन्तापमूर्च्छाः स्युर्वायौ पित्तसमन्विते ॥१॥
शैत्यशोथ गुरुत्वानि तस्मिन्नेव कफान्विते ॥१॥
शुद्धवातहतं पक्षं कृच्छ्रं साध्यतमं विदुः ।
साध्यमन्ये न संयुक्तमसाध्यं क्षयहेतुकम् ॥१॥२१॥
(८) उच्चैर्व्याहरतोऽर्थं खादतः कठिनानि वा ।
हसतो जृम्भतो वापि भारादिषम शायिनः ॥
शिरोनासौष्ठचिबुकललाटेक्षणसन्धिगः ।
अर्दयत्यनिलो वक्त्रमर्दितं जनयत्यतः ।
वक्री भवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते ॥

कायेत्युक्तेपि कृत्स्नग्रहणं युगपत् सर्व्वाङ्गव्याप्त्यर्थं चक-
र्म्मणश्च ईषच्चेष्टाक्षमः विचेतनोऽचेतनः ईषत् स्पर्शादिज्ञान
वानित्यर्थः । तद्यथेत्यनेन शिरास्नायुविशोष्य चेत्यादि संप्रा-
प्तिलक्षणस्याभिदिशति ।२०।

तस्यैव साध्यासाध्यज्ञानार्थमाह ।

दाहेत्यादि । एतच्च लक्षणमन्यत्रापि वातरोगे द्रष्ट-
व्यं अतएव सामान्येन वायाविति कृतवान् शुद्धः केवलो-
ऽन्येनेति कफेन पित्तेन वा क्षयहेतुकमिति धातुक्षयकुपित
शुद्धवातजमिति ॥२१॥

(८) उच्चैरित्यादि । उच्चैर्व्याहरत् उच्चैर्वाक्यं प्रयुञ्जतः अत्यर्थं
कठिनानि खण्डलड्डुकादीनि खादतः भुञ्जानस्य हसतो हास्यं प्रकु-
र्व्वतो जृम्भतो जृम्भमानस्यापि भारात् गौरवात् तथा विषमशायिनः
विषमशयानस्य जनस्य शिरोवक्त्र मर्द्दयति पीडयति अतः अर्द्दितं
जनयति । येन नरस्य वक्त्रार्द्धं वक्रीभवति ग्रीवाच्चापि अपवर्त्तते

शिरश्चलति वाक्सङ्गो नेत्रादीनाञ्च वैकृतम्।
ग्रीवाचिबुकदन्तानां यस्मिन् पार्श्वे च वेदना।
तमर्दितमिति प्राहुर्व्याधिं व्याधिविचक्षणाः॥२२॥
क्षीणस्यानिमिषाक्षस्य प्रसक्तां व्यक्तभाषिणः।
न सिद्ध्यत्यर्दितं गाढं त्रिवर्षं वेपनस्य च॥२३॥

अर्दयति पीडयति अपवर्त्तते वक्री भवति चलति कम्पते वाक्सङ्गोऽनिर्गमो वचनस्य। आदिशब्देन भ्रूगण्डादीनां ग्रहणं वैकृतं वेदनास्फुरणवक्रत्वादिकम्। ग्रीवेत्यादि यस्मिन् पार्श्वेऽर्दितं तस्मिन् ग्रीवादीनां वेदनेति योज्यम्। तन्त्रान्तरे तु मुखार्द्धवत् शरीरार्द्धव्यापकोऽप्यर्दितः पठितः। यदाह दृढबलः अर्द्धे तस्मिन् मुखार्द्धे वा केवले वा तदर्दितमिति। ननु यद्येवं तदा अर्दितार्द्धाङ्गवातयोः को भेद उच्यते वेगित्वेनार्दिते कदाचिद्वेदना भवति अर्द्धाङ्गवाते तु सर्व्वदैवेति भेदः अथवा यथोक्तः सर्व्वलिङ्गोऽर्दित स्तद्विपरीतस्त्वर्द्धाङ्गवात इत्याहुः। सुश्रुतेन तु मुखमात्र एवार्दितः पठितः अर्द्धशरीरस्यार्द्धाङ्गवातेन लब्धत्वात् स एवात्र माधवेन लिखितः॥२२॥

तस्याऽसाध्यलक्षणमाह॥

क्षीणस्येत्यादि। अनिमिषाक्षस्य निमिषासमर्थचक्षुषः

वक्री भवति शिरश्चलति कम्पते वाक् सङ्गो वचनस्यानिर्गमः नेत्रादीनां वैकृतमपि यस्मिन् पार्श्वेऽर्दितं तस्मिन् ग्रीवादीनां वेदना तं व्याधिविशारदाः अर्दितमिति प्राहुः।

(१०)गते वेगे भवेत् स्वास्थ्यं सर्वेष्वाक्षेपकादिषु॥२४॥
जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः।
कुपितोऽनुमूलस्थः स्रंसयित्वा निलोहनु॥
करोति विवृतास्यत्व मथवासं वृतास्यताम्।
हनुग्रहः स तेन स्यात् कृच्छ्राच्चर्वणभाषणम्॥१॥
दिवास्वप्नासमस्थान विवृतोर्द्ध निरीक्षणैः।
मन्यास्तम्भं प्रकुरुते स एव श्लेष्मणावृतः॥२५॥
वाग्वाहिनीशिरासंस्थो जिह्वां स्तम्भयतेऽनिलः।

प्रसक्ताव्यक्तभाषिण इति प्रसक्तं प्रकर्षेण लग्नं अव्यक्तं पीडितवर्णं पदं भाषितुं शीलं यस्य स तथा। अन्ये तु प्रसक्तं निरन्तरमाहुः तत्र चरके सकला मव्यक्ति चास्यवागिति वचनात् त्रिवर्षमिति अतीत वर्षत्रयस्य अथवा त्रयाणां मुखनासाचक्षुषां वर्षणां श्रवणं यत्र तत्तथेत्याहुः॥२३॥

आक्षेपकादीनामदिर्तान्तानां वेगित्वमाह।

गत इत्यादि। स्वास्थ्यं पीडाल्पत्वं भारापगमने सुखित्व व्यपदेशवत्॥२४॥

हनुमूलस्थः कपोलमूलस्थः हनुस्रंसयित्वाधःकृत्वा विवृतास्यत्वं संवृतास्यत्वञ्च वायोरनियतकारित्वात्। स एवेति वातः॥२५॥

(१०) गतेवेगइत्यादि। सर्वेषु आक्षेपकादिषु रोगेषु वेगे गते सति स्वास्थ्यं पीड़ाल्पत्वं भवेत् अक्षीद्रोगिण इति।

जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता॥२६॥
रक्तमाश्रित्य पवनः कुर्य्यान्मूर्द्धधराः शिराः।
रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्यात्शिरो
ग्रहः॥२७॥
११स्फिक्पूर्वा कटिपृष्ठोरुजानुजङ्घापदं क्रमात्।

जिह्वास्तम्भमाह।

वाग्वाहिनीत्यादि। वाग्वाहिनीशिरासंस्थ इति वाग्वा हिनी या शिरा तत्र संस्थ इति योज्यं समासपक्षे पुंवत् कर्मधारयजातीयदेशीयेष्वित्यनेन पुंवद्भावः प्राप्तः। अन्न-पानवाक्येष्वनीशतेति। अन्नपानाभ्यवहारवचनेष्वसामर्थ्यम्॥२६॥

शिराग्रहमाह।

रक्तमित्यादि। मूर्द्धधरा इति ग्रीवागता स्तासां रूक्षत्वं वेदनावत्त्वं कृष्णत्वं कुर्य्यात् सोऽसाध्य इति स्वरूपेणैव कारयेत् शिरोग्रह इति पाठान्तरेपि शिरोधारकशिरा दुष्ट्या शिरोवेदना कारित्वात् शिरोग्रह इति व्यपदेशः॥२७॥

---

(११) स्फिक्पूर्वेत्यादि। स्फिक् पूर्वं प्रथमं अर्थात् पार्ष्ण्यानन्तरकण्डरैर्यस्याः सा स्फिक्पूर्वा अन्वयशी कटिपृष्ठोरुजानुजङ्घापदं क्रमात् अनुक्रमतः न युगपत् सम्बन्धकण्डरैर्हन्ति मुहुः स्पन्दते कम्पयतीत्यर्थ इत्यन्तर्मूलजन्तपदं अथवा तथा कथादिकं मुहुः स्पन्दते वातादिति ज्ञेयं। स्त्रियां स्फिचौ कटिप्रोथा वित्यमरः। कटिप्रोथः कथाः मांसपिण्डः। इदमत्रानुधावकं स्फिचि पूर्वं सम्बन्धादिः पश्चादनुक्रमेण कथादिष्वपीति।

गृध्रसी स्तम्भरुक्तोदैर्गृह्णाति स्पन्दते मुहुः॥
वाताद्वातकफात्तन्द्रा गौरवारोचकान्विता॥२८॥
तलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः।
बाह्वोः कर्म्मक्षयकरी विश्वाची चेति सोच्यते॥२९॥

लक्षणान्तु तदेव गृध्रसीमाह।

स्फिकपूर्व्वां प्रथमतो याऽऽह्या स्तम्भरुक्तोदैर्यस्याः सा स्फिकपूर्व्वा ईदृशानन्तु पूर्व्वा प्रथमा गृध्रसी वातादिति योजयति एषा च व्याख्या स्फिकशब्दस्य नपुंसकत्वेन वा पूर्व्वास्फिक कटी पृष्ठेत्यादिना पाठेन वा उपपद्यते। अन्यथा स्फिकपूर्व्वमिति पाठान्तरं जानुजङ्घापदमिमित्यनेन योज्यं क्रमादिति न युगपत् वातादिति भेदः वातकफारब्धा गृध्रसी तु उक्ता वातलक्षणयुक्ता गौरवादियुक्तापि भवति गृध्रसीद्वयमुक्तम् ॥२८॥

विश्वाचीमाह।

तलमित्यादि। तलं हस्तस्योपरिभागं तलशब्दोऽत्र उपरि वचनः यथा भूतलमिति गयदासः तेनायमर्थः बाह्वोः पृष्ठं बाहुपृष्ठं तत आरभ्य हस्ततलं लक्षीकृत्याङ्गुलीनां याः कण्डराः। ताः संदूष्य बाह्वोः कर्म्मक्षयकरी या सा विश्वाची बाह्वोः कर्म्मप्रसारणाकुञ्चनादि द्वित्वञ्चात्र यथा सम्भवपरं तेनैकबाहावपि भवति वातरक्तवत् विश्वाची चेति चकारेण गृध्रसीविश्वाच्योः खल्लीसंज्ञां दर्शयति। तयोरपि करमूलावमोटनकारित्वात्। यदुक्तं हारीते

वातशोणितजः शोथो जानुमध्ये महारुजः।
ज्ञेयः क्रोष्टुकशीर्षस्तु स्थूलः क्रोष्टुकशीर्षवत्॥
वायुः कट्याश्रितः सक्थ्नः कण्डरामाक्षिपेद्यदा
खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात्॥३०॥

गृध्रसी विश्वाचीचोक्ता खल्लीतीव्ररुजान्विता इति गयदासः॥ चक्रस्त्वाह चरके खल्ली तु पादजङ्घोरुकरमूलावमोटनी-त्यनेन विश्वच्याः पृथगेव खल्ली पठिता सुश्रुतेन तु खल्ली न पठितैव नहि तेन तन्त्रान्तरोक्ताः सर्व्वविकाराः पठ्यन्ते चरकोक्त परस्पर वातावरणलक्षणमेव न पठितं हारीतेन तु तीव्ररुज्योगात् गृध्रसी विश्वाच्योः खल्लीत्वं पठितं भवति हि धर्म्मान्तरयोगात् कस्यचिद्विकारस्य रोगान्तरत्वं यथा घटिका प्रत्यष्ठिला चाश्मर्य्येव शर्करा पाण्डुरोग एव कामलेत्यादि॥२९॥

क्रोष्टुशीर्षमाह।

वातेत्यादि। वातशोणित इति वा रक्ताख्य विकारजः। चिकित्साभेदार्थं पृथक् पठित इति गयदासः। वातशोणिताभ्यां जात इति जेज्जटः दृश्यते ह्ययं वातरक्तव्यतिरेकेणापि जानुदेश नियतत्वेन विशिष्ट लक्षणत्वेन च इतरवातरक्तशोथाद्भेद इति क्रोष्टुशीर्षवत् शृगालमस्तकवत् स्थूलः सक्थ्न ऊर्द्ध्वं सर्व्वजङ्घायाः कण्डरां महास्नायुमाक्षिपेत् ईषत् क्षिपेत् किञ्चिद्गतिमत्वादिति गयदासः सक्थ्नोरिति द्विवचनेनैव द्वित्वे लब्धे द्वयोरिति पदेन

प्रक्रामन् वेपते यस्तु खञ्जन्निव च गच्छति ।
कलाय खञ्जं तं विद्यात् मुक्तसन्धिप्रबन्धनं॥३१॥
रुक्पादे विषमन्यस्ते श्रमाद्वा जायते यदा ।
वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकम् ॥३२॥
पादयोः कुरुते दाहं पित्तासृक्सहितोऽनिलः।

नियमयति सक्थि हृदयस्यैव वधात् पङ्गुरेक सक्थिवधात् खञ्ज इति वधचात गमनादि क्रियानाशः॥३०॥

खञ्जविशेषमाह ।

प्रक्रामन्नित्यादि[१२] प्रक्रामन्निति गमनमारभमाणो वेपते प्रशब्दोऽयमादि कर्म्मणि खञ्जन्निव गतिं विकलय-न्निव गच्छति गमनारम्भे वेपनेन खञ्जादस्य भेदः। मुक्ते-त्यादि मुक्ता सन्धिप्रबन्धनमिति शिथिलीकृतसन्धिबन्धन मित्याहुः कलाय खञ्ज इति शास्त्रे रूढासञ्ज्ञा ॥३१॥

वातकण्टकमाह ।

रुक्पादे[१३] इत्यादि। विषमपादन्यासकुपितः श्रमकुपितो वा वायुर्गुल्फे वेदनां जनयन् वातकण्टक मित्याहुः अयमेवान्यत्र खुडुवात इत्युक्तः॥३२॥

---

(१२) प्रक्रमन्नित्यादि। यस्तु प्रक्रामन् सन् वेपते खञ्जन्निव च गच्छति तं कलाय खञ्जं विद्यात् धान्यविशेषकलायाद्यतिभक्षणदोषकारणात् ।

(१३) रुक् पदे इत्यादि। पादे विषमे न्यस्ते सति श्रमाद्वा कुपितेन वातेन हेतुना गुल्फमाश्रित्य या रुक् जायते तं वाते कण्टकमाहुः

विशेषतश्चंक्रमतः पाददाहं तमादिशेत् ॥३३॥

हृष्येते चरणौ यस्य भवेतां चापि सुप्तकौ ।
पादहर्षः स विज्ञेयः कफवातप्रकोपतः ॥३४॥

अंसदेशस्थितो वायुः शोषयेदंसबन्धनम् ।
शिराश्चाकुञ्च्य तत्रस्थो जनयेदववाहुकम् ॥३५॥

विशेषतश्चंक्रमतः इत्यनेन स्थितस्य मन्दोदाह इति दर्शयति वैवर्ण्यादेरभावाद्वातरक्तादस्य भेदः ॥३३॥

हृष्येते हर्षयुक्तौ भवतः हर्षश्च रोमाञ्चप्रायः अन्ये तु शीतो झिणिझिणिवत् वेदनाविशेष इत्याहुः झिणिझिणि तु न चिरानुबन्धिनी केवलवातजेति भेदः ॥३४॥

अंस इति शोकार्त्तानां सशोषः केवलः वातज उच्यते अंसबन्धकारकः श्लेष्मा अंसबन्धनः एतदनन्तरं अंसशोषं जनयेदिति शोष इति कार्त्तिकः । शिराश्चेत्यादिना अववाहुकः । तत्रस्थोऽंसस्थः अयन्तु कफवातजः । अन्ये तु भित्त्वाऽववाहुक लक्षणमाहुः तन्न यतः सुश्रुतेनोक्तं अंसशोषाववाहुकयोर्बाहुमध्ये शिराव्यध इति एतदनन्तरं सुश्रुतेन बाधिर्य्यं पठितं यदा शब्दवहं वायुरित्यादिना माधवेन तु प्रकरणानुरोधं मन्यमानेन कर्णरोग एव एतत् पठितं किन्तु सुश्रुतेन वातव्याधौ बाधिर्य्यं पठित्वा बाधिर्य्यं कर्णशूलौ शालाक्येऽपि पठितौ पुनरुक्तमिति चेत् नैवं संप्राप्तिभेदभिन्नत्वात् वातव्याधौ शब्दवहमित्यनेन कर्णशष्कुल्यवच्छिन्ननभोदेश उक्तः शालाक्ये च शब्द-

आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः।
नरान्करोत्यक्रियकान्मूकमिन्मिनगद्गदान्॥[*]॥
अधो या वेदना याति वर्च्चोमूत्राशयोत्थिता।
भिन्दन्तीव गुदोपस्थं सा तूनी नाम नामतः॥३७॥
गुदोपस्थोत्थिता या तु प्रतिलोमं प्रधाविता।
वेगैः पक्वाशयं याति प्रतितूनीति सोच्यते॥३८॥

बहवःशिरा इत्युक्तं माधवेन तु कर्णरोगे शब्दाश्रयत्वा विशेषादेतदेव तत्र पठितमित्यविरोधः॥३५॥

मूकादीन् बीयाह।

आवृत्येत्यादि। अक्रियकान् अवचनक्रियकानिति नञ् अयमभावे ईषदर्थे च आद्यो मूकः द्वितीयो मिन्मिन इति गद्गदस्तृतीय इति मूकोऽवचनः मिन्मिनः सानुनासिक सक्लिन्नवचनः। गद्गदो लुप्तपद व्यञ्जनाभिधायी एषां समानकारणाभिधानेऽपि दृष्टं स्तम्भादिभिरदृष्टवशाद्वा भेद इत्यूह्यम्॥३६॥

अध इति गुदोपस्थं वेदना शूलं वर्च्चोमूत्राशयोत्थिता पक्वाशय मूत्रपुटयो र्व्यस्तसमस्तयोर्जाता उपस्थं स्त्रीपुंसयो र्गुह्यं नामतः अभिहितः॥३७॥

प्रतिलोममित्यादि। ऊर्द्ध्वं वेगै र्व्यस्तसमस्तोद्गमैः सेत्यनेन भिन्दन्तीवेत्यतिदिश्यते॥३८॥

अत्र तु प्रक्रम्यमानत्वाच्च तत्शब्दस्य प्रक्रम्यमानविशेष्य स्याद्यनुपपत्तेः पुंस्त्वं यथा न प्रथमं सन्धिः प्रतिपदमुच्चार्यमाणं दन्तरमिति।

साटोपमत्युग्ररुजमाध्मातमुदरं भृशम्।
आध्मानमिति तं विद्याद्घोरं वातनिरोधजम्॥१७॥
विमुक्तपार्श्वहृदयं तदेवामाशयोत्थितम्।
प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम्॥१८॥
नाभेरधस्तात्[१९] संजातः सञ्चारी यदि वा चलः।
अष्ठीलावद्घनो ग्रन्थिरूर्द्ध्वमायत उन्नतः।
वाताष्ठीलां विजानीयात् बहिर्मार्गावरोधिनीम्॥

साटोपमिति। साटोपं सशब्दमिति गयदासः गुड़गुड़ाशब्द इति कार्त्तिकः। आध्मातं वातपूर्णचर्म्मपुटकसन्नीयम् उदरमिति पञ्चाशयः प्रत्याध्मानस्यामाशयसम्भवत्वात् घोरमिति कष्टप्रदम् आमाशयसमुत्थत्वेन प्रत्यासन्नत्वात् पार्श्वहृदययोरपि वेदनाशङ्कानिरासार्थमाह॥ विमुक्तपार्श्वहृदयमिति तदेवेत्यनेन साटोपादित्वमपि दर्शयति कफव्याकुलितानिलं कफावृतवातम्॥१८॥

अष्ठीला उत्तरपथे वर्त्तुल पाषाणविशेष इति जेज्जड़मतानुवादी कार्त्तिकः कर्म्मकाराणां वर्त्तुलादीर्घलौहभाण्डिरिति गयदासः ऊर्द्ध्वमायतमुपरिदीर्घम् उन्नतं तीर्य्यगुन्नतं वातकृताष्ठीला वाताष्ठीलेति स्वरूपपरं व्याख्-

(१९) नाभेरधस्तादित्यादि। नाभेरधस्तात् सञ्जातः वातविकारः सञ्चारी यदि वा अचलो भवति तदा वाताष्ठीलां विजानीयादिति योज्यम्। सर्वाङ्ग कम्प इत्यादि। सर्वाङ्गं कम्पयतीति सर्वाङ्गकम्पः सम-स्ताङ्गानां कम्पनेन निखाकांक्षेव प्रकृतिरिति न्यायात् शिरसः कम्पोऽप्यु-पलक्षितः वेपथुसंज्ञया ख्यात इत्यर्थः। शिरस इति कस्यचित् पाठः।

एतामेव रुजोपेतां वातविण्मूत्ररोधिनीं ।
प्रत्यष्ठीला मिति वदेज्जठरे तिर्य्यगुत्थितां॥४०॥
मारुतेऽविगुणेवस्तौ सुत्रंसम्यक् प्रवर्त्तते ।
विकारा विविधा चात्र प्रतिलोमे भवन्ति च॥४१॥
सर्व्वाङ्गकम्पःशिरसो वायुर्वेपथु संज्ञकः।
खल्ली तु पादजङ्घोरु करमूल वमोटिनी ॥४२॥
स्थाननामानुरूपैश्चलिङ्गैःशेषान्विनिर्द्दिशेत्॥४३॥

स्वभावात् वहिर्मार्गावरोधिनीं वातमूत्र पुरीषावरोधिनीं चैव जठरे तीर्य्यगुत्थिता तीर्य्यंगायता प्रत्यष्ठीलेति भेदः वातविण्मूत्ररोधिनी मिति विशेषपरम्॥३०॥
ष्ठीला व्यतिरिक्तामपि वातविकृतिमूत्रविरोधिनीमाह ।

मारुत इत्यादि । अविगुणेऽनुलोमे प्रतिलोमे मारुत इति सम्बन्धः विकारा अश्मरी मूत्रकृच्छ्रादयः॥४१॥

वेपथुं वातविकारमाह ।

सर्व्वेत्यादि । शिरसः कम्प इति सम्बन्धः शिरश्च इत्य-वयवोपलक्षणं तेन हस्तादेरपि कम्पो वेपथुरित्यर्थः खल्ली शिरामोड़ इति लोके ॥४२॥

अनुक्त वाताधिकारसंग्रहणार्थमाह ।

स्थान इत्यादि स्थानानुरूपै र्यथा कुक्षिमूलं वस्तभेद इत्यादि नामानुरूपै र्यथा शूल इत्युक्ते कीलनिखातवत् वेद-नाविशेष एवोच्यते तथा भेद तोदादिभिरपि पीड़ाएव गम्यते ॥४३॥

सर्वेष्वेतेषु संसर्गं पित्ताद्यैरुपलक्षयेत् ॥४१॥
हनुस्तम्भार्दिताक्षेपपक्षाघातापतन्त्रकाः ।
कालेन महता वाता यत्नात् सिध्यन्ति वा न वा ॥
नवान् बलवतस्त्वेतान् साधयेन्निरुपद्रवान् ॥४२॥
विसर्पदाहरुक्सङ्गमूर्च्छारुच्यग्निमार्दवैः ।
क्षीणमांसबलं वाता घ्नन्ति पक्षवधादयः ॥४३॥
शूनं सुप्तत्वचं भग्नं कम्पाध्माननिपीडितम् ।
रुजार्त्तिमन्तञ्च नरं वातव्याधिर्विनाशयेत् ॥४४॥
अव्याहतगतिर्यस्य स्थानस्थः प्रकृतौ स्थितः ।

वातोपद्रवमाह ।

विसर्पेत्यादि । वाता इति वातविकाराः कार्य्यकारणयोरभेदात् वातादिति पाठे वातात् पक्षवधादय इति योज्यं शूनं सशोथं सुप्तत्वचं स्पर्शानभिज्ञत्वगिन्द्रियम् ॥४४॥ इदानीं पञ्चविधस्यापि प्रकृतिस्थस्य वायोर्लिङ्गं कार्य्यं चाह [१५] अव्याहतेत्यादि । यस्येति पुरुषस्याव्याहतगतिरनवरुद्धमार्गः स्थानस्थः स्वाशयव्यवस्थितः प्रकृतिस्थितोऽनष्टः एतद्विशेषणत्रयं हेतुसद्भावेन योज्यं वीतरोगो नीरोगः कफपित्तदुष्टेरपि । केवलवातेनान्तरीयकत्वात् अधिकं समाः

---

(१५) अव्याहतगतिरित्यादि । यस्य वायुरव्याहतगतिरनवरुद्धमार्गः स्थानस्थः स्वाशयव्यवस्थितः प्रकृतौ स्थितः अक्षीणवृद्धः स्यात् स वीतरोगः सन् अधिकं यथास्यात्तथा शतं समाः वर्षाणि जीवेदित्यर्थः । अत्राधिकमिति पदेन पवनान्तरैकवाक्यतया षड्विंशाधिकविंशतिवर्षो आगम्यते । अव्याहत इत्यादि विशेषणत्रयस्य हेतु

वायुः स्यात् सोऽधिकं जीवेद्वीतरोगः समा शतं॥ ४५॥

शतं पञ्चदिनाधिकञ्च विंशतिवर्षशतं यदाह वराहः आयुर्निरूपणे समाः। षष्टिर्द्विघ्नामनुजकरिणां पञ्च च निशा इत्यादि॥ ३५॥

इति वैद्य महोपाध्याय श्रीविजयरक्षित विरचिते
व्याख्यामधुकोषे वातव्याधिनिदानम्।

हेतुमद्भावतया वा भवतो स्थितं प्रतिस्थानस्य कारणता स्तानस्य कार्थं प्रति यथा इतरतैः कारणतेति
प्रेरकान्तरीयत्वादिति। प्रेरकस्यो भरकाम्भवर्तित्वात्। अयं भावः यस्य पङ्गुपित्तकफयोर्देहे प्रेरकः वातदुष्टेरभावस्तु न तयोर्दुष्टिरिति।
इति व्याख्यामधुकोषे पञ्जिकायां वातरोगनिदानम्।

अथ वातरक्त निदानम्।

लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः।
क्लिन्नशुष्काम्बुजानूपमांसपिन्याकमूलकैः॥
कुलत्थमासनिष्पावशाकादिपललेक्षुभिः।

वातव्याधिविशेषत्वादनन्तरं वातरक्तमाह।[1]।

ननु सुश्रुते वातरोगाध्याय एव वातरक्तं पठितं तत् कुतोऽत्र संग्रहे पृथक् पाठः उच्यते सत्यपि वातरोगत्वे निदानवैशिष्ट्यात् विशिष्टदोषदूष्यख्यापनार्थं हस्तादिदेशे एव संप्राप्ति कथनार्थं क्रियाविशेष ख्यापनार्थञ्च पृथक्

---

(1) वातरक्तनिदानं सुगमत्वादुपेक्षितम्।

दध्यारनालसौवीरशुक्ततक्रसुरासवैः ॥
विरुद्धाध्यशनक्रोधदिवास्वप्नप्रजागरैः ।
प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम् ।
स्थूलानां सुखिनाञ्चापि कुप्यते वातशोणितम् ॥१॥

हस्त्यश्वोष्ट्रैर्गच्छतश्चाश्नतश्च विदाह्यन्नं सविदा-
होऽशनस्य । कृत्स्नं रक्तं विदाहत्वाशु तच्च दुष्टं

करणं अतएव चरके वातव्याध्यनन्तरं पृथग्वातरक्ताध्याय
ननु बलक्षीणाः स सन्तापा इत्यादिना रक्तगतस्य वातस्य
लक्षणं वातव्याधावेवोक्तं ततश्च वातरक्ताभिधानं पुनरुक्तं
स्यान्नैवं वातरक्तं हि दुष्टेन वातेन रक्तेन च विशिष्टसं-
प्राप्तिकं विकारान्तरमेव । उक्तं हि चरके वायुः प्रवृद्धो
वृद्धेन रक्तेनावारितः पथि क्रुद्धः संदूषयेद्रक्तं तज्ज्ञेयं
वातशोणितमिति रक्तगते वाते तु वात एव दुष्टो रक्त-
मदुष्टमेव गच्छतीति भेदः । लवणाम्लेत्यादि क्लिन्नशुष्क-
शब्दो मांसेन सम्बध्यते । निष्पावः शिम्बिः पललं मांसं
पिण्याकतिलकल्कः प्रायश इत्यादि सुकुमारा मृदुदेहा-
वयवाः तेषामचेष्टत्वात् लवणादिभिः रक्तं कटु प्रजागरा-
दिभिश्च वातः कुप्यतीतीशानः ॥१॥

संप्राप्तिमाह ।

हस्त्यश्वेत्यादि । हस्त्यादिगमनं वातवृद्धौ विशेषेण
रक्तस्य द्रवस्याधोगमनेऽपि हेतुः विदाह्यन्नञ्च शोणितवृद्धौ
हस्त्यादिगमनं विशेषव्यपदेशादपि गमनं हेतुरेव तद्रक्तं
संयुक्तं वायुना दूषितेन स्वहेतुवृद्धेन तत्प्राबल्यादिति ।

स्रस्तं पादयोश्चीयते तु । तत्संपृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तम् ॥२॥

स्वेदोऽत्यर्थं नवाकार्ष्ण्यं स्पर्शाज्ञत्वं क्षतेतिरुक् ।
सन्धिशैथिल्यमालस्यं सदनं पीडकोद्गमः ॥
जानुजङ्घोरुकट्यंशहस्तपादाङ्गसन्धिषु ।
निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेवच ॥
कण्डूः सन्धिषु रुग्भूत्वाभूत्वा नश्यति चासकृत् ।
वैवर्ण्यं मण्डलोत्पत्ति र्वातासृक्पूर्वलक्षणम् ॥३॥
वातेऽधिकेऽधिकं तत्र शूल स्फुरणभञ्जनम् ।
शोथस्य रौक्ष्यं कृष्णत्वं श्यावता वृद्धिहानयः ॥
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः ॥४॥
रक्ते शोथोऽतिरुक्तोद स्ताम्रश्चिमिचिमायते ।

द्वयोर्दुष्टत्वेपि वातस्य प्राबल्यात् दोषत्वेन प्राधान्याद्वातरक्तस्य व्यपदेशः नतु रक्तवात इति ॥२॥

स्वेदोऽत्यर्थं नवेति घर्मागमनमत्यर्थं सर्वथा न भवति एतच्च व्याधि महिम्ना कुष्ठवत् क्षतेऽतिरुगिति यदि कारणान्तरात् क्षतं स्यात् तदा तत्रायं रुजा स्यात् तद्देशस्य दुष्टत्वात् ॥३॥

वातरक्तस्य दोषान्तरसंसर्गेण दोषलक्षणान्याह ।
वातेऽधिक इत्यादि । वृद्धिहानय इति वातरक्तशोथ-

क्लिन्नश्चरैः श्रमं नैति कण्डुक्लेद समन्वितः॥१॥
पित्ते विदाहः सम्मोहः स्वेदमूर्च्छामदस्तृषा।
स्पर्शासहत्वं रुग्रागः शोथः पाको भृशोष्मता॥२॥
कफे स्तैमित्यगुरुता सुप्तिस्निग्धत्व शीतताः॥३॥
कण्डूर्मन्दा च रुग्द्वन्द्वे सर्वलिङ्गञ्च सङ्करात्॥४॥
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि।
आखोर्विषमिव क्रुद्धं तद्देहमुपसर्पति ॥५॥
आजानुस्फुटितं यत्तु प्रभिन्नं प्रस्रुत ञ्च यत।
उपद्रवैश्च यर्च्जुष्टंप्राणमांसक्षयादिभिः।

वातानां रक्त इत्यत्राधिक इत्यनुवर्त्तनीयं एवं वक्ष्यमाण पित्तादिषु। एतद्वारश्चक रक्तादन्यद्रक्तान्तरं बोध्यं रक्तमपि रक्तान्तर दूषकम्। यदुक्तं दुष्टरक्तक्षये पित्तवद्रक्तं नातिदुष्टश्चेति श्रमं नैति शान्तिं नयाति। द्वन्द सर्व्वलिङ्गञ्च सङ्करादिति सङ्करात् द्विदोषत्रिदोषमेलकात् द्वन्दलिङ्गं सर्व्वलिङ्गञ्च क्रमाद्वातरक्तं भवति॥३॥

पादयोर्जातमप्रतिक्रियामाणं देशान्तरं व्याप्नोति
पादवद्धस्तयोरपि भवतीति दर्शयन्नाह।

पादयोरित्यादि। आखोर्विषमित्यनेन मन्दरूपतां दर्शितवान् एतद्वातरक्तं चरकेण द्विविधमुक्तं यदाह।

उत्तानमथ गम्भीरं द्विविधं वातशोणितम्।
त्वङ्मांसाश्रयमुत्तानं गम्भीरं त्वन्तराश्रयं इति॥

सुश्रुतेन तु कुष्ठवदुत्पत्तौ उत्तानस्योत्तरकालं गम्भीरत्वमुक्तमिति मतभेद एव॥५॥

वातरक्तमसाध्यं स्याद्याप्यं सम्वत्सरोत्थितम्॥१॥
अस्वप्नारोचकश्वास मांसकोथशिरोग्रहाः।
मूर्च्छातिमदरुक् तृष्णा ज्वरमोह प्रवेपकाः॥
हिक्कापाङ्गुल्यवीसर्पपाकतोदभ्रमक्लमाः।
अङ्गुलीवक्रतास्फोटदाहमर्म्मग्रहार्ब्बुदाः॥
एतैरुपद्रवैर्व्वर्ज्जं मोहेनैकेन वापि यत्॥१॥
अकृत्स्नोपद्रवं याप्यं साध्यं स्यान्निरुपद्रवम्॥१॥
एकदोषानुगं साध्यंनवं याप्यं द्विदोषजं।
त्रिदोषज मसाध्यं स्यात् यस्य च स्युरुपद्रवा॥६॥

अथोरुस्तम्भनिदानम्।

[1]शीतोष्णद्रवसंशुष्क गुरुस्निग्धै र्निषेवितैः।

आजानुजानुपर्य्यन्त गतमसाध्यं तथा स्फुटितादिकं स्फुटितं दलितत्वक् प्रभिन्नं विदीर्णत्वक् उपद्रवैरित्यादौ आदिशब्देन वक्ष्यमाणानाम स्वप्नादीनां ग्रहणम्। याप्यमिति। संवत्सरोत्थितमित्यनेन संवत्सराद्यर्वाकसाध्यं यदि स्फुटितादयो न भवेयुरित्याहुः॥ पाङ्गुल्यं पङ्गुता मोहेनैकेनेति वचनात् पूर्व्वोक्तैः समस्तै र्हिक्कादिभिर्योग बोधयतीति॥[१]॥

इति वातरक्तनिदानम्।

जीर्णाजीर्णे तथायास संक्षोभ स्वप्नजागरैः॥
सश्लेष्ममेदः पवनः साममत्यर्थसञ्चितम्।
अतिभूये तरं दोष सुरूचेत् प्रतिपद्यते ॥
सक्थ्यस्थिनी प्रपूर्य्यान्तःश्लेष्मणा स्तिमिते नच ।
तदास्तभ्नाति तेनोरूस्तब्धौ शीतावचेतनौ ॥
परकीया विवगुरूस्यातामतिस्वग्रव्यथौ ॥१॥
ध्यानाङ्गमर्द स्तैमित्य तन्द्रा छर्द्यरुचिज्वरैः।
संयुक्तौपादसदन कृच्छ्रोद्धरण सुप्तिभिः ॥
तमुरूस्तम्भ मित्याहु राढ्यवात मथापरे ॥१॥
प्राक्रूपं तस्य निद्रातिध्यानं स्तिमितता ज्वरः।
रोमहर्षोऽरुचिश्छर्द्दि र्जङ्घोर्व्वोः सदनं तथा ॥

द्रवोपलक्षणार्थं तेन गुरुस्निग्धाभ्यां लघुरूक्षयो र्ग्रहणं बोध्यमिति केचनः।संशुष्कं कठिनं द्रव्यविरोधित्वात् जीर्णा-जीर्णाइति प्रभूतं जीर्णं स्तोकमजीर्णमित्याहुः तस्मिन् भोजन इतिशेषः। अतएव दृढ़बलेन जीर्णाजीर्णे समश्नत इति पठितं एते च यथा सम्भवं श्लेष्मादीनां हेतवः। स श्लेष्ममेदःपवन

ऊरूचेत् प्रतिपद्यते प्राप्नोति अन्यभूत अप्रवृत्तत्वात् एवं स्तिमितेन स्थिरी-कृतेन अन्तःश्लेष्मणा सक्थ्यस्थिनी प्रपूर्य पूरयित्वा यदा ऊरूस्तभ्नाति तेन स्तम्भनेन ऊरूस्तब्धौ शीतावचेतनौ परकीयाविव एवं अतिभृश-व्यथौ भवे वदनादिभिः संयुतौ संयुक्तौ गुरू च स्यातां ध्यानादिभिरुप-लक्षितः स्यादितियोज्यं तं ऊरुस्तम्भम् ऊरुस्तम्भमिति केचिदाहुः अपरे आढ्यवातमिति ।

वातशङ्किभिरज्ञानात्तस्य स्यात् स्नेहनात्पुनः।
पादयोः सदनं सुप्तिः कृच्छ्रादुद्धरणं तथा।
जङ्घोरुग्लानिरत्यर्थं शश्वच्चा दाहवेदने।
पादश्च व्यथते न्यस्तं शीतस्पर्शं न वेत्ति च॥
संस्थाने पीड़ने गत्यां चालने चाप्यनीश्वरः।
अन्यनेयौ हि संभग्नाविव पादौ च मन्यते॥२॥
यदा दाहार्त्तितोदार्त्तो वेपनः पुरुषो भवेत्।
ऊरुस्तम्भस्तदा हन्यात् साधयेदन्यथा नवं॥२॥

इति सङ्क्षेपमेदाद्याख्यौ पवनश्चेति सङ्क्षेपमेदः पवन इतरदोषं वित्तम् अस्यां संप्राप्तौ वातस्य प्राधान्यमुक्तं अत एव सुश्रुते महावातव्याधावयं रोगः पठितः चरके तु कफ-प्राधान्यमुक्तं यदाह ऊरुस्तम्भस्तु मेदस्को वातपित्ताऽभि-भूयतेत्यादि तत्रापरकस्य चिकित्स्यत्वेन प्राधान्यम् आरम्भकत्वेन तु पवनस्येति न विरोधः। परकी-यावित्यनेन उत्क्षेपणगमनादिष्वप्रभुत्वं दर्शयति॥१॥

ध्यानादिभिर्ज्वरान्तैरुपलक्षितः पुरुष इति शेषः॥

---

(२) वातशङ्किभिरित्यादि। वातशङ्किभिर्वातरोग सदृश लिङ्ग दर्शनात् वातशङ्किभि वैद्यैरज्ञानात् अनिश्चयात् तस्य स्नेहनं स्नेहपा-नमं स्निग्धद्रव्यस्मात् भाविष्टन्ट मध्ययात् स्यात् यदि भवति पुनस्तस्य पादयोः सदनमित्यादिर्भवति एवं न्यस्तं पादश्च व्यथते नच शीतस्पर्शञ्च वेत्ति संस्थाने पीड़नेगत्यां चालनेचाप्यनीश्वरः अन्यनेयौ परकीयौ संभग्नौ संभग्नाविव संभग्नौ हि ऊरुपादौ च मन्यते इत्यर्थः॥

अथामवातनिदानम्।

विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च।
स्निग्धं भुक्तवतोऽह्यन्नं व्यायामं कुर्वतस्तथा॥
वायुना प्रेरितोह्यामः श्लेष्मस्थानं प्रधावति।
तेनात्यर्थं विदग्धोऽसौ धमनीः प्रतिपद्यते॥
वातपित्तकफैर्भूयो दूषितः सोऽन्नजोरसः।
स्रोतांस्यभिष्यन्दयति नानावर्णोऽति पिच्छिलः॥
जनयत्याशु दौर्बल्यं गौरवं हृदयस्य च।

वातशङ्किभिरिति सुप्तिशूलोत्कम्पादि वातरोगसदृश लिङ्गदर्शनात् तत्शङ्किभिरज्ञानादनिश्चयात्। ततोपथ्यानुपशयज्ञानार्थं स्नेहनं क्रियते यदुक्तं गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां परिच्छेदेति अतः स्नेहनादनुपशयो भवतीत्याह। पादयोरित्यादि। अज्ञानान्मोहादितीशानः कर्त्तरय मूर्च्छाजनम् आदाह वेदनेति आङ ईषदर्थे अन्ये त्वीषदर्थ एव नञ माङः तन्न तदाहस्यास्याभ्यात्वेन वक्ष्यमाणत्वात् आनाह वेदनेति पाठान्तरमयुक्तं चरकटीकाकारैः सर्वैरव्याख्यातत्वात् व्याधिस्वभावात्। अयञ्चोरुस्तम्भ एक एव त्रिदोषारब्धः नतु वातादिभेदादनेकविधः। उक्तं हि चरके व्याधिसंख्यायामेक एव उरुस्तम्भ इति। संभग्नाविव संभग्नौ ॥२॥

इति उरुस्तम्भनिदानम्।

इति व्याख्यामधुकोशपञ्जिकायां उरुस्तम्भनिदानम्।

व्याधिनामाशयो ह्येष आमसंज्ञेति दारुणः॥१॥
युगपत् कुपितावन्त स्त्रिकसन्धि प्रवेशकौ।
स्तब्धं वा कुरुतो गात्र मामवात स उच्यते ॥२॥
अङ्गमर्दोऽरुचिस्तृष्णा आलस्यं गौरवं ज्वरः।
अपाकः शूनताङ्गाना मामवातस्य लक्षणम् ॥१॥
स कष्टः सर्वरोगाणां यदा प्रकुपितो भवेत् ॥१॥
हस्तपादशिरोगुल्फ त्रिकजानूरुसन्धिषु।
करोति सरुजं सोथं यत्र दोषः प्रपद्यते ॥
स देशोरुज्यतेऽत्यर्थं व्याविद्ध इव वृश्चिकैः॥१॥
जनयेत् सोऽग्निदौर्बल्यं प्रसेकारुचि गौरवम्।
उत्साहहानिं वैरस्यं दाहञ्च बहुमूत्रताम् ॥
कुक्षौ कठिनतां शूलं तथा निद्रा विपर्य्ययम्।

उरुस्तम्भे वायुः साम इत्युक्तम् अत आदनन्तरमामवातमाह[1]

विरुद्धेत्यादि। विरुद्धाहारः संयोगादि विरुद्धः विरुद्धाचेष्टा यथैव व्यायाम व्यवाय जलप्रतरणादि स्निग्धं भुक्तवतो व्यायामं कुर्व्वतः इति मिलितो हेतुः श्लेष्मस्थानमामाशय सन्ध्यादि तेन विदग्धो दूषितोऽभावामो धमनीः प्रतिपद्यते इति। धमनीभिः प्रतिपद्यते इति पाठान्तरे श्लेष्मस्थानमिति योज्यं सोऽप्यजो रस इति आमः। अन्ये-रसस्यैवापक्वस्य तन्त्रान्तरे आमरसस्य व्यपदेशात्। यदुक्तं

(१) आमवातनिदानं सुगमत्वादुपेक्षितम्।

तृट्छर्दिभ्रममूर्च्छाश्च हृद्ग्रहं विविधव्यथाम् ।
जाड्यान्त्रकूजमानाहं कष्टांश्चान्यानुपद्रवान् ॥१॥
पित्तात् सदाहरागञ्च सशूलं पवनानुगम् ॥१॥
स्तिमितं गुरुकण्डूञ्च कफदुष्टं तमादिशेत् ॥२॥
एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते ।
सर्वदेहचरः शोथः सकृच्छ्रः सान्निपातिकः ॥१॥३॥

ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितमित्यादि अन्यैरप्युक्तम् ।

आमाशयस्थः कायाग्ने दौर्ब्बल्यादविपाचितः । आद्य आहारधातुर्यः स आम इति कीर्त्तितः । अविपक्वमसंयुक्तं दुर्गन्धं बहुपिच्छिलम् । सदनं सर्व्वगात्राणामाम इत्यभिधीयते ।

अन्येत्वाहुः

आहारस्य रसः शेषो यो न पक्वोऽग्निलाघवात् ।
स मूलं सर्व्वरोगाणामाम इत्यभिधीयत इति ॥

तथा चापरे आममन्नरसं केचित् केचित्तु मलसञ्चयम् । प्रथमां दोषदुष्टिञ्च केचिदामं प्रचक्षते ।

नानावर्ण इति वातादिदूषितत्वात्तद्वर्णः ।१।

युगपदित्यादि । वातकफौ युगपत् कुपितावन्तः कोष्ठे त्रिकसन्धि प्रवेशकौ भवतः अथवा गात्रं स्तब्धं कुरुतः त्रिकसन्धिषु प्रवेश्य स्तात्कृत वेदनया बोध्यः ॥२॥

आमवात सामान्यलक्षणमाह ।

अङ्गमर्द इत्यादि ॥१॥

अथ शूलपरिणामशूलान्नद्रवशूलनिदानम्।

दोषैः पृथक् समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत्॥
सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः॥१॥
व्यायामयानादतिमैथुनाच्च प्रजागराच्छीत
जलातिपानात्। कलायमुद्गाढकिकोरदूषादत्यर्थ
रूक्षाध्यशनाभिघातात्॥ कषायतिक्तातिविरूढ-
जान्नविरुद्धवल्लूरकशुष्कशाकात्। विट्शुक्र-
मूत्रानिलवेगरोधात् शोकोपवासादतिहास्य

अस्य वातिहृद्दस्य लक्षणमाह।

स इति वृश्चिकैः करीषज कीटविशेषैः. स इति आम-
वात आध्मकर्मिणत्वम् ॥१॥

अन्यान्युपद्रवाणि सङ्कोच खञ्जत्वादीनि विद्धि लक्षणान्याह
पित्तादित्यादि ॥१॥२॥

इति व्याख्यामधुकोषे आमवातनिदानम्।

आमवाते शूलं भवतीत्यनन्तरं शूलनिदानं ज्वरादि-
वत् शूलस्य प्रागुत्पत्ति रस्ति यदाह हारीतः।

अनङ्गनाशाय हरस्त्रिशूलं मुमोच कोपान्मकरध्वजश्च।

---

(१) वायुः प्रबल इत्यादिमूलम्। प्रायश वेद्धभिर्वायुः प्रबलः
सन् हृदपार्श्वबस्ति त्रिक पृष्ठदेशे शूलं जनयेत् विभवातसंसर्गेन तोदभेदै
रुपलक्षितः सन् सः जीर्णे आहारे प्रदोषे रजनीमुखे च घनागमे च
वर्षासु मेघोदयेपि शीते शीतकाले च गाढं कोपं समुपैति प्राप्नोति
तथा वातकार्य्यत्वेन मुहुर्मुहुः प्रशमन प्रकोपेण समुपैति सं खं दृनादि-
भिश्च समं साम्यं प्रयातीत्यर्थः॥

भाग्यात् ॥[१] वायुः प्रदुष्टो जनयेद्धि शूलं हृत्पार्श्व पृष्ठत्रिकबस्तिदेशे । जीर्णे प्रदोषे च घनागमे च शीते च कोपं समुपैति गाढम् ॥

मुहुर्मुहुश्चोपशम प्रकोपौ विड्वातसंस्तम्भन तोदभेदैः । संस्वेदनाभ्यञ्जनमर्दनाद्यैः स्निग्धोष्णभोजैश्च समं प्रयाति ॥२॥

[१] क्षारातितीक्ष्णोष्णविदाहि तैलनिष्पावपि-

[illegible]

क्रोधानलायासरविप्रतापैः॥

तमापतन्तं सहसा निरीक्ष्य भयाद्धितो विष्णुतनुं प्रविष्टः। सविष्णुहुङ्कारविमोहितात्मा पपात भूमौ प्रथितः स शूलः। स पञ्चभूतानुगतं शरीरं प्रदूषयत्यस्य हि पूर्वसृष्टिरिति ।

एतेन शूलसम्भवत्वादस्य शूलसंज्ञा शूलनिखातवत् वेदनाजनकत्वाच्च यदाह इह सुश्रुतः ।

शङ्कुस्फोटनवत्तस्य यस्मात् तीव्रातिवेदना । शूलासक्तस्य भवति तस्मात् शूलमिहोच्यते ।

कफपित्तादि शूलेष्वयमनुगामी वायुरित्याह सर्वेष्वित्यादि प्रभुः कर्त्ता ॥१॥

---

(२) स्रोतस्यत्र यश्चेत्यादि। अन्नवहे स्रोतसि पक्वौ पाकेन यस्य पित्तं तिष्ठति तस्य विदाहिभुक्तमन्नम् अन्यत्वाभुक्तमन्नं विदह्यते पित्तेनेति शेषः ।

(१) क्षारातितीक्ष्णेत्यादि। क्षारादिभिरन्नकारणैः पित्तं प्रकुपिताभ्यां नाभिप्रदेशे हृत्कोष्ठदाहकरं संस्वेद मूर्च्छाभ्रम शोष

ग्राम्यातियोगादशनैर्विदग्धैः पित्तं प्रकुप्याशु करोति शूलं। तृण्मोहदाहार्त्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमचोषयुक्तम् ॥ मध्यन्दिने कुप्यति चार्द्धरात्रे विदाहकाले जलदात्यये च। शीते च शीतैः समुपैति शान्तिं सुस्वादु शीतैरपिभोजनैश्च ॥३॥

शीतजलातिपानात् शीतलजलस्य प्रभूतपानं आढ़कीतुवरीकोरदूषः कोद्रवः विरूढ़मान्नं अङ्कुरित धान्यकृतमन्नं विरुद्धं क्षीरमत्स्यादि वल्लूरं शुष्कमांसं यद्यपि सर्वैरपि वातकोपनैः वातशूलं स्यात्तथापि व्यायामादि पाठेनैतद्दर्शयति व्यायामादयो यथा वातहेतवस्तथा शूलहेतवोऽपीति दोषव्याधिहेतव इत्यर्थः एवं पित्तश्लेष्मादिषु द्रष्टव्यं जीर्णे इत्याहारे घनागमे वर्षासु मेघोदये च मुहुर्मुहुः प्रशमप्रकोपौ वायोश्चलत्वेन ॥२॥

पैत्तिकमाह।

क्षारेत्यादि। क्षारो यवक्षारादिः मुष्ककादिकृत क्षारद्रव्यञ्च तीक्ष्णोष्णं मरिचराजिकादिः विदाहि वंशकरीरादि तैलं तिलविकृतिः निष्पावः शिम्बिः पिण्याकः निःस्नेहः सर्षपादि कल्कः कुलत्थयूषोऽत्र कुलत्थाम्बुपानोपलक्षणः सौवीरं सन्धानविशेषः रविप्रतापो रौद्रः ग्राम्या-

---

युक्तं शूलं करोति यच्च शूलः मध्यान्दिने अर्द्धरात्रे च विदाहकाले आहारस्य जलदात्यये शरदि कुप्यति शीते शीतकाले च शीतैः स्निग्धैः सुस्वादुशीतैरपि भोजनैश्च शान्तिमुपैतीत्यर्थः।

आनूपवारिजकिलाटपयोविकारैर्मांसेक्षुपिष्टकृशरातिलमाषशष्कुलीभिः। अन्यैर्बलासजनकैरपि हेतुभिश्च श्लेष्मा प्रकोपमुपगम्य करोति शूलम् ॥ हृल्लासकाससदनारुचिसंप्रसेकैरा-

तियोगो मैथुनातिसेवा निदाघीति पूर्व्वं पठित्वापि पश्चान्निदग्धैरित्यनेनाविदाहि वस्तुनोपि दोषवशेन विदाहित्वं दर्शितं यदाह सुश्रुतः

स्रोतस्सन्नाडे पित्तं पक्तौ वा यस्य तिष्ठति।
विदाहिभुक्तमन्यद्वा तस्याप्यन्नं विदह्यते।
विदाहकाल इत्याहारस्य जलदात्यये शरदि ॥३॥

श्लैष्मिकमाह।

आनुपेत्यादि आनूपं वारिजं मांसादिकं किलाटं तक्रकूर्च्चिका कृशरातिलशष्कुलमाषयवागुः सूर्य्योदये प्रातः कुसुमागमे वसन्ते ॥४॥

(४) आनुपेत्यादि। आनुपं जलप्रायदेशोद्भव कच्छपमांसादिकं वारिजं शम्बुकमांसादिकम्। किलाटः तक्र कूर्च्चिका क्षीर विकृतिः कूर्च्चिका क्षीरविकृतिरित्यमरात् क्षीरसा इति लोके सान्द्रधादक्षामक्षमन्दपक्वं क्षीरं मादाधिकूर्च्चिकातक्रं च पक्वं यद् क्षीरं साम्बेनतक्र कूर्च्चिका इति भरतः पयोविकार आमिक्षादिः मांसच्छागादीनां पिष्टः पिष्टकः कृशरातिलतण्डुलमाषयवागुः तिलशष्कुली तिलपुनीतिख्याता। एते रानुपादिभिरन्यैः कफवर्द्धकहेतुभिश्च श्लेष्मा प्रकोपमुपगम्य प्राप्य आमाशये शूलं करोति बलासजः शूलः हृल्लासादिभिः किमितादिभिश्च उपलक्षितः भुक्तमात्र एव च सूर्य्योदये शिशिरे कुसुमारम्भे वसन्ते च इहं अतिमात्रं यथातथा कुरुतऽति।

माशये स्तिमितकोष्ठशिरोगुरुत्वैः। भुक्तेसदैवहिरुजं कुरुतेऽतिमात्रं सूर्योदयेऽथ शिशिरे कुसुमागमे च ॥१॥

सर्वेषु दोषेषु च सर्वलिङ्गं विद्यात्भिषक् सर्वभवं हि शूलम्। सुकष्टमेनं विषवज्रकल्पं विवर्ज्जनीयं प्रवदन्ति तज्ज्ञाः ॥१॥४॥

आटोपहृल्लासवमीगुरुत्वस्तैमित्यमानाह कफप्रसेकैः॥ कफस्य लिङ्गेन समानलिङ्ग मामोद्भवं शूल मुदाहरन्ति ॥१॥

वस्तौ हृत्पार्श्व पृष्ठेषु स शूल, कफवातिकः ॥१॥

कुक्षौ हृन्नाभिमध्येषु सशूलः कफपैत्तिकः ॥१॥

दाहज्वरकरो घोरो विज्ञेयो वातपैत्तिकः ॥१॥

एकदोषोत्थितःसाध्यः कृच्छ्र साध्यो द्विदोषजः।

सर्वदोषोत्थितो घोरस्त्वसाध्योभूय्युपद्रवः॥१॥५॥

आमशूलमाह।

आटोप इत्यादि। कफस्यलिङ्गेन कफशूलोक्तलिङ्गेन वातपैत्तिकः चरकोक्ति वातिक पैत्तिक शूलस्थाने द्रष्टव्यः। एवं सान्निपातिकोपि उक्त दोषत्रयस्थाने यदुक्तं

तात्मकं वस्तिगतं वदन्ति पित्तात्मकञ्चापिवदन्तिनाभ्याम्।

पार्श्वकुक्षौ कफसन्निविष्टं सर्वेषु देशेषु च सन्निपातादिति।

भू पद्रवः उपद्रवास्तु तृष्णादयः यदुक्तम्।

[५] स्वैर्निदानैः प्रकुपितोवायुः सन्निहित स्तदा कफपित्ते समावृत्य शूलकारी भवेद्बली। भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजं ॥१॥

तस्य लक्षणमप्येतत्समासेनाभिधीयते ॥१॥

[६] आध्मानाटोपविण्मूत्रविबन्धारति वेपनैः। स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक् ॥१॥

वेदना च तृषामूर्च्छा आनाहोगौरवारुची। कासश्वा-
सश्च हिक्का च शूलस्योपद्रवाः स्मृताः ॥५॥

परिणामशूलमाह।

स्वैरित्यादि। अस्य च त्रिदोषजस्यापि परिणामकाल सम्भवत्वेन पित्तोल्वणत्वं द्रष्टव्यं यदुक्तं अन्यत्र।

वर्षासः प्रच्युतः स्थानात् पित्तेन सह मूर्च्छितो।
वायुमादायकुरुते शूलं जीर्य्यति भोजने।
कुक्षौ जठर पार्श्वेषु नाभ्यां वस्तौ स्तनान्तरे।
पृष्ठमूलप्रदेशेषु सर्व्वेष्वेतेषु वा पुनः। भुक्तमात्रेऽथवा वान्ते जीर्णेऽन्ने च प्रशाम्यति।
षष्टिकव्रीहिशालिनामोदनेन विवर्द्धते।
तत्परिणामजं शूलं दुर्विज्ञेयं महागदं।

---

(५) स्वैर्निदानैरित्यादि। स्वकीयै र्हेतुभिः प्रकुपितोवक्ष्ये स्तवान् वायुः सन्निहितः समीपस्थः सन् कफपित्ते समाहत्य आच्छाद्य शूलकारी परिणामशूलकारी भवेदिति योज्यं। तस्य निरुक्तिमाह भुक्ते जीर्य्यतीति।

(६) आध्मानाटोप इत्यादि। आध्मानादिभिरुपलक्षितं स्निग्धोष्णो-पशमप्रायं यच्छूलं तद्वातिकमितिवदेत्।

तृष्णादाहरतिस्वेदं कट्वम्ललवणोद्भवं। शूलं शीतशमप्रायं पैत्तिकं लक्षयेद्बुधः॥१॥

छर्द्दिहृल्लाससंमोहं सल्परुग्दीर्घ सन्तति। कटुतिक्तोपशान्तौ च तच्च ज्ञेयं कफात्मकम्॥१॥

संसृष्टलक्षणं बुद्धा द्विदोषं परिकल्पयेत्॥१॥

त्रिदोषजमसाध्यन्तु क्षीणमांस बलानलम्॥१।६॥

जीर्णेजीर्य्यत्यजीर्णे वा यच्छूल मुपजायते। पथ्यापथ्यप्रयोगेन भोजनाभोजने नच॥ न शमं याति नियमात् सोन्नद्रव उदाहृतः॥१॥

तदाश्रयरसवाहानां स्रोतसां दुष्टिहेतुकम्केचिदन्नद्रवं प्राहुरन्यं तत्पक्तिदोषतः।

पक्तिशूलं वदन्त्येके केचिदन्नविदाहजमिति।

भुक्ते जीर्य्यति चाहारे पच्यमाने (७)। तृष्णादाहारतिस्वेदा यत्र सन्ति तत् तृष्णादाहारतिस्वेदम्। कट्वम्ललवणोद्भवं कट्वम्ललवणैर्ज्जातं शीतशमप्रायं शीतलोपशमं बहुलम्। छर्द्दिहृल्लाससम्मोहलिङ्गानि यस्मिन् सन्ति तत् छर्द्दिहृल्लाससम्मोहम्। दीर्घसन्ततीति चिरानुबन्धि॥१

---

(७) तृष्णादाहेत्यादि। तृष्णादाहरतिस्वेदाः यस्मिन् सन्ति तत्तृष्णादाहरतिस्वेदं कट्वम्ललवणोद्भवं कट्वम्ललवणैः छर्द्दिं शीतशमप्रायं शीतलोपशमबहुलं यच्छूलं तत्पैत्तिकं वदेत् छर्द्दिहृल्लास इत्यादि। छर्द्दिहृल्लाससंमोहलिङ्गानि यस्मिन् सन्ति तच्छर्द्दिहृल्लास संमोहम्। अल्परुक् अल्परुक् यस्येतितत् दीर्घसन्तति चिरानुबन्धि कटुतिक्तोपशान्तौ च सत्यां यच्छूलं भवति तच्च कफात्मकं ज्ञेयम्॥

अन्नद्रवाख्यशूलेषु न तावत् स्वास्थ्यमश्नुते ।
वान्तमात्रे जरत् पित्तं शूलमाशु व्यपोहति ।
१॥७॥

अथ उदावर्त्तानाहनिदानम् ।

वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः ।
क्षुत्तृष्णोच्छ्वासनिद्राणां धृत्योदावर्त्तसम्भवः ॥१॥
वातमूत्रपुरीषाणां सङ्गाध्मानः क्लमो रुजा ।
जठरे वातजाश्चान्ये रोगाः स्युर्वातनिग्रहात् ॥१॥
आटोपशूलौ परिकर्त्तिका च सङ्गः पुरीषस्य तथोर्द्ध्ववातः । पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य ॥१॥

त्रिदोषविकृतिविशेषं अन्नद्रवमाह ।

जीर्णे इत्यादि । जीर्णे आहारे इति शेषः । एवं जीर्य्यत्यजीर्णे चेति सर्व्वदेत्यर्थः न शमं याति नोपशाम्यति इत्यर्थः नत्वसाध्यं चिकित्साविधानादिति ॥७॥

इति व्याख्यामधुकोषे शूलपरिणामशूलनिदानम् ।

उदावर्त्तोऽपि शूलं भवतीति शूलानन्तरमुदावर्त्तारम्भः ।

वातश्च । इन्द्रियशब्देनात्र शुक्रम् । क्षुत्तृष्णाद्यात्वावेगविधारणेन एते वातादय स्त्रयोदशानियमार्थं तेना-

इति व्याख्यामधुकोषे पञ्जिकायां शूलपरिणाम शूलनिदानम् ।

बस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा ।
विनामो वङ्क्षणानाहः स्याल्लिङ्गं मूत्रनिग्रहे ॥१॥

मन्यागलस्तम्भशिरोविकारा जृम्भोपघातात् पवनात्मकाः स्युः । तथाक्षिनासावदनामयाश्च भवन्ति तीव्राः सह कर्णरोगैः ॥१॥

आनन्दजं वाप्यथ शोकजं वा नेत्रोदकं प्राप्तममुञ्चतो हि । शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन ॥१॥

मन्यास्तम्भः शिरःशूलमर्दितार्द्धावभेदकौ । इन्द्रियाणाञ्च दौर्बल्यं क्षवथोः स्याद्विनिग्रहात् ॥१॥

कण्ठास्यपूर्णत्वमतीवतोदः कूजश्च वायोरथवा प्रवृत्तिः । उद्गारवेगेऽभिहते भवन्ति घोराविकाराः पवनप्रसूताः ॥१॥

न्येषामपि क्रोधादीनां विधारणं न तद्धेतुः स्वास्थ्यहेतुत्वात् यदाह चरकः लोभशोकभयक्रोधमनोवेगान् विधारयेदित्यादि सर्वोदावर्त्तेषु वायुरेव कारणं यदाह सुश्रुतः ।

सर्वेष्वेतेषु विधिवदुदावर्त्तेषु कृत्स्नशः । वायोः क्रियाविधातव्याः स्वमार्गप्रतिपत्तये इत्यादि ।

उद्धतेन वेगविधारणे नाहतस्य वायोर्वर्त्तनमित्युदावर्त्तनिरुक्तिः अन्ये तु वायोरूर्द्ध्वमावर्त्तगमनमित्याहुः ।

कण्डूकोठारुचिव्यङ्गशोथपाण्ड्वामयज्वराः ।
कुष्ठवीसर्पहृल्लासाश्छर्दिनिग्रहजा गदाः ॥१॥

मूत्राशये वै गुदमुष्कयोश्च शोथो रुजा मूत्रविनि-
ग्रहश्च । शुक्राश्मरी तत्स्रवणं भवेच्च ते ते वि-
कारा विहते च शुक्रे ॥१॥

तन्द्राङ्गमर्दावरुचिः श्रमश्च क्षुधाभिघातात् कृ-
शता च दृष्टेः ॥१॥

कण्ठास्यशोषः श्रवणावरोधस्तृष्णाभिघातात्
हृदयेव्यथा च ॥१॥

श्रान्तस्य निःश्वासविनिग्रहेण हृद्रोगमोहावथवा
वापि गुल्मः ॥१॥

जृम्भाङ्गमर्दोऽक्षिशिरोऽतिजाड्यं निद्रादिवा-
तादथावपि तन्द्रा ॥१॥२॥

तत्र अश्रुश्रवादेव व्यापकत्वात् छत्रिणो गच्छन्तीति न्या-
येन वा गमनीयम् ॥१॥

उक्तवाताद्युदावर्त्तानां क्रमेण लक्षणमाह ।

वातेत्यादि । अन्य इति तोदशूलादयः भेदनं भेदः
विनाम आनाह पीडयानत गात्रत्वं नेत्रोदकं नेत्र प्राप्तमा-
गतं अमुञ्चतो नरस्येति शेषः । चकारात्तन्त्रान्तरोक्त प्रति-
श्याय हृद्रोगारुचि प्रभृतीनां ग्रहणं अर्द्धावभेदोऽर्द्धशिरः
शूलं कूजोऽव्यक्तभाषणमिति कार्त्तिकः । वायोरप्रवृत्तेरत्

करोति जीर्णे त्वधिकं प्रकोपं भुक्ते मृदुत्वं समुपैति यश्च। वातात् स गुल्मो न च तत्र रूक्षं कषायतिक्तं कटु चोपशेते ॥५॥

कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्रोधातिमद्यार्कहुताशसेवा। आमाभिघातो रुधिरञ्च दुष्टं पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥१॥

ज्वरः पिपासा वदनाङ्गरागः शूलं महज्जीर्यति भोजने च। स्वेदो विदाहो व्रणवच्च गुल्मः स्पर्शासहः पैत्तिकगुल्मरूपम् ॥६॥

शीतं गुरुस्निग्धमचेष्टनञ्च संपूरणं प्रस्वपनं दिवा च। गुल्मस्य हेतुः कफसम्भवस्य सर्वस्तु दुष्टोनिचयात्मकस्य॥७॥

स्तैमित्यशीतज्वरगात्रसाद हृल्लासकासारुचिं

स्थानान्तरगमनम्। संस्थानविकल्पो यथा कदाचिदल्पः कदाचिन्महान् ह्रस्वो दीर्घो वेति रुजाविकल्पो यथा कदाचिदल्पा कदाचिन्महती तोदरूपा अनेकरूपा वेति न च तत्रो पशेतेन सुखयति ॥५॥

आमाभिघात इति विदग्धाजीर्णजनितदुष्टरसेनाभिभवः अन्ये तु आमाभिघातादिति पठन्ति। तत्राम उक्तरूपः। अभिघातो लगुडादेः रक्तदूषको ज्ञेयः। जीर्यतीति अत्यर्थं व्रणवत् स्पर्शासह इति योज्यम् ॥६॥

गौरवाणि । शैत्यं रुगल्पा कठिनोन्नतत्वं गुल्मस्य रूपाणि कफात्मकस्य ॥७॥

निमित्तरूपाण्युपलभ्य गुल्मे द्विदोषजे दोषबलाबलञ्च । व्यामिश्रलिङ्गानपरांश्च गुल्मांस्त्रीनादिशेदौषधकल्पनार्थम् ॥८॥

महारुजं दाहपरीतमश्मवद्घनोन्नतं शीघ्रविदाहि दारुणम् । मनः शरीराग्निबलापहारिणं त्रिदोषजं गुल्ममसाध्यमादिशेत् ॥९॥

संपूरणं तृप्तिभोजनं सर्वं इति वातजाद्युक्तः निचयात्मकस्य सन्निपातजस्य कठिनोन्नतत्वं गुल्मस्य ॥७॥

द्वन्द्वात्मकेषु त्रिषु कार्य्यहेतु लक्षणातिदेशार्थमाह । निमित्तेत्यादि । निमित्तानि च रूपाणि चेति द्वन्द्वः । दोषबलाबलञ्चेत्यनेन सह द्विदोषज द्वन्द्वजत्रयेण एकोल्वणादि द्विदोषजोऽपि ग्राह्य इति दर्शयति अन्यथा बहुत्वापत्तेः औषधकल्पनार्थमिति एकदोषजाभिहित चिकित्सामेलकेन तान् चिकित्सेदित्यर्थः ॥८॥

अश्मवत् घनोन्नतं पाषाणवत् कठिनमुन्नतञ्च । मन इत्यादि मनोऽपहारिणं मनोवैकल्यकारिणं शरीरापहारिणं कृशत्ववैवर्ण्यकरम् । अग्न्यपहारिणं अग्निवैषम्यकरं बलापहारिणं असामर्थ्यकरं नन्वसाध्यमिति विरुद्धं सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिरिष्यत इति सुश्रुत वचनात् । नैव मयञ्च विज्ञतिविषमसमवेतोऽसाध्यः । प्रकृ-

नव प्रसूताहितभोजनायां या चामगर्भं विसृजेदृतौ च। वायुर्हि तस्याः परिगृह्य रक्तं करोति

तिमम समवेतमु साध्य इत्याहुः। ननु सोऽप्यसाध्यः यदाह सुश्रुतः सर्वात्मके सर्वरुजोपपन्नं साध्याप्यसाध्यं प्रवदन्ति तज्ज्ञाः। उच्यते। तस्यापीति अपि शब्दादचिरोत्थितः साध्यो विशुद्धमिति सम्प्रदायात् इति गयदासः ॥८॥

आमगर्भं विसृजेदिति नवममासादर्वाक्प्रसूते। ऋतौ आर्त्तव प्रवृत्तिकाले। अहित भोजनेति सम्बन्धः। एतच्चो-पलक्षणार्थं तेनाहाराचारादिकं ज्ञेयम्। यदाह चरकः।

(५) ऋतावनाहार तया भयेन विरूक्षणैर्वेगविधारणैश्च।
संस्तम्भनोल्लेखनयोनिदोषैर्गुल्मः स्त्रियारक्तभवोऽभ्युपैति ॥

पैत्तिकस्य पैत्तिकगुल्मस्य विशेषणं पैत्तिकगुल्मात् विशेषलक्षणम्। पिण्डितः समुदितः एककालेऽस्य अव-भारतो एतदेव स्फुटयति नाङ्गैरवयवैश्चिरात् स्पन्दत इति सम्बन्धः समगर्भलिङ्ग इति आर्त्तवा(६)दर्शनं मुखस्रवण

चैव विधिवदाचरितव्या हि यतः कारते वर्जिते इति अस्मपि कर्म-कालक्रियापि अल्पबुद्धयैः वक्ष्यमाणं दोषं निहन्यादित्यर्थः।

(५) ऋतावनाहारतयेत्यादि। ऋतौ ऋतुकाले अनाहारतया निरन्नतया भयेन भाविदुःखजनकव्यापारेण विरूक्षणैः रूक्षद्रव्य भोजनैः वेगविनिग्रहैः वेगविधारणैः संस्तम्भनोल्लेखनं वस्त्रादिभिः शोणितधा-रणार्थं योन्यन्तरनिपीडितं तदेव योनिदोषस्तैरक्तभवो गुल्मः स्त्रियं अभ्युपैति अधिगच्छतीत्यन्वयः।

(६) आर्त्तवादर्शनेत्यादि। आर्त्तवादर्शनं ऋतुकालीन शोणिता-

गुल्मं सरुजं सदाहम्। पैत्तस्य लिङ्गेन समान लिङ्गं विशेषणञ्चाप्यपरं निबोध। यः स्पन्दते पिण्डित एव नाङ्गैश्चिरात् स शूलः समगर्भलिङ्गः॥ सरौधिरः स्त्रीभव एव गुल्मो मासे व्यतीते दशमे चिकित्स्यः॥१०॥

सञ्चितः क्रमशो गुल्मो महावास्तु परिग्रहः।
कृतमूलः शिरानद्धो यदा कूर्म इवोत्थितः॥

स्तनमुख कृष्णत्व दोहदादि गर्भलक्षणयुक्तः एतच्च व्याधिप्रभावात् यथा ऽयार्शसोः स्त्रीरिरंसाकृष्णा त्वङ्नखादयः। अन्ये तु समगर्भलिङ्गोऽविकृतगर्भलिङ्ग इत्याहुः। उक्तविशेषणैरेव स्त्रीभवत्वे लब्धे स्त्रीग्रहणेन कुमारीमति दृष्टाञ्च निषेधयति अनुक्तन्तु भोगारणस्कत्वात्तयोर्व्यतीतेऽतिक्रान्ते गर्भसमानलिङ्गत्वेन संशयः गर्भो वा रक्तगुल्मो वा इति तच्छङ्कानिरासार्थं दशमे मासे व्यतीत इत्युक्तं नवमदशमयोः प्रसवकालत्वादित्येके। तन्न। यः स्पन्दते पिण्डित एव नाङ्गैरित्यादि नैव विशेष दर्शनेन संशयस्य निर्णीतत्वात्। गर्भो हि निरन्तरं प्रत्यङ्गैर्निःशूकं स्पन्दते। गुल्मस्तु एतद्विपरीते न। किन्तु नवमे दशमे प्रसूत इत्युत्सर्गः। न तु नियमः तदधिककालेऽपि प्रसवदर्शनात्

दर्शनं पुरुषस्पर्शं सुखेन जनयत्यं स्तनमुखकृष्णत्वं चाप्रनिभः स्तनाग्रः। दोहदः गर्भिणी मनोरथः सकट्वाद्यादि विषयकः आदिना श्यामता प्रभृतीनां ग्रहणं। तथाच गर्भलक्षणमाह वाग्भटः। क्षामता गरिमा कुक्षेर्मूर्च्छाच्छर्दिररोचकं। जृम्भा प्रसेकः सदनं रोमराज्याः प्रकाशनं। अम्लेष्टता स्तनौ पीनौ सस्तन्यौ कृष्णचूचकौ॥

दौर्बल्यारुचिहृल्लासकासच्छर्द्यरतिज्वरैः ।
तृष्णातन्द्राप्रतिश्यायैर्युज्यते न स सिध्यति ॥
गृहीत्वा सज्वरं श्वासच्छर्द्यतीसारपीडितम् ।

आगमाच्च उक्तं हि चरके° तं स्त्रीप्रसूते सुचिरेण गर्भं दुष्टो यदा वर्षगणैरपि स्यादिति । तस्मान्नेदं दशममास व्यतिक्रमे चिकित्साविधानस्य प्रयोजनं किन्तु व्याधिक्रम-ज्ञिप्त्या तावतैव कालेन तस्य चिकित्सया सुखोच्छेदनमिति यथा ज्वरे पुराणे एव क्षीरपानविरेचने उक्तं हि तन्त्रा-न्तरे । रक्तगुल्मे पुराणत्वं सुखसाध्यस्य लक्षणमिति पुराणता चास्य दशममासव्यतिक्रमेणैव भवति । अन्यच्च ना प्युक्तं यदार्वाक् रक्तभेदनं क्रियते तदा गर्भशय्यां क्षीणाति-तल्लीनत्वाद्रक्तस्य । एकादशमासे तु परिपिण्डित गुल्मे स्नेहादिनोपस्कृतदेहाया न गर्भशय्याया विकृतिमाद-धातिरक्तभेदनमिति ॥१०॥

चिरजस्यावस्थायामसाध्यत्वमाह ।

वर्धित इत्यादि । महावास्तुपरिग्रहः सकलोदरव्या-पीन्नतमूलो धात्वन्तरायगामी शिरानद्धः सिराजालवान् हृदयादौ संगृहीत्वाग्रीवोन्नतमिनं कर्षति मरणायेति शेषः ग्रन्थिभूतता ग्रन्थिरूपस्य गुल्मस्याकस्मादिलयमिति ।

---

(०)तं स्त्री प्रसूत इत्यादि । यदा वर्षगणैरपि गर्भः पुष्टः स्यात् तदा तं गर्भं सुचिरेण स्त्री प्रसूते इत्यन्वयः । अन्यच्च यदाह भावप्रकाशे प्रसव-काल, निरूपणे । नवमे दशमे मासि नारी गर्भं प्रसूयते । एकादशे द्वाद-शे च ततोऽन्यत्र विकारतः ॥

हृन्नाभि हस्तपादेषु शोथः कर्षति गुल्मिनम्॥
श्वासः शूलं पिपासान्नविद्वेषो ग्रन्थिमूढ़ता।
जायते दुर्बलत्वञ्च गुल्मिनोमरणाय वै: ॥११॥

ननु चान्तर्विद्रधिगुल्मयोः को भेदः समानस्थानसम्भव-त्वात् उच्यते विद्रधिः पच्यते गुल्मो न पच्यते निराश्रय-त्वात् यदाह सुश्रुतः न विबन्धोऽस्ति गुल्मस्य विद्रधिः स निबन्धनः। गुल्ममतिष्ठति दोषेषु विद्रधिर्मांसशोणिते। विद्रधिः पच्यते तस्माद्गुल्मश्चापि न पच्यते। ननु गुल्-मोपि पच्यते एव। यदाह चरकः॥

[८]विदाह शूलसंक्षोभस्वप्ननाशारतिज्वरैः।
विदह्यमानं जानीयाद्गुल्मं तमुपनाहयेदिति॥

उच्यते गुल्मो न पच्यते निराश्रयत्वात् यदा तु का-रणवशादाश्रयं मांसादिक मासादयति वातोपशमनार्थं कृतस्वेदादिभिर्वा रक्तदुष्टिर्भवतीति। तदा पच्यमानो विदा-हनिमित्तकं विद्रधित्वमाप्नोति। उक्तं हि सर्वं शोथवि-दाहित्वात् विद्रधीत्यभिधीयते। नहि यस्मात् विकारात् यदुत्पद्यते विकारान्तरं तत् स एव [९]भवतीति। माभूत्

(८) दाहशूलेत्यादि। दाहादिज्वरान्तैर्विदह्यमानं पच्यमानं गुल्मं जानीयात् तं गुल्मं उपनाहयेत् स्वेदयेत्।

(९) यस्मादित्यादि। यस्मात् विकारात् यदुत्पद्यते तत् विकारा-न्तरं स एव भवति न हीति योज्यं तस्मात् न विद्रधिरेव गुल्म इति भाः॥

अथ हृद्रोगनिदानम् ॥

अत्युष्णगुर्वन्नकषायतिक्त श्रमाभिघाताध्यासन प्रसङ्गैः।
संचिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः ॥१॥
दूषयित्वा रसं दोषा विगुणा हृदयं गताः।
हृदि बाधां प्रकुर्वन्ति हृद्रोगन्तं प्रचक्षते॥२॥
आयम्यते मारुतजे हृदयं तुद्यते यथा।
निर्मथ्यते दीर्यते च स्फोट्यते पाट्यतेऽपि च॥३॥

स्त्रीष्वेव उदरं चाश्मर्य्येव च शर्करा इत्यादि शास्त्रान्तरविरोधो विस्तरः। तस्माद्विद्रधिः पठ्यते गुल्मो न पच्यत इति सिद्धान्तो निरपवादः ये तु रक्तविद्रधिं न पठन्ति तेषामयमभिप्रायः गुल्मे पक्वे विद्रधौ च पाटनशोधन रोपणादिः अपक्वे च विरेक लेपविम्लापनादिश्चिकित्सितस्य प्रायो विशेषाभावात्। अलं प्रसक्तिकार स्वीकारेणेति ॥११॥

इति व्याख्यामधुकोषे गुल्मनिदानम्।

गुल्मस्य हृदयं स्थानमुक्तं अतो हृदयसं कीर्त्तनात् हृद्रोगारम्भः। प्रसङ्गः शातत्वेन सेवा अत्युष्णादयो यथायोग्यं वातादीनां क्रमेण निदानमिति बोध्यम् ॥१॥

तस्य संप्राप्तिं सामान्यलक्षणञ्चाह।

तृष्णोषादाह चोषाः स्युः पैत्तिके हृदयक्लमः।
धूमायनञ्च मूर्च्छा च स्वेदः शोषो मुखस्य च॥४॥
गौरवं कफसंस्रावोऽरुचिस्तम्भोऽग्निमार्दवम्।
माधुर्य्यमपि चास्यस्य बलासावतते हृदि॥५॥
विद्यात्त्रिदोषन्त्वपि सर्वलिङ्गं तीव्रार्त्तितोदं क्रिमिजं सकण्डुम्।

दूषयित्वा रसमिति रसस्य हृदयाश्रयत्वात् विगुणः कुपिताः हृद्रोगमिति वाच्ये यद्बाधा प्रकर्षां तद्दोषभेदेन बाधावैचित्र्यज्ञापनार्थं बाधाशब्देन चात्र नानाविधा पीडेति जेज्जटः। भवन्ति पीडेति गयदासः। हृद्रोगमिति वा शोकष्यङ्रोगेष्विति रोगे परे हृदयस्य हृद्भावः अथवा हृदोरोगो हृद्रोगः॥२॥

आयम्यते आक्षिप्यत इव तुद्यते सूच्येव निर्मथ्यते दण्डेनेव दीर्य्यते छिद्येव भिद्यते स्फोट्यते आरयेव पाट्यते कुठारेणेव॥३॥

ऊषा किञ्चित् दाहः हृदयक्लमो हृदयाकुलत्वं ग्लानिरिति यावत्॥४॥

बलासावतते कुपितकफव्याप्ते दोषा दुष्टा दूषयितारो भवन्तीत्यागमात्॥५॥

सर्वलिङ्गमित्यनेन प्रकृतिसम समवायारब्धत्वमुक्तं तेन चिकित्साप्यस्य प्रत्येकं वातादिजस्य या साभिहितैव कार्य्या। अपचाराच्चैव ग्रन्थिरुत्पद्यते ततः क्रिमिसम्भव उक्तं

उत्क्लेदः ष्ठीवनं तोदः शूलं हृल्लासकस्तमः।

हि चरकेण त्रिदोषजेऽपि हृद्रोगे यो दुरात्मा निषेवते। तिलक्षीरगुडादीनि ग्रन्थिस्तस्योपजायते मर्म्मैकदेशे संक्लेदं रसश्चाप्युपगच्छति संक्लेदात् क्रिमयश्चास्य भवन्त्युपह-तात्मन इति॥ तस्यैवेदं लक्षणमाह। तीव्रार्त्तिं क्रिमितोदं मिश्रं सकण्डूमिति उत्क्लेदहृल्लासौ कफात् तमः पित्तात् छीवनं कफपित्तात्। अरुचिरित्यादिना क्रिमिजस्येति शेषाहः। गयदासस्त्वाह। व्याधिनेतत्पर्य्यन्तेन त्रिदोषज लक्षणमिति स्यादेतत् त्रिदोषपदं तावदत्र सुश्रुतेन पठि-तम् अतः सर्व्वमेव उत्क्लेदादि श्यावान्तं क्रिमिजलक्षणं भविष्यति नैवं विद्यात्त्रिदोषजत्वपि सर्व्वलिङ्गं तीव्रार्त्तिं तोदं क्रिमिजं सकण्डूमिति हृद्वलस्य वाक्यम्। उत्क्लेद इत्यादिस्तु एक एव श्लोकः सुश्रुतेन पठितः न तु पृथक्सन्नि-पातलक्षणं तत्त्रिदोषस्यानभिधाने सुश्रुते न्यूनत्वं स्यात् त्रिदोषाश्मरीवत् तस्यासम्भव एवेति चेत् नैवं तन्त्रान्तरेषु पठितत्वात् तथाच हारीतः।

सर्व्वाणि रूपाणि च सन्निपाताच्छिरोत्थितस्यापि वदन्त्य-साध्यमिति।

चरकेप्युक्तं हेतुलक्षणसंसर्गादुच्यते सान्निपातिकं। तथा त्रिदोषजे तु हृद्रोगे यो दुरात्मा निषेवत इत्यादि कण्ठपरेण तु त्रिदोषजपदं यत्पठितं सुश्रुते तत्क्रिमि-जस्यापि त्रिदोषत्व व्याख्यानार्थमाचष्टे। ननु दोषजावा-न्तरावस्थाविशेषत्वात् क्रिमिजोऽपि दोषज एव तत्कथं

अरुचिः श्यावनेत्रत्वं शोषश्च क्रिमिजे भवेत् ॥६॥
क्लमः सादो भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः ।
क्रिमिजे क्रिमिजातीनां श्लैष्मिकाणाञ्च ये मताः
॥७॥

अथ मूत्रकृच्छ्र निदानम् ।

व्यायाम तीक्ष्णौषधरूक्षमद्य प्रसङ्गनित्य द्रुत-

हृद्रामयः पञ्चविध इति नैवं रोगान्तरेऽपि रोगस्य पृथक् दर्शनात् यदुक्तं निदानार्थकरेत्यादि त्रिदोषजत्वमुक्तमपि प्रकृतिसम समवायत्वाद्दोषजम् ॥६॥

सर्वेषामुपद्रवमाह ।

क्लम इत्यादि । श्लैष्मिकाणात् क्रिमीणां ये उपद्रवास्ते क्रिमिजहृद्रोगेऽपि स्युः । ते च हृल्लासास्य स्रवणाविपाका-दयः ॥७॥

इति व्याख्यामधुकोषे हृद्रोगनिदानम्[1] ।

तन्त्रोत्तरे मर्म्मशते त्रीणि मर्म्माणि शिरोहृदयवस्तयः प्रधानानि । तत्र हृदयगतविकारानभिधाय वस्तिगतविकारानाह ।

---

(८) स भवतिश्चादि । शीर्षैव कदरम् अमूर्ध्वेन शर्करा इति शास्त्रोक्त विरोधविस्तारो माधवलिखिति ।

इति व्याख्यामधुकोषपञ्जिकायां गुल्मनिदानम् ॥

(1) हृद्रोगनिदानम् बहुमत्वादुपेक्षितम् ॥

पृष्ठयानात् । आनूपमांसाध्यशनादजीर्णात्
स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ ॥१॥

पृथङ्मलाः स्वैः कुपिता निदानैः सर्वेऽथवा कोपमुपेत्य बस्तौ । मूत्रस्य मार्गं परिपीडयन्ति यदा तदा मूत्रयतीह कृच्छ्रात् ॥१॥

तीव्रार्त्तिरुग्वङ्क्षणबस्तिमेढ्रे स्वल्पं मुहुर्मूत्रयतीह वातात् ॥१॥

पीतं सरक्तं सरुजं सदाहं कृच्छ्रं मुहुर्मूत्रयतीह पित्तात् ॥१॥

बस्तेः सलिङ्गस्य गुरुत्वशोथौ मूत्रं सपिच्छं कफमूत्रकृच्छ्रम् ॥१॥

सर्वाणि रूपाणि तु सन्निपातात् भवन्ति तत् कृच्छ्रतमं हि कृच्छ्रम् ॥१॥

व्यायामेत्यादि । मूत्रकृच्छ्राणीति मूत्रस्य कृच्छ्रेण महता दुःखेन प्रवृत्तिः अष्टाविति दोषैः पृथक् त्रीणि सन्निपाते नैकं शल्यज पुरीषजःशुक्रजाश्मरीजानीत्येकैकानि । ननु शर्कराख्यं मूत्रकृच्छ्रं सुश्रुतेन पठितं तन्त्रान्तरसंग्रहेऽपि पठितं अश्मरीशर्कराश्चैव तुल्यमित्यादिना तत् कथं अष्टौ न नव भवन्ति उच्यते अश्मरी शर्कराभेद एव ॥ यदाह वृद्धवाग्भटः । एषाश्मरी मारुतभिन्नमूर्त्तिः स्याच्छर्करा मूत्रपथात् क्षरन्तीति अतोऽश्मरीजं नैव शर्कराजमपृथगिति

मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा। मूत्रकृच्छ्रं तदा घाताज्जायते भृशदारुणम्॥ वातकृच्छ्रेण तुल्यानि तस्य लिङ्गानि निर्दिशेत्॥१॥

शकृतस्तु प्रतिघाताद्वायुर्विगुणतां गतः। आध्मानं वातशूलञ्च मूत्रसङ्गं करोति च॥१॥

अश्मरीहेतु तत्पूर्वं मूत्रकृच्छ्रमुदाहरेत्।
शुक्रे दोषैरुपहते मूत्रमार्गे विधाविते॥
सशुक्रं मूत्रयेत् कृच्छ्राद्वस्तिमेहनशूलवान्॥२॥
अश्मरी शर्करा चैव तुल्यसम्भवलक्षणे॥
विशेषं शर्करायाश्च शृणु कीर्त्तयतो मम।
पच्यमानाश्मरी पित्तात् शोष्यमाणा च वायुना
विमुक्तकफसन्धाना क्षरन्ती शर्करा मता॥१॥

मन्यमानेन ख्यातमित्यपठत् सलिङ्गस्य समेदस्य च पिच्छं पिच्छिलं कृच्छ्रतरं कष्टसाध्यं कृच्छ्रं मूत्रकृच्छ्रं मूत्रवाहिष्विति मूत्रवह स्रोतःसु॥१॥

अश्मरीजमाह।

अश्मरीहेतु तत्पूर्वमिति अश्मरीहेत्विति लक्ष्यपदं तत्पूर्वमिति लक्षणपदं तत्पूर्व्वमिति अश्मरी पूर्व्वकम्॥१॥

मूत्रकृच्छ्रहेतुत्वेनोक्तयोरश्मरीशर्करयोः समानत:-
मतान्तरभेदमाह।

अश्मरीत्यादि। अश्मरीशर्करा चैवेत्यनन्तरं एते द्वा-

हृत्पीडा वेपथुः शूलं कुक्षावग्निश्च दुर्बलः ।
तया भवति मूर्च्छा च मूत्रकृच्छ्रञ्च दारुणम् ।
मूत्रवेगनिरस्ताभिः प्रशमं यातिवेदना ॥
यावदस्याः पुनर्नैति गुडिका स्रोतसोमुखम् ॥३॥

अथ मूत्राघातनिदानम् ॥

जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश[1] ॥

व्याख्यं तुल्यसम्भवलक्षणौ इत्यनेन द्विवचनान्तेन सम्बन्धनीयं यथा तयोर्वर्धन्तुः पादान् राजाराज्ञी च याचतीतिवत् तुल्यः सम्भव उत्पत्तिकारणं लक्षणञ्च ययो ये तौ तथा तुल्यं सम्भवलक्षणयोरिति पाठान्तरे तुल्यं सदृशौ तौरित्यत उक्तं सम्भवलक्षणयोरिति तुल्यासम्भवलक्षणयोरिति पाठान्तरे स एवार्थः विशेषणं विशेष्य क्रमेण विहन्तीति मध्यमानेत्यादि । कफसन्धानं कफेनावयवसंश्लेषः कफ एवानुसन्धानं कफसन्धानं सन्धीयतेऽनेनेतिव्युत्पत्त्यात तेन पित्तपाकवातशोषौ सन्धान विमोचहेतुत्वेनोक्तौ चरन्तीति वहितः चरके हि स्वाच्छर्करामूत्रपथात् चरन्तीत्येवं पठितं कुक्षौ शूलमिति सम्बन्धः तया शर्करया ॥३॥

इति व्याख्यामधुकोषे मूत्रकृच्छ्र निदानम् ।

---

(1) अश्मरी चेत्यादि । अश्मरी चेव अश्मरीजं अश्मरी चेतर्यकोति विग्रहात् । अश्मपदं अश्मरीवाचकपदं तद्वतोम्ल कथम यद्यपि अश्मरीं प्रकृते च अश्मरीजं मूत्रकृच्छ्रं कथ्यीकथम तद्पुर्णमिति कथम यद्यपि कथमलवाधारण धर्मवचनं तकाराः शाखावत्वमित्यादि तथाच अश्मरीजं मूत्रकृच्छ्रं भवति तत्र कथं ज्ञेयमित्यत उक्तं तद्पूर्वमिति

प्रायो मूत्रविघाताद्यैर्वातकुण्डलिकादयः॥१॥

रौक्ष्याद्वेगविघाताद्वा वायुर्बस्तौ सवेदनः।

मूत्रमाविश्य चरति विगुणः कुण्डलीकृतः॥

मूत्रमल्पाल्पमथवा सरुजं संप्रवर्त्तते।

वातकुण्डलिकां तान्तु व्याधिं विद्यात् सुदारुणाम्॥२॥

आध्मापयन् बस्तिगुदं रुद्ध्वा वायुश्चलोन्नतम्॥

कुर्य्यात्तीव्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीं॥३॥

मूत्रविकारसाधर्म्यात् मूत्राघातानाह।

जायन्त इत्यादि। मूत्रकृच्छ्रमूत्राघातयोश्चायं विशेषः मूत्रकृच्छ्रे कृच्छ्रत्वमतिशयितं ईषद्विबन्धः। मूत्राघाते तु विबन्धो बलवान् कृच्छ्रत्वमल्पमिति मूत्रविघाताद्यैर्मूत्रवेगविधारणादिभि आद्यशब्देन पुरीषशुक्रवेगविघातादीनां रूक्षाशनादीनाञ्च ग्रहणं वातकुण्डलिकादयः त्रयोदशेति सम्बन्धः॥१॥

आविश्येत्यत्र आविध्येति पाठान्तरे स एवार्थः। चरति विगुणः कुपितः कुण्डलीकृत इति। अतिवात्यावद्धस्तेव भ्रमं तिष्ठतीति॥२॥

अष्ठीलामाह।

आध्मापयन्नित्यादि। रुद्धेति बस्तिगुदमेव अष्ठीला तुल्यत्वात् अष्ठीला सा च वातव्याधावुक्ता॥३॥

वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः। निरुणद्धि मुखं तस्य वस्तेर्वस्तिगतोऽनिलः॥ मूत्रसङ्गो भवेत्तेन वस्तिकुक्षि निपीडितः। वातवस्तिः स विज्ञेयो व्याधिः कृच्छ्रप्रसाधनः॥४॥
चिरं धारयतो मूत्रं त्वरया न प्रवर्त्तते। मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते॥५॥
मूत्रस्य वेगेऽभिहते तदुदावर्त्तहेतुकः। अपानः कुपितो वायुरुदरं पूरयेद्भृशम्॥ नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनम्॥ तन्मूत्रजठरं विद्यादधोवस्तिनिरोधनम्॥६॥

वातवस्तिमाह।

वेगमित्यादि। वस्तिकुक्षिनिपीडित इति वस्तौ कुक्षौ च निपीडितः संपिण्डितः वायुरिति सम्बन्धः वस्तिं कुक्षिं निपीडयन इति पाठान्तरे वस्तिकुक्ष्योर्बाधाकर इति॥४॥

मूत्रातीतमाह।

चिरमित्यादि त्वरयान प्रवर्त्तते इति मूत्रमित्यनुषज्यते। मेहमानस्य मूत्रं त्यजतः वहमानस्येति पाठान्तरं सुगमं॥५॥

मूत्रजठरमाह।

मूत्रवेग इत्यादि। तदुदावर्त्तहेतुक इति मूत्रवेगधारणजनितोदावर्त्तनिमित्तः अधोवस्ति निरोधनमिति वस्तेरधोभागे विबद्धकारकम्॥६॥

वस्तौ वाप्यथवा नाभ्ये मणौ वायुश्च देहिनः ।
मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः॥ स्रवे-
च्छनै रल्पमल्पं सरुजं वाथनिरुजं । विगुणा-
निलजो व्याधिः समूत्रोत्सङ्गसंज्ञितः॥ ७॥
रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ ।
मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम॥ ८॥
अन्तर्वस्ति मुखेवृत्तः स्थिरोऽल्पः सहसा भवेत्॥
अश्मरीतुल्यरुगग्रन्थिर्मूत्रग्रन्थिः स उच्यते॥ ९॥
मूत्रि तस्य स्त्रियं यातो वायुना शुक्र मुद्धतम्॥

मूत्रोत्सङ्गमाह ।

वस्ताविति । नाभ्ये मेढ्रमणौ मेढ्राग्रे । सज्जेत संसक्तं सत् न प्रवर्त्तते सरक्तंवा प्रवाहत इति प्रवाहणा कुपित-वायुना वस्त्यादिभेदजनित रक्तयुक्तं मूत्रं प्रवर्त्तते ॥ ७॥

मूत्रक्षयमाह ।

रूक्षस्येत्यादि । तदाह्वयमिति मूत्रक्षयाख्यं कारणे कार्य्योपचारात् ॥ ८॥

मूत्रग्रन्थिमाह ।

अन्तरित्यादि । अन्तर्वस्ति मुखे वस्ति मुखस्याभ्यन्तरे ग्रन्थिर्गुड़काकारः । ननु स्थानवेदनाकारणाना मभिन्न-त्वात् अश्मर्य्यां सह को भेदः उच्यते अश्मर्य्यां पित्तादिकं कुप्यति अत्र तु रक्तमेव । उक्तं तन्त्रान्तरे ।

रक्तं वातकफाद्दुष्टं वस्तिद्वारेषु दारुणम् ॥
ग्रन्थिं कुर्य्यात् सकृच्छ्रेण मूत्रेणान्नं तदाहृतम् ।

स्य नाच्चुतं मूत्रयतः प्राक्पश्चाद्वा प्रवर्त्तते॥
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते ॥१०॥
व्यायामाध्वातपैः पित्तं वस्तिं प्राप्यानिलान्वितं।
वस्तिं मेढ्रं गुदञ्चैव प्रदहेत् स्रावयेदधः ॥
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा। कृ-
च्छ्रात् पुनः पुनर्जन्तोरुष्णवातं ब्रुवन्ति तं ॥११॥
पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत्
कृच्छ्रान्मूत्रं तदा पीतं श्वेतं रक्तं घनं सृजेत् ॥
सदाहं रोचनाशङ्खचूर्णवर्णं भवेत्तु तत् ।

त्वश्मरी सम मूत्रन्तद्रक्तग्रन्थिं प्रपद्यते इति ।

विशेषज्ञानन्तु कुत इति चेत् अश्मरीपूर्वकपोत्कस्य मूते रक्त अगन्धत्वादिर्भावाभावाभ्यां ॥८॥

मूत्रशुक्रमाह ।

मूत्रितस्येत्यादि । मूत्रितस्य मूत्रवेगिनः तस्य स्थानाच्चुतं स्वस्थानाद्भ्रष्टं शुक्रम् ॥१०॥

उष्णवातमाह ॥

व्यायामात् विरोधि सौम्यधातुक्षयात्तेजोवृद्ध्या पित्त-वृद्धिः । अनिलान्वितं अनिलसंयुतम् । अनिलाहतमिति पाठान्तरं सुगमं सरक्तमीषल्लोहितम् ॥११॥

मूत्रसादमाह ।

पित्तमित्यादि । संहन्येते घनानी क्रियते शुष्कत्वं

शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तम्॥१२॥
रूक्षदुर्बलयोर्वातेनोदावर्त्तं शकृद्यदा॥ मूत्र
स्रोतोऽनुपद्येत विट्संसृष्टं तदा नरः॥ विड्-
गन्धं मूत्रयेत् कृच्छ्रात् विड्विघातं विनिर्दिशेत्
॥१३॥

द्रुताध्वलङ्घनायासैरभिघातात् प्रपीडनात्।

तन्मूत्रं पित्तेन रोचनाभं कफेन शङ्खचूर्णाभं समस्तवर्णं वा सर्ववर्णं सन्निपातात् ॥१२॥

विड्विघातमाह।

रूक्षेत्यादि। अनुपद्येत प्राप्नुयात् विड्गन्धमित्यत्र वा शब्दो द्रष्टव्यः ॥१३॥

ननु अष्ठीला चेत्यपि वातवस्तिवद् स्यात् कथं वातवस्तिरुक्तमिति चेन्नैवं तथात्वे तत्पूर्वनिबन्धनेन पौनरुक्त्यापत्तिर्यत उभयोरप्येकार्थत्वात्कृत्वादिति ध्येयम्। अष्ठीलावत् संज्ञेव इति। अवयवानां परस्पर संयोगः सम्बन्ध इत्यर्थः। अथवा अष्ठीलेव सन्धानं यस्य स सम्बन्धलक्षणः तथाच विपुलं सन्धानं यस्या सा इति विग्रहः। मूत्रौक सादमेव द्विधा वर्तितमिति तदा मूत्रौकसादं तं विद्याद्रोगं पित्तकृतं बुधः। शुभ्रं भवति यच्चापि शङ्खचूर्णं प्रपाण्डुरम्। पिच्छिलं संहतं श्वेतं तथा कफकृतं प्रवर्त्तते। मूत्रौकसादं तं विद्यादमेयं श्लेष्मजं तथा।

(२) द्वादश मूत्राघाता इत्युक्तमिति। यथा वातकुण्डलिकाष्ठीला वातबस्तिरेव च। मूत्रातीतः सजठरो मूत्रोत्सङ्गः क्षयस्तथा। मूत्रग्रन्थिर्मूत्रशुक्रमुष्णवातस्तथैव च मूत्रौकसादौ द्वौ चापि रोगा द्वादश कीर्त्तिता इति।

स्वस्थानाद्बस्तिरुद्वृत्तः स्थूलस्तिष्ठति गर्भवत्॥
शूलस्पन्दनदाहार्त्तो बिन्दुं बिन्दुं स्रवत्यपि।
पीडितस्तु सृजेद्धारां संस्तम्भोद्वेष्टनार्त्तिमान्।
बस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमम्॥
पवनप्रबलं प्रायो दुर्निवारमबुद्धिभिः॥१४॥
तस्मिन् पित्तान्विते दाहः शूलं मूत्रविवर्णता।
श्लेष्मणा गौरवं शोथः स्निग्धं मूत्रं घनं सितम्॥१५॥
श्लेष्मरुद्धबिलो बस्तिः पित्तोदीर्णो न सिध्यति॥१॥
अविभ्रान्तबिलः साध्यो न तु यः कुण्डलीकृतः॥१६॥

बस्तिकुण्डलमाह।

द्रुतेत्यादि। अद्रुतगमनोत्पतनम् उद्वृत्तः स्वस्थानादूर्ध्वं गतः। गर्भवदिति गर्भिण्या उदरान्तर्गतापत्यवत् एतेन बस्तिपुटस्य पार्श्वगमनं दर्शितं पीडित इति नाभेरधः उद्वेष्टनरूपार्त्तिः उद्वेष्टनार्त्तिः शस्त्रविषोपममिति॥१४॥ विभिन्नार्थसूचनार्थं प्रतिज्ञाशुभतोपदर्शनार्थं वा तस्यैव दोषान्तरानुबन्धेनोपलक्षणमाह। तस्मिन्नित्यादि। श्लेष्मणान्विते तस्मिन्नाति बोद्धव्यम्॥१५॥

तस्यैव साध्यत्वमाह।

श्लेष्मरुद्ध इति बिलं बस्तिमुखमुद्धिरं पित्तोदीर्णो उदीरितपित्तः स एवाविभ्रान्तबिलोऽनाहतबिलः। कण्डन कुण्डलीकृतोऽसाध्य इति साध्यः। अकुण्डलीकृतस्य साध्यत्वेनोक्तः॥१६॥

स्याद्वस्तौ कुण्डलीभूते तृण्मोहः श्वास एव च॥१७॥

कुण्डलीभूतस्यैव लिङ्गमाह ।

स्यादित्यादि । येनैतौ निरुद्धविघात वस्ति कुण्डली अश्रुते न पठितौ तेन हि मूत्रोदकमादमेव त्रिधापठित्वा द्वादश मूत्राघाता इत्युक्तं सर्वानभिधानन्तु पराधिकारत्वेनेति मन्तव्यम् ॥१७॥

इति व्याख्यामधुकोषे मूत्राघातनिदानम् ।

इति व्याख्यामधुकोषपञ्जिकायां मूत्रकृच्छ्र मूत्राघात निदानम् ।

अथ अश्मरीनिदानम् ॥

वातपित्तकफैस्तिस्रश्चतुर्थी शुक्रजापरा ।
प्रायः श्लेष्माश्रयाः सर्वा अश्मर्यः स्युर्यमोपमाः॥१॥
विशोषयेद्वस्तिगतं सशुक्रं मूत्रं सपित्तं पवनः कफं वा । यदा तदाश्मर्युपजायते तु क्रमेण पित्तेष्विव रोचना गोः ॥२॥

मूत्ररोधित्वसाधर्म्यादश्मरीमाह ।

वातेत्यादि । श्लेष्माश्रयाः श्लेष्म समवायिकारणाः शुक्रजां विना तत्र शुक्रस्यैव समवायिकारणत्वात् तथाच दृढबलः विशोषयेद्वस्तिगतं स शुक्रमिति एतच्च कामान्योक्तमपि विशेषेण सम्बध्यते तथाच मत्रादिस्तुत्वे दीर्घादीति विशेषण कराभ्यां सम्बध्यते । ननु कुलाः । अतएवात्र प्रायो

नैक दोषाश्रयाः सर्वा अथासां पूर्वलक्षणम्।
बस्त्याध्मानं तदासन्नदेशेषु परितोऽतिरुक्॥
मूत्रे बस्तसगन्धित्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः ॥२॥
[1] सामान्यलिङ्गं रुङ्नाभिसेवनी बस्तिमूर्द्धसु।
विशीर्णधारं मूत्रं स्यात् तया मार्गनिरोधने॥

ग्रहणं कृतवान्, अन्ये तु शुक्राश्मरीमपि कफकारण सिद्धामत्र विरोधाभावात् प्रायः शब्दश्चात्र विशेषार्थः यतोऽधमा इति अचतिचिकित्सिते अवश्यमेव मारकत्वात् चिकित्स्यैवेति वातशोषितेषु।(१)

नैकदोषाश्रया इति त्रिदोषजा उद्धतदोषेण व्यपदेशः। बस्तसगन्धत्वं बस्तसमानगन्धत्वम् ॥२॥

तासां सामान्यलक्षणमाह।

सामान्येत्यादि। रुक्शूलं बस्तिमूर्द्धा नाभेरधोदेशः। विशीर्णधारं विच्छेदधारं तया इत्यश्मर्या मार्गे मूत्रवाहि स्रोतः तदपायात् वायुना कदाचिदश्मरीकृतमार्गविरोध

---

(1) सामान्यलिङ्गमित्यादिमूलम्। अस्यश्लोक स्थानविशेषः सेवनी बस्तिमुष्कयोर्मध्यदेशः। नाभि सेवनी बस्तिमर्द्ध रुक्शूलं तया तया अश्मर्या मार्गे मूत्रवाहि स्रोतः सन्निरोधने विशीर्णधारं च विच्छिन्नधारं मूत्रं स्यात् तदपायते वायुना कदाचिदश्मरीकृत मार्गनिरोध व्यपगमात् अच्छम् अनाविलं गोमेदकोपमं गोमेदकवत् लोहित मनिलाहरणं मूत्रं सुखं यथासुखमाचरेत् प्रसावयेत् निश्चोतिच्छिद्रस्य रूपं तत् संघोषात् निरुद्धमार्गमूत्रेण पीडनात् अश्मरी संघट्टनाद्वा भूते जाते मूत्रप्रहारी साक्षात् संरक्तं मूत्रं प्रवर्तते आघातात् क्रन्दनादिकं नित्यमात् अतिरक्तेत इति तासां सामान्य लक्षणम्।

तद्व्यपायात् सुखं मेहेदच्छं गोमेदकोपमं।
तत्संक्षोभात् क्षते सास्रमायासाच्चातिरुग्भवेत्॥३॥
[२]तत्र वाताद्भृशं चार्त्तो दन्तान् खादति वेपते।
मृद्नाति मेहनं नाभिं पीड़यत्यनिशं क्वणन्॥
सानिलं मुञ्चति शकृत् मुहुर्मेहति बिन्दुशः॥
श्यावा रूक्षाश्मरी चास्य स्याच्चिता कण्टकैरिव॥४॥

व्यपगमात् मेहेत मूत्रयेत् अच्छमनाविलं गोमेदकोपम-मिति गोमेदको लोहितमणिः तद्वर्णं तत्संक्षोभात् विरुद्धमूत्रमार्गेण पीड़नात् अश्मरीसंघट्टनाद्वा। क्षते जाते मूत्रवहादौ सास्रं सरक्तं मूत्रं प्रवर्त्तते आयासात् प्रवाह-णादिजनित श्रमात् ॥३॥

क्वणन् आर्त्तनादं कुर्वन्, सानिलं सवातं मूत्रप्रवृत्त्यर्थं कृतातिकुन्थनात्। मेहतिबिन्दुश इति बिन्दुं बिन्दुं मूत्रयति बह्वल्पार्थात् शकारकादन्यतरस्यामिति बह्वर्थे शस् प्रत्ययः। श्यावेत्यादि। अश्मर्य्या आकार कथनं एतासां कष्टानां प्रत्ययस्थादिना साध्यासाध्य व्यापनार्थमित्यान्ये कारतास्तु दोषोचितचिकित्सार्थमित्यन्ये ॥४॥

---

(२) तत्र वातादित्यादिमूलम्। तत्र वाताद्भृशं अतिमात्रं आर्त्तो-नरः दन्तान् खादति वेपते मेहनं लिङ्गं मृद्नाति मर्द्दयति नाभिं पीड़यति अनिशं क्वणन् आर्त्तनादं कुर्वन् सानिलं सवातं शकृत् मुञ्चति मूत्रप्रवृत्त्यर्थं कृतकुन्थनात् बिन्दुशः बिन्दुं मेहति मूत्रयति अस्य नरस्य कण्टकैरिव चिता व्याप्ता श्यावा रूक्षा अश्मरी स्यात्। अत्र प्रमादेन वेनेति प्रत्यय प्रमाणाविरुध्यादि विधिनात्।

[१] पित्तेन दह्यते वस्तिः पच्यमान इवोष्मवान् ॥१॥
भल्लातकास्थिसंस्थाना रक्तपीतासिताश्मरी ॥५॥
[२] वस्तिर्निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः ॥२॥
अश्मरी महती श्लक्ष्णा मधुवर्णा खरासिता ॥६॥
[३] एता भवन्ति बालानां तेषामपि च भूयसा ।
आश्रयोपचयोल्पत्वात् ग्रहणाहरणे सुखा ॥७॥

पच्यमानः क्षारेणेव उष्मवान् उष्मस्पर्शः असिता-
कृष्णा ॥५।

श्लेष्मणामाह ।

वस्तिरित्यादि । श्लक्ष्णामसृणामधुवर्णा ईषत् पिङ्गल-
शुक्ला ॥६॥

एता इति त्रिदोषजा बालानां खुः तेषां तन्निदानाः-
भ्यासात् भूयसा प्रायेण तेन महतामपि त्रिदोषजा
भवन्ति तेषामेव बालानां ग्रहणाहरणे सुखा इति स-
म्बन्धः । आश्रयोपचयाल्पत्वादिति आश्रयो वस्तिः उप-

(१) पित्तेनेत्यादि भवन्ति । पित्तेन वस्तिर्दह्यते पच्यमान इति क्षारेणेव उष्णवात् उष्णस्पर्शः भल्लातकास्थि संस्थाना अश्मरी रक्ता पीता असिता कृष्णाख्यादिति बोध्यम् ।

(२) वस्तिर्निस्तुद्यत इत्यादि । श्लेष्मणा शीतलो गुरुर्वस्तिर्निस्तुद्यत इव अश्मरी महती श्लक्ष्णः मसृणा मधुवर्णा ईषत् पिङ्गलासिता शुक्ला च भवतीत्यन्वयः ।

(३) एता इत्यादि । एता त्रिदोषजा बालदिनचर्यता भूयसा

[१]शुक्राश्मरी तु महतां जायते शुक्रधारणात्।
स्थानाच्च्युतममुक्तं हि मुष्कयोरन्तरेऽनिलः॥
शोषयत्युपसंगृह्य शुक्रं तच्छुक्रमश्मरी। बस्ति
रुङ्मूत्रकृच्छ्रत्वं मुष्कश्वयथुकारिणी॥८॥

अथवा स्थौल्यं तयोरल्पत्वं तच्च देहाल्पत्वात् आहरणं पाटनादि पूर्वकमाकर्षणं सुखं तदर्थमेवाङ्गुलिभ्यां धारणं चाङ्गं हि श्रूयते (इत्यादि) ... श्लिग्धमधुराहारप्रियत्वाद्बालानां तेषामेवाल्पबस्तिकत्वादल्पमांसोपचयाच्च सुखग्रहणाहरणा भवन्तीति ॥७॥

तु शब्दोऽवधारणे तेन महतामेव न तु बालानां तेषां व्यवायासंप्राप्तेरभावात् न तु शुक्राभावात् अन्यथा प्रभावात्त्वं स्यात् शुक्रधारणादुपस्थित शुक्रवेगस्य मैथुनाकरणात् मुष्कयोरन्तरे मेढ्रे वा अन्तरेति शेषः। श्रूयते हि मेढ्रवृषणयोरन्तर इत्येवोक्तं मेढ्रवृषणमध्यगत बस्तिमुख इत्यर्थः। तत्रैव शुक्रवहस्रोतसो बस्तिमुखेन सह सम्बन्धात् तथाभूतं शुक्रमेवाश्मरी। बस्तिरुक् बस्तिशूलं मुष्कश्वयथुकारिणी वृषणयोः शोथकारिणी ॥८॥

बाहुल्येन बालानां श्लेष्मादिमलानां निदानाभ्यासात् तेषामेव बालानां अल्पबस्तिकत्वात् आश्रयो बस्ति उपचयः स्थौल्यं तयोरल्पत्वात् च आहरणे धारणे सुखा सम्यग्ज्ञानार्थः अर्थात् भिषजां भवन्तीति [illegible] ।

(१) शुक्राश्मरीत्यादि। शुक्राश्मरी महतामेव शुक्रधारणात् उपस्थित शुक्रवेगस्य मैथुनाकरणात् जायते तत्रानिलो मारुतः मुष्कयो

तस्या सुत्पन्नमात्रायां शुक्रमेति विलीयते ।
पीडिते त्ववकाशेऽस्मिन्नश्मर्य्येव च शर्करा ॥८॥
अणुशो वायुनाभिन्ना सा तस्मिन्ननुलोमगे ।
निरेति सह मूत्रेण प्रतिलोमे निबध्यते ॥
मूत्रस्रोतःप्रवृत्ता सा सिक्ता कुर्य्यादुपद्रवान् ॥९॥
दौर्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचिं ।
पाण्डुत्वमुष्णवातञ्च तृष्णां हृत्पीडनं वमिं ॥
प्रसूननाभिवृषणं बद्धमूत्रं रुजातुरम् ।
अश्मरी क्षपयत्याशु सिकता शर्करान्विता ॥१०॥

तस्यां शुक्राश्मर्य्यामिति वर्त्तते तु शब्दोऽवधारणे अवकाशेऽस्मिन्निति मेढ्रवृषणयोरन्तरे अस्मिन्नेव पीडिते सति विलीयते प्रविलयमापद्यत इत्यर्थः । अतएव सुश्रुतः पीडितमात्रे च तस्मिन्नेवावकाशे प्रविलयमापद्यत इति । सैवावस्थाभेदादश्मरी शर्करा पञ्चमी न भवतीत्याह । अश्मर्य्येव चेति चकारात् सिकतापि भवतीति मन्तव्यम् । अतएव शर्करा सिकतान्वितेति वक्ष्यति शर्करा सिकतयोश्च महत्त्वाल्पताभ्यां भेदः ॥८॥

कथमश्मरी शर्करा भवतीत्याह ।

अणुश इत्यादि । अणुशोऽल्पशः अस्यार्थे सुश्रुतः पवनेऽनुगुणे सा तु निरेत्यल्पा विशेषतः ॥ सा भिन्नमूर्त्तिर्वातेन शर्करेत्यभिधीयत इति ॥ मूत्रस्रोतः प्रवृत्ता सा सिक्तेति

मूत्रमार्गगता सति संलग्नेत्यर्थः। रुजातुरं शूलपीड़ित-मित्यर्थः ॥१०॥

इति व्याख्यामधुकोषे अश्मरीनिदानम्।

अन्तरे मेढ्रवृषणयोर्मध्ये बस्तिमुखे स्थानाच्युतं अयुक्तः विशेषयेद्दुष्टिगतं न शुक्रमित्यादिना सामान्यतो दोषज संप्राप्ति प्राप्तमूत्रपित्तादि योगरहितं केवलमिति शुक्रम् उपसंहृत्य स्त्रीत्वा शोषयति तच्छुक्राश्मरी तथाभूत शुक्रमेवाश्मरी बस्तिरुक् बस्तिशूलं कृच्छ्रमूत्रत्व करोति तथा मुष्कश्वयथुकारिणी वृषणयोः शोथकारिणी तस्यां शुक्राश्मर्याम् उत्पद्यमानायां सत्यां शुक्रमेव शुक्राश्मर्येव अश्मरीव अथवा मुष्कवृषणयोरन्तरे पीड़िते सति विलीयते प्रविलयमापद्यत इत्यर्थः। मेढ्रतावान्न पीड़िते सत्यपि न विलीयत इति भावः। अश्मर्येव च इति। अनुशः अण्वः वायुनाभिन्ना भिन्नमूर्त्तिरपि अश्मर्येव च शर्करा भवति चकारात् सिकतापि सा शर्करा तस्मिन् अनुलोमगे वायौ मूत्रेण सह निरेति निर्गच्छति प्रतिलोमे वायौ च विबद्धे मूत्रस्रोतः प्रसृता मूत्रमार्गगता सती द्रुतं शीघ्रम् उपद्रवान् पश्चमाणोपद्रवान् कुर्य्यादित्यर्थः उपद्रवमाह।

(७) दौर्बल्यमित्यादि। उद्दयातं उद्दयातास्य रोगविशेषम्। अस्याध्यतामाह प्रशून इत्यादि। प्रशूननाभि वृषणं बद्धमूत्रं रुजान्वितं नरं सिकता शर्करान्विता अश्मरी आशु नाशयति मारयतीत्यर्थः॥

इति व्याख्यामधुकोषे पञ्जिकायां अश्मरी निदानम्॥

अथ प्रमेहमधुमेहपीडकानिदानम्।

आस्यासुखं स्वप्नसुखं दधीनि[१] ग्राम्यौदकानूप-
रसाः पयांसि। नवान्नपानं गुडवैकृतञ्च
प्रमेहहेतुः कफकृच्च सर्वम्॥१॥

[१]चन्द्रोदय प्रणयपीवरदुग्धसिन्धुपरक्रमं वहति दिक्षु यदीय कीर्त्तिः तेन व्यधायि सुधिया विजयेन शिष्य प्रेम्णाश्मरीव्यवधि मधुकोष ग्रन्थः।

[२]श्रीकण्ठदत्तभिषजा गुरुभक्तिलेशादारभ्यते प्रभृति संप्रति मेहरोगात् सूक्तीर्विचिन्त्य मधुशीकरमुद्गिरन्ती-टीकाकृतः कतिपयस्य तदीय शेषः।

अश्मरीरोगानन्तरं वस्तिविकृति साम्यात्
प्रमेहनिदानमुच्यते।

आस्यासुखमित्यादि। आस्या उपविष्टस्य चेष्टा परम खेन कृतं सुखमास्यासुखं एवं स्वप्नसुखमिति द्रष्टव्यं तेनाशनादि दोषादास्यासुखं स्वप्नसुखं वा न प्रमेहहेतुः। गुड़-वैकृतमिति गुड़विकाराः शर्करादयः तथा गुड़विकाराश्च

(1) चन्द्रोदय प्रणयेत्यादि। यस्य शुभ्रकीर्त्तिः शुभ्रः प्रभूतत्वात् सागररूपः चन्द्रोदये प्रणयः प्रीतिस्तेन पीवरस्य स्फीतस्य दुग्ध सिन्धोः पुरक्रमं जलप्रवाहस्य क्रमं वहति तेन शिष्यप्रेम्णा सुधिया विजयेन अश्मरीरूप् अवधि यस्य एवम्भूतो मधुकोषग्रन्थः मधुकोषएव ग्रन्थः व्यधायि।

(२)श्रीकण्ठदत्त भिषजेत्यादि। संप्रति श्रीकण्ठदत्तभिषजा गुरुभक्ति-लेशात् कतिपयस्य टीकाकृतः मधुशीकरम् उद्गिरन्तीः सूक्तीः शोभना

मेदश्च मांसञ्च शरीरजञ्च क्लेदं कफोबस्तिगतं प्रदूष्य। करोति मेहान् समुदीर्णमुष्णै स्ता- नेव पित्तं परिदुष्यचापि। क्षीणेषु दोषेष्ववकृष्य धातुन् संदुष्यमेहान् कुरुतेऽनिलश्च॥२॥

भक्ष्याः प्रमेहहेतुरिति सर्व्वप्रमेहहेतुः कफकृच्च सर्व्वमित्य- नुक्तहेतुसंग्रहार्थमुक्तम्। एष साधारणो हेतुः। प्रमेहस्य विशेषहेतुस्तु चरके निदानस्थाने हायनकोद्दालकेत्या- दिना कफजस्य। उष्णाम्ललवणेत्यादिना पित्तजस्य कटुतिक्त कषायेत्यादिना वातजस्याभिहितः। *एतेन सामान्य हेतु सहितो विशिष्टहेतुः कफजादि प्रमेहस्य॥ किन्तु कफज निदानमप्येतत् आस्यासुखादि बोद्धव्यम्॥१॥

मेद इत्यादिना कफपित्तवातजमेहानां क्रमेण संप्राप्तिमाह।

अत्र कफजा एव मेहा भूयस्त्वेन साध्यत्वेन चादावुच्यन्ते। तानेवेति मेदोमांस शरीरजक्लेदान्, उष्णैरिति उष्णवी- र्य्यस्पर्शैर्द्रव्यैः क्षीणेषु दोषेष्विति प्रवृद्धत्वेनैव क्षीयमाणेषु

चक्रीर्विंचिन्त्य मेहरोगात् प्रभृति तदीय शेषस्य मधुकोष व्याख्या- शेष आरभ्यत इत्यन्वयः।

(१)ग्राम्यौदकेत्यादिमूलम्। ग्राम्याश्छागादयः औदकाः मत्स्यका- दयः आनूपाः कच्छपादयः एतेषां रसाः मांसरसा रसौदनवत् रस शब्देनात्र मांसरसो लभ्यते। नवान्नपानमिति नवान्नभक्षणं अशोक- कलिकापान वदत्रापि पानशब्देन भक्षणमुच्यते।

(४) एतेनेति। एतेन चरके पृथक् पृथक् हेतुकथनेन। किन्त्विति। किन्तु उक्ताधिक्य एतत् आस्यासुखादि सर्व्वं सामान्यतः कफजादीनां

[६]साध्याः कफोत्थाद्दशपित्तजाः षट्याप्यानसाध्यः

नतु समापेक्षया । अनेन [५]वृद्धे कफे पित्ते वायोर्वायुलङ्घनादिना क्रमेण वृद्धो भवति अनेनासाध्यमेहचतुष्टय प्रकरणे विवक्षित इति सूच्यते अत्र हि चिकित्साविधानात् साध्यत्वमस्ति यदुक्तं ।

या वातमेहान् प्रति पूर्व्वमुक्ता वातोत्थानां विहिता क्रिया सा । वायुर्हि धातुव्यतिकर्षितेषु कुर्य्यादसाध्यान् प्रति नास्ति चिन्ता इति ।

दोषेष्विति । कफपित्तेषु द्वयोश्च बहुवचनं व्यक्त्यपेक्षया बहुत्वात् अपकृष्येति बस्तिमुखं नीत्वा धातुनिति वसामज्जौ जोलसीकाख्यान ॥२॥

समक्रियत्वादिति कफस्य दोषस्य दुष्यस्य मेदः प्रभृतेः समानत्वात् कटुतिक्तादि क्रियायाः । अत्र व्याधि मधि-

मर्य्येषां निदानं यदपि बाहुल्येन कफजत्वात् विशेषेणच कफजस्यैव हेतुरिति । भूयस्त्वेन सर्वापेक्षया बाहुल्येन ।

(५) वृद्धेकफेपित्तेनेत्यादि । कफे पित्ते वा वृद्धे समानापेक्षया प्रवृद्धे सति यो वायुर्लङ्घनादिना क्रमेण वृद्धो भवति स वायुर्वातजोमेहः कार्य्यकारणयोरभेदोपचारात् इत्यादसाध्य प्रमेह चतुष्टयप्रकरणे न विवक्षित इति यत्र तु समानापेक्षया क्षीणे कफपित्ते प्रकुपित वातजो योमेहः सोऽसाध्यएव ।

(६) साध्याः कफोत्थोत्यादि सूत्रम् । तेनेहाः यथाक्रमं क्रममनतिक्रम्य तथा हि ये दशकफोत्थोत्थे दशसमक्रियत्वात् साध्याः येच षट्पित्तजास्ते विषमक्रियत्वात् याप्याः ये चतुष्काः पवनाज्जातास्ते महात्ययत्वादसाध्या न भवन्तीत्यर्थः । श्रीजस्वात्मेति । सर्व्वधातूनां स्नेहमोजः क्षीरे घृतमिव । अग्निषोमात्मकत्वेन द्विरूपं वर्णितन्तु तदिति । तत्राग्न्यात्मकम् अष्टबिन्दु

पवनाच्च तुष्कः। समक्रियत्वाद्विषमक्रियत्वान्म-
हात्ययत्वाच्च यथा क्रमन्ते ॥३॥
कफः सपित्तः पवनश्च दोषामेदोस्रशुक्राम्बुवसा-

म्यातुल्य दुष्यतासाध्यतायाहेतुः तेन नच तुल्यगुणो दुष्यो न दोषः प्रकृतिर्भवेदिति चरकवचनं कष्टसाध्यतार्थं नोद्भावनीयं यदुक्तम्।

ज्वरेतुल्यर्त्तु दोषत्वं प्रमेहे तुल्यदूष्यता। रक्तगुल्मे पुराणत्वं सुखसाध्यस्य लक्षणमिति॥

विषमक्रियत्वादिति पित्तस्य प्रमेह प्रधान दूष्यस्य च मेदः प्रभृतेश्चान्योन्यं विपरीतक्रियत्वात् पित्तहरं हि मधुरादि मेदस्करं मेदोहरं कटुकादि पित्तकरमिति क्रियावैषम्यं अत्र व्याधिस्वभावो हेतुः तेनान्येषु व्याधिषु परस्पर विरुद्धदोषदूष्यसंसर्गेष्वभय प्रत्यनीकभेषजविधिरविरोधी। महात्ययत्वादिति। मज्जादि गम्भीरधात्ववकर्षकत्वेन बहुव्यापत्तिकरणत्वात् आशुकारित्वादिति ग्रानः। चकारात् विषमक्रियत्वञ्च वातजानां समुच्चीयते॥३॥

कफ इत्यादिना सर्व्वमेहानां दोषदुष्य संग्रहः। वसा-मांसस्नेहः सर्व्वदेह स्नेह इत्यन्येलसीका उदकविशेषः। यदाह चरकः यत्तु मांसत्वगन्तरे उदकं तल्लसीकाशब्दं लभत इति रसौज इति रसश्च ओजश्च इति द्वन्दः। ओज-श्चाष्टांञ्जलिपरिमितं श्लेष्मरूपं यदुक्तं श्लेष्मलस्योजसोऽ-

परिमितं। सोमात्मकं अष्टाञ्जलि परिमितं। उदश्वनादि प्रमश्चभेद इति शरादि प्रमश्च विशेषः॥

लसीकाः । मज्जा रसौजः पिशितञ्च दुष्याः
प्रमेहिणां विंशतिरेव मेहाः ॥४॥

ह्रौञ्जलिपरिमाणमिति । तत्त्वष्टबिन्द्वात्मकं तस्य ध्वंसे मरणा-
भिधानात् ननु रस एवौजोरसौज इति कुतो न कल्प्यते
रसोऽप्योजः शब्देनोच्यते । यदुक्तं ।

तस्मिन् काले पचत्यग्निर्यदन्नं कोष्ठमागतं ।
मली भवति तत्प्रायः कल्प्यते किञ्चिदोजसे इति ।

ओजसे इति वलाये इत्यर्थः नैवं ओजसो हि मधुमेहे
दूष्यत्वेनोक्तत्वात् । ओजः शब्दोपादानवैफल्याच्च । यद्यत्र
बहूनि मेदः प्रभृतीनि दूष्यत्वेनोच्यन्ते । तथापि पूर्व्वं
मेदोमांस शरीरजक्लेदानां सर्व्वमेहेष्ववश्यं भाविदुष्यत्वेन
पृथगभिधानं मज्जादयन्तु मेहविशेषे दुष्याः तद्वयथा लसी-
कावसामज्जौजांसि । वातिकेन पैत्तिकेन श्लैष्मिकेनेति
ईशानः पुनराह रक्तरसाम्बुकाद्यपि सर्व्वमेहेषु कदाचित्
दुष्यन्तेनत्ववश्यमिति । किम्वा सर्व्वमेहानामेव दोषत्रय-
जन्यत्वं सकलदूष्याश्रयित्वञ्च कफः सपित्त इत्यादिनोप-
दिश्यते । मेदोमांसादीनि तु अत्यन्तदूष्योपदर्शनार्थं पृथ-
गुक्तानि यतश्चरकेऽपि कियन्तः शिरसीयाध्याये सकल-
मेहवाचक मधुमेह कथने दोषत्रय प्रकोपोऽभिहितः तथा
हि स मारुतस्य पित्तस्य कफस्य च मुहुर्मुहुः दर्शयत्या-
कृतिं गत्वाक्षयमाप्यायते पुनरिति तथा सुश्रुतोऽप्याह ।
वातपित्तमेदोभिरन्वितः श्लेष्मा मेहान् जनयतीत्यादि ।
कफादीनामित्युत्सर्गादिसंसर्गस्यानन्त्येन सर्व्वमेहावस्था-

दन्तादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः ।
दाहश्चिक्कणता देहे तृट्स्वाद्वास्यञ्च जायते ॥५॥
सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ॥६॥
दोषदूष्याविशेषेऽपि तत्संयोग विशेषतः ।
मूत्रवर्णादि भेदेन भेदो मेहेषु कल्प्यते ॥७॥

विशेषेण मधुमेहेन च संख्याधिक्यप्रसङ्गनिरासायावधारणार्थमाह । विंशतिरेव मेहा इति ॥४॥

पूर्वरूपमाह ।

दन्तादीनामित्यादि । आदिशब्देन नयनकर्णादीनां ग्रहणम् । यदुक्तं तालुगलजिह्वादन्तेषु मलोत्पत्तिरिति तत्र च मलभूयस्त्वं मेदोदोषात् । चिक्कणता देहे । मेदःकफदुष्टेः । अत्र चकारात् सुश्रुतोक्ता केशजटिलीभावनखातिवृद्धी बोध्ये । एतच्च व्याधिविशेष नियतमेव येनान्यत्र विद्यमानापि कफमेदो दुष्टिः नैवं कर्त्तुं क्षमा ॥५॥

सामान्यलक्षणमाह ।

प्रभूताविलमूत्रतेति प्रभूतमूत्रत्वं दूष्य द्रवधातुसम्बन्धात् आविलत्वं दोषदूष्यसंसर्गात् ॥६॥

ननु च कथं कफेन दशपित्तेन षडित्यादि व्यवस्था । यतः कारणभेदात् कार्य्यभेद इत्याशङ्क्याह । दोषदूष्याविशेषेऽपितत् संयोगविशेषत इति तेषां दोषदूष्याणां उत्कर्षापकर्षकृतत्वात् संयोगभेदाद्भेदो मेहेषु भवति यथा पञ्चानां वर्णानां श्वेतकृष्णपीतलोहितश्यावानां संयोगभेदादनेक पिङ्गलपाटलादि भेदः सुश्रुतेऽप्युक्तं यथा

(७)अच्छं बहुसितं शीतं निर्गन्ध मुदकोपमम् ।
मेहत्युदक मेहेन किञ्चिदाविल पिच्छिलम्॥१॥
इक्षोरस मिवात्यर्थं मधुरञ्चेक्षु मेहतः ॥१॥
सान्द्री भवेत् पर्य्युषितं सान्द्रमेहेन मेहति॥१॥
सुरामेही सुरातुल्यमुपर्य्यच्छमधोघनम्॥१॥

पञ्चानां वर्णानां उत्कर्षापकर्षकृतेन संयोग विशेषेण कपिलादि नानावर्णोत्पत्तिरेवं दोषादि संसर्गभेदानां नानात्वमिति । संयोगभेदः प्रतीतिः कुत इत्यत आह ।

मूलेत्यादि । मूलवर्णादिभेदं दृष्ट्वा कारणानां समानानां भेदः कल्पनीयः यथा मृदादि कारणकलापस्य भेदेपि कुम्भकारादि संयोगभेदादुदञ्चनादि प्रपञ्चभेदः । ननूदञ्चनादौ कुम्भकारप्रयत्नभेदात् संयोगभेदः अत्र कोऽत्र संयोगभेदहेतुः । उच्यते तत्तदाहारादिकमदृष्टञ्च भवतीत्यदोषः॥७॥

अत्र कफस्य श्वेतशीतमूर्त्तपिच्छिलाच्छस्निग्धगुरुमधुरसान्द्रप्रसादमन्देषु गुणेषु मध्ये कुत्रचित् किञ्चिद्गुणप्रकर्षात् उदकमेहादयो दश इष्यन्ते इत्याह ।

अच्छं बहुसितं शीतमित्यादि । सान्द्रप्रसादन्तु एक एव गुणोगणनीयः सान्द्रमेहव्यपदेशस्त्वेकदेशेन भविष्यतीति।

---

(७) अच्छमित्यादि मूत्रम् । अच्छं निर्म्मलं बहुमात्रयाधिकं सितं शुक्लं शीतं निर्गन्धं उदकोपमं मूत्रं उदकमेहेन मेहति प्रस्रावयति । भावस्य-भावैसंति इत्य; स्वभावस्य अपर्यान् योऽव्यतात् कपमस्य इत्यस्तटक

संहृष्टरोमापिष्टेन पिष्टवद्बहुलं सितम् ॥१॥
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ॥१॥
मूर्त्ताणून्सिकतामेहीसिकतारूपिणोमलान् ॥१॥

एतैश्च श्वेतादिभिर्गुणै र्व्यस्तैः समस्तैश्च योगात् दश मेहाः नतु यथाक्रमं येन गुणेनैकेन अनेकेन वा भूयस्तर-मुपसृज्यते तत्तत् समाख्यं गौणं नामविशेषं प्राप्नोतीति चरकवचनात् ननु यथा दशभिर्गुणैर्दशमेहान् करोति। तथा संसर्गविकल्पान्तरेणापरानपि कुतो न करोतीति। नाशङ्कनीयं तावत् स्वभावस्यापर्य्यनुयोज्यत्वात् अदृष्टक-ल्पनायाश्चानर्हत्वात् तत्र श्वेताच्छशीतगुणैरुदकमेहः। मधुरशीताभ्यामिक्षुमेहः सान्द्रपिच्छिलाभ्यां सान्द्रमेहः अच्छेन पित्तानुरागिणा सुरामेहः शुक्लेन पिष्टमेहः अत्र पिष्टवदित्यालेपन पिष्टवत् श्वेतस्निग्धाभ्यां शुक्रमेहः अत्र शुक्राभमिति सर्व्वमेव शुक्रतुल्यमूत्रं शुक्रमिश्रञ्चेति शुक्राभमिश्रश्चा स्यात् शुक्रमिश्रत्वे तु कफजस्यापस्साध्यत्वं स्यादिति वाप्यचन्द्रस्तु शुक्रस्य मूत्रेण गुणकृतं सादृश्यं शुक्रमिश्रञ्चेति च शुक्रगुणानां संयुक्त समवायात् मूत्र-दर्शनमित्याह। चरकेण तु शुक्रमित्यनेन शुक्रमिश्रमिति-बोध्यम्। सान्द्रमूर्त्ताभ्यां सिकतामेहः अत्र मूर्त्तान्-

घानां दर्शनं यथाचक्षुःसंयुक्तघटे संयुक्त समवायतः रूपादीनाम्। यदुक्तं कारिकावल्यां द्रव्यग्रहस्तु संयोगात् तथा तत् समवायत इत्यादि ॥१॥
आख्यातयोभिति पाणिनि कतद्धनस्यादयमर्थः आख्यातयोः जाति-कथने एकस्मिन्नर्थे बहुवचनं अन्यतरस्यां विकल्पे भवतीति शेषः। परस्परसम्बन्धाभावाद् परस्पर बचत्वैक वाक्याभावात्॥

शीतमेहीसुबहुशो मधुरं भृश शीतलम् ॥१॥
शनैः शनैः शनैर्मेही मन्दं मन्दं प्रमेहति ॥१॥
लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ॥१०॥८॥
गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ॥१॥
नीलमेहेन नीलाभं ॥१॥ कालमेही मसीनिभं ॥१॥
हारिद्रमेही कटुकं हरिद्रासन्निभं दहत् ॥१॥
विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् ॥१॥
विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः ॥१॥६॥८॥

ष्ठिति कठिनानल्पानमलानिति बहुवचनं दोषाणामवयवबहुत्वात् जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यामिति वाप्यचन्द्रः मलोऽत्र प्रकरणात् कफः । गुरुमधुरशीतैः शीतमेहः । मन्दमूत्राभ्यां शनैर्मेहः । पिच्छिलेन लालामेहः । चरके सुरामेहस्थाने सान्द्रप्रसादमेहः पठितः तथा पिष्टमेह शुक्रमेहशब्देन चरकेण शीतमेहलालामेहौ पठितौ ॥८॥

पित्तजः कालमेहः । सुश्रुतस्तु चरकोक्त शीतमेहलालामेहयोः स्थाने फेणलवणमेहौ कालमेहे चाम्लमेहं पठितवान् समस्या चात्र शास्त्रेऽत्र परस्परलक्षणसम्वादाभावात् स्युस्तद्वैधवत् सर्वं प्रमाणं पित्तात् षड्भिः पित्तगुणैः क्षारनीलकालपीतलोहितमिश्रैः यथाक्रमं क्षारमेहादयः षट्तान् गन्धवर्णरसैरित्यादिना दर्शयति नीलाभमिति चाषपक्षप्रभं चाषः स्वर्णचूड़ इति लोके ख्यातः

वसामेही वसामिश्रं वसाभं मूत्रयेन्मुहुः ॥१॥
मज्जाभं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः ॥१॥
[८] कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः ॥१॥
हस्तीमत्त इवाजस्रं मूत्रं वेग विवर्जितम् ।
सलसीकं विबद्धञ्च हस्तिमेही प्रमेहति ॥१॥४॥१०॥
अविपाकोऽरुचिश्छर्दिर्निद्राकासः सपीनसः ।
उपद्रवाः प्रजायन्ते मेहनां कफजन्मनाम् ॥१॥
वस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः ।
दाहस्तृष्णाम्लिकामूर्च्छा विड्भेदः पित्तजन्म-
नाम् ॥१॥

क्वचित् टाकसना चास इति गदाधरः तत्पश्चात् स्निग्ध-
निलो भवति दहदिति मूत्रविशेषणं दहन्निति पाठान्तरे
दाहमनुभवत पुरुषः ॥९॥

वातेन यथाक्रमं वसामज्जौजोलसीकाभि र्वसामेहा-
दयः । तानाह । वसामेही वसामिश्रमित्यादि अयं वसा-
मेहः सुश्रुते सर्पिर्मेहनाम्ना क्षौद्रमेहश्चरके मधुमेह-
नाम्ना पठितः ॥१०॥

इदानीं कफजादिमेहानां कृच्छ्रसाध्यत्वमसाध्यत्वञ्च
ज्ञापयितुं भेदेनोपद्रवानाह ।

---

(८) कषायेत्यादि मूत्रम् । यस्मिन् कषायं मधुरं रूक्षं मूत्रं स्यात्
तत्क्षौद्रमेहं वदेदिति योज्यम् ।

वातजानामुदावर्त्तः कम्पहृद्ग्रहलोलताः। शूल-मुन्निद्रता शोषः कासः श्वासश्च जायते॥१॥३॥११॥
यथोक्तोपद्रवाविष्ट मतिप्रस्नुत मेव च। पीडका पीडितं गाढं प्रमेहो हन्ति मानवम् ॥९॥

अविपाकोऽरुचिरित्यादि। कफजे कास आर्द्रः वातजे शुष्कः तोदः संसर्गिवातजन्यः मेहानां त्रिदोषजन्यत्वात् मुष्कावदरणं पाकेन अक्षिका अम्लोद्गारः लोलता सर्व्वरसभक्षणेच्छा इयन्तु प्रभावाद्वा धातुक्षयाद्वा भवति अत्र वातग्रहणी ग्रन्थिः सर्व्वरसानामित्युक्तम् ॥११॥

असाध्यतामाह ।

यथोक्तोपद्रवाविष्टमित्यादि। उक्तैरविपाकादिभिरन्यैश्च सुश्रुताद्युक्तैरुपद्रवैः। तद्यथा कफजे आलस्यास्योपदेह शैथिल्य कफप्रसेक मक्षिकोपसर्पणादिकं पित्तजे पाण्डुरोगादिकं अति प्रस्रुतमिति अतिशयं धातुमूत्रस्रावयुक्तं पिड़कापीड़ितमिति शराविकादि पीड़कापीड़ितं गाढ़ं कालप्रकर्षात् यद्यपि पिडका अप्युपद्रवत्वेनाभिमताः। यदुक्तञ्चरके उपद्रवास्तु खलु प्रमेहिणां तृष्णाज्वरातिसारमारभ्य यावत् पूतिमांसपिडका अलजीविद्रध्यादय इति तथापि पिड़कानां पृथगुत्पादसूचनार्थं पृथक्करणं उक्तं चरके।

विना प्रमेहमप्येता जायन्ते दुष्टमेदस इति ।

अन्यदपि असाध्यं लक्षणं बोद्धव्यम् यदाह चरकः॥

स पूर्व्वरूपाः कफपित्तमेहाः क्रमेण ये वातकृताश्च

⁸जातः प्रमेही मधुमेहिना वा न साध्य रोगः स

मेहाः । साध्या न तेपित्तकृतास्तु याप्याः साध्यास्तु मेदोय दिनप्रदुष्टमिति ।

अस्यार्थः । ये कफजाः साध्यास्ते स पूर्व्वरूपाः सन्तोऽसाध्याः पित्तकृतास्तु याप्याः ये ते स पूर्व्वरूपा एव असाध्याः प्रत्याख्येयाः सर्व्वरोगानामेव यद्यपि पूर्व्वरूपानुत्पत्तौ असाध्यत्वमुक्तं तथाप्यत्रासकल पूर्व्वरूपान्वये असाध्यत्वं अन्यत्र तु सकलपूर्वरूपान्वये सतीति शेषः क्रमेणेति स्वनिदानक्रमेण तेन निजहेत्वादिकृता ये वातजाश्चत्वारो मेहाः पूर्व्वरूपरहिता स्तेन हि साध्याः येतु पश्चात् धात्वपकर्षणाद्वातानुबन्धेन वातजास्ते साध्याः याप्या वा अत एवोक्तं या वातमेहान प्रति पूर्वमुक्ता वातोल्वणानां विहिता क्रिया सा इत्यादि ॥८॥

(८)जात प्रमेहीत्यादि सूत्रम् । मधुमेहिनो जातो यः प्रमेही मधुमेहिबीजदोषात् न साध्य उक्त इति धर्म्मधर्म्मिणोरभेदोपचारात् । ये चापि केचित् कुष्ठादयः कुलजा विकारा भवन्ति तांश्च असाध्यान् प्रवदन्तीत्यन्वयः । प्रमेहि पितृपितामहस्याभीति । प्रमेहिणौ प्रमेहविशिष्टौ पितृपितामहौ यस्य तस्येति विग्रहः। एतेनेति । एतेन येचापि केचित् कुलजा विकार इत्यनेन अनति दुष्ट बीजेनेति । अनत्यर्थं दुष्टबीजेन तथाच यस्य प्रमेहिनः पितामहः प्रमेही तत्पितृदोषदुष्टे ऽनभिव्यक्तान् प्रमेहः तस्य प्रमेहिनः प्रमेहिजातत्वाभावात् नासाध्यत्वं अतः कुलजमुक्तमिति भावः । पुनस्तद्वचनं पुनर्जातप्रमेहीत्यादिना असाध्यता वचनम् । तथाच कुलजा इत्यनेनैव मेहानामसाध्यत्वं जातः प्रमेहीत्यादिना तु तेषामेव पुरुष परम्परयानुपहितत्वमुक्तं अतो नवैयर्थ्यमिति

असाध्यता प्रकारान्तरमाह।

जात इत्यादि। श्लेष्ममेदसोरतिदुष्ट्या मूत्रस्य श्लेष्मणामतिमाधुर्य्यात् मधुमेहिना जातो यः प्रमेही स चासाध्यो भवति इति बीजदोषादिति प्रमेहारम्भकदोषदुष्टबीजजात प्रमेहित्वात् मधुमेह शब्देन चात्र मेहमात्रमुच्यते यदि तु वातिक उपेक्षितो वा मेहो मधुमेह उच्यते तदा चेतरप्रमेहयुक्त मातापितृजनित प्रमेहिणो नासाध्यत्वमुक्तं स्यात् किञ्च मधुमेहिना जनितस्य मधुमेहित्वमेव कारणानुरूप तथा युक्तं ततश्च मधुमेही मधुमेहिना वा जातो न साध्य इति वक्तुमुचितं तस्या साध्यत्वमपि न वक्तव्यं मधुमेहस्यासाध्यत्वादेव। अन्यत्रापि मधुमेहशब्देन मेहमात्रमुक्तं यथा।

गुल्मी च मधुमेही च राजयक्ष्मीच यो नरः।
अचिकित्स्या भवन्त्येते बलमांस परीक्षयादिति॥

यदि त्वत्र मधुमेहोऽभीष्टः स्यात्तदा बलमांसपरीक्षयादिति न कृतं स्यात् तस्य स्वरूपत एवासाध्यत्वात् तथा कियन्तः शिरशरीरये उपेक्षयाऽस्य जायन्ते पिड़कामधुमेहिका इत्यादिनाया मधुमेहसम्बन्धित्वेनोक्तास्ता एव प्रमेहिणां याः पिड़कामयोक्ता इत्यनेन चिकित्सास्थाने प्रमेहमात्रसम्बन्धितया अनूद्य चिकित्सायां संयोजिताः। तस्माद्भाविनीं मधुमेहतामाश्रित्य सर्व्व एव मेहा मधुमेहशब्दवाच्याः। उक्तं हि सुश्रुते।

मधुरं यच्च सर्वेषु प्रायो मध्विवमेहति।
सर्वे ते मधुमेहाख्या माधुर्य्याच्च तनो रत इति॥

हि वीजदोषाम्। ये चापि केचित्कुलजाविकारा भवन्ति तांश्च प्रवदन्त्यसाध्यान्॥१०॥

गदाधरेण तु पिड़कासम्बन्धेनैव मधुमेहत्वमुक्तं यत चरके कियन्तः शिरसो याध्याये मधुमेहमभिधाय पिड़का उक्ता इति तन्न मनोहरं मधुमेहशब्देन प्रमेहमात्राभिधानात् यदि तु मधुमेह एवाभीष्टः स्यात् तदा उपेक्षयाश्च जायन्त इति तत्रोपेक्षायाभिधानमनुपपन्नं स्यात् पिड़कानाञ्च मधुमेहभवानां चिकित्स्योपदेशोऽव्यर्थः स्यादिति॥ ९॥

कुलजमेहस्यासाध्यताप्रसङ्गेनापरेषामपि कुलजानाम साध्यत्वमाह।

येचापीत्यादि। केचिदिति कुष्ठादयः कुलजा इति पितृपितामहादिसंभूताः। एतेन प्रमेहि पितामहस्यापि प्रमेहस्यासाध्यत्वं दर्शयति ननु यस्य पितामहः प्रमेही-तस्य पितापि प्रमेही मेहिजातत्वात् तथाच सति जातः प्रमेहीमधुमेहिवा वा न साध्यरोगः स हि वीजदोषादित्यनेनैवगतार्थम्। नैवं नहि प्रमेहिनाजात इत्येतावता उत्पन्नमात्र एव प्रमेही भवति। किन्त्वहिं कालवशेन दुष्टैरभिव्यक्त्या यथा कुष्ठिजातस्य कुष्ठं एतेन यदा अनतिदुष्टवीजेन प्रमेहिजातेन पित्राजन्यते पुरुषः प्रमेही सोप्यसाध्य इति कुलजा इत्यनेनैव मेहस्याप्यसाध्यतायां लब्धायां पुनस्तद्वचनं प्रमेहानां प्रायेण सन्तानानुबन्धित्व प्रदर्शनार्थं उक्तञ्च प्रमेहोऽनुषङ्गिनामिति॥१०॥

सर्व एव प्रमेहास्तु कालेनाप्रतिकारिणः । मधुमेहत्वमायान्ति तदा साध्या भवन्ति हि ॥ १ ॥

[11]मधुमेहे मधुसमं जायते स किल द्विधा ।
क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथेऽथवा ॥

[12]आवृतो दोषलिङ्गानि सोऽनिमित्तं प्रदर्शयन् ।

उपेक्षयापि पित्तकफजानामपि मधुमेहित्वं प्रदर्शयति तु माह ॥

सर्व्व एवेत्यादि । धातुक्षयावरणाभ्यां कुपितवातेन मधुमेह सम्भवमाह । मधुमेह इत्यादि मधुसममिति मूत्रमिति शेषः । स इति मधुमेहः । साधारणलिङ्गमाह । आवृत इत्यादि । आवृत इति आवृतवातकृतः दोषलिङ्गानीति येन पित्तादिना आवृतो वात स्तस्य वातस्य च

भावः । प्रमेहोऽनुषङ्गिणामिति । हि यस्मात् अनुषङ्गिणां रोगाणां मध्ये प्रमेह एव श्रेष्ठः ॥

(१०) सर्व्वइत्यादि मूलम् । सर्व्वे प्रमेहा एवकालेनाप्रतिकारिणः अचिकित्सिताः सन्तः मधुमेहत्वं यदा आयान्ति प्राप्नुवन्ति तदा असाध्याभवन्ति चेति ॥

(११) मधुमेहइत्यादि मूलम् । मधुमेहे मधुसमं मूत्रं जायते स मधुमेहः किल निश्चितं धातुक्षयात् वायौ क्रुद्धे सति अथवा दोषावृत पथे वायौ सति द्विधाभवतीत्यन्वयः ॥

(१२) आवृतइत्यादि मूलम् । आवृतः आवृतवातकृतः स मधुमेहः दोषलिङ्गानि येन पित्तादीना आवृतस्तस्य वातस्य च लिङ्गानि दर्शयन् अनिमित्तं अकस्मात् क्षयात् क्षीणः क्षयात् आवरणादिना पित्तकफादिर्वा पुनः पुर्णोभवान् तत्कृच्छ्रसाध्यतां भजते इत्यन्वयः ॥

क्षणात् क्षीणः क्षणात् पूर्णो भजते कृच्छ्रसाध्यताम् ॥१॥

मधुरं यच्च मेहेषु प्रायोमध्विव मेहति । सर्वेऽपि मधुमेहाख्या माधुर्य्याच्च तनोरतः ॥११॥

शराविकाकच्छपिकाजालिनीविनतालजी । मसुरिका सर्षपिका पुत्रिणी स विदारिका ॥

लिङ्गानि दर्शयन् । अनिमित्तं अकस्मात् क्षीणः क्षणात् क्षणात् आरणेन पुनः पूर्णो भवन् कृच्छ्रसाध्यो भवति । तथा चरकः ॥१२॥

समारुतस्य पित्तस्य कफस्य च मुहुर्मुहुः । दर्शयत्याकृतिं गत्वा क्षयमप्याय्यते पुनरिति

धातुक्षयकुपितवातजस्य तु केवलवातजमेव लिङ्गं गदाधरस्त्वाह मधुमेहः सावरणा वायुनैव क्रियते । यदाह चरक ।

सैराहत गतिर्वायुरोज आदाय गच्छति ।
यदावस्थिं तदा कृच्छ्रो मधुमेहः प्रवर्त्तत इति ॥

केवल वातजेषु कषायादि वमनाद्यतियोगादि कृतेषु धातुक्षयजेषु वायोरावरणं नास्तीति भेदः। मधुमेहशब्दप्रवृत्तौ निमित्तमाह । मधुरं यच्च मेहेष्वित्यादि ॥११॥

(१२) समारुतस्येत्यादि । स मधुमेहः मारुतस्य पित्तस्य कफस्य च मुहुर्मुहुराकृतिं दर्शयति क्षयं गत्वा क्षयं प्राप्य पुनराप्याय्यते पूर्णो भवतीत्यर्थः । मधुरमित्यादिमूलम् । यत् यस्मात् मेहेषु तनोरवयवस्य माधुर्य्याद् प्रायो माध्वीव मधुरं मूत्रं मेहति अतः सर्वेऽपि मेहाः मधुमेहाख्या भवन्तीति योज्यम् । पिडकादीः स्पष्टार्थाः॥

विद्रधिश्चेति पीड़काः प्रमेहोपेक्षया दश॥१॥
सन्धिमर्मसु जायन्ते मांसलेषु च धामसु।
अन्तोन्नता तु तद्रूपा निम्नमध्या शराविका॥१॥
गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी॥१॥
सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका बुधैः॥१॥
जालिनी तीव्रदाहा तु मांसजालसमावृता॥१॥
अवगाढ़रुजाक्लेदा पृष्ठे वाप्युदरेऽपि वा।
महती सरुजा नीला विनतानाम सा स्मृता॥१॥
महत्यल्पचिता ज्ञेया पीडका चापि पुत्रिणी॥१॥

प्रमेहोपेक्षया पिड़कासम्भवं दर्शयितुमाह।

शराविकेत्यादि। इह दशपिड़कासु विनतयाः पाठो भोजविरुद्धः सुश्रुते भोजे हि नवपिड़काः तद्यथा शराविका सर्षपिका कुम्भिका जालिनी तथा कुलत्थिकाल-जीपुत्रिविदारीविद्रधी तथा नवैता पिडा ज्ञेया इत्यादि कुलत्थिकाभोजे मसूरिका ज्ञेया किन्तु भोज एव न्यून-तेति वक्तुं सुकरं सुश्रुते सर्वत्र चरके च विनतायाः दर्श-नात् चरके तु सप्तपिडका तद्यथा शराविकाकच्छपिका-जालिनी सर्षपी तथा। अलजीविनताख्या च विद्रधी चेति सप्तमी। तत्र प्रायो भावात् सप्तानामभिधानम्। यत स्तेनैव कियन्तः शिरसी ये अथान्याः पिड़काः सन्ती-त्यादिना अधिक पिडका सम्भवः सूचितः प्रमेहोपेक्षये-त्यभिधानं मधुमेहे प्रमेहमात्रेच पिड़का सम्भवं दर्शयति अतएव विना प्रमेहमप्येता इत्यत्र प्रमेहमात्रग्रहणं

मसूराकृतिसंस्थाना विज्ञेया तु मसूरिका ॥१॥
रक्तासितास्फोटचिता विज्ञेयाऽलजी भवेत्॥१॥
विदारीकन्दवद्वृत्ता कठिना च विदारिका ॥१॥
विद्रधेर्लक्षणैर्युक्ता ज्ञेयाविद्रधिका तु सा ॥१॥
१०॥१२॥
येयन्मयाः स्मृता मेहास्तेषां मेतास्तु तन्मयाः ।
विना प्रमेहमप्येता जायन्ते दुष्टमेदसः ॥
[14]तावच्चैता नलक्ष्यन्ते यावद्वास्तुपरिग्रहाः॥१३॥

कृतम् । धामस्विति स्थानेषु तद्रूपेति शरावरूपाल्पचिता अल्पपिडकान्त रचिता विद्रधेर्लक्षणैर्युक्तेत्यभिधानेन विद्रधेरस्या अभेदोबोध्यः ॥१२॥

पिडकानामारम्भककारणमाह ।

ये यन्मया इति । तन्मया इति निर्देशः क्वचिदपवाद विषयेऽप्युत्सर्गोऽभिनिविशत इभिक्षीपं बाधित्वा टापा काधनीयः एतद्दोषं मत्वाकेचित्तत्कृता इति पाठान्तरं कृतम् । अयमत्र पिण्डार्थः यो यद्दोषोल्वणोमेहस्तद्दोषोल्वणेनैव पिडका भवति ननु जालीन्यां तीव्रदाहः पठितः स च पित्तकृतः भोजेऽपि जालिनी पित्तकृतैव पठिता यथा परस्पराभिसम्बन्धा पिडका चैकदेशजा पित्तोत्कटा दाहवतीश्लक्ष्णरुक् जालिनीमतेति तत्कथं जालिन्या पित्तजत्व-

---

(१४) तावदेता इत्यादिमूलम् । यावत्कालं वास्तुपरिग्रहा भवन्ति तावत्कालं एताः पिडका न लक्ष्यन्ते विशेषरूपेण न निर्दिश्यन्ते वास्तुपरिग्रहानन्तरमेव एता अभिव्यक्ता भवन्तीति भावः॥

गुदे हृदि शिरस्यंसे पृष्ठे मर्म्मसु चोत्थिताः ।
सोपद्रवा दुर्बलाग्नेः पीडकाः परिवर्ज्जयेत् ॥१४॥

नियमात् ये यन्मया इत्यादि ग्रन्थार्थसंगतिः नैवं प्रचुरपिड़कानान्तन्मयत्वेन बाहुल्यं नाभिधानं यथा छत्त्रिणो गच्छन्तीति गदाधरः किम्वा स्वभविम्बा जालिनी पित्तप्रधाना भवति । श्लेष्मवातजमेहभवत्वेन श्लेष्मवात प्रधाना च तेन दोषत्रयप्रधानत्वात् सर्व्वदा सा भवति । अन्यस्त्वाह । तीव्रदाहपित्तोत्कटत्वञ्च पैत्तिकमेहजायां जालिन्यामवगन्तव्यं । अन्य मेहजाते अन्यदोषोत्कटा निर्द्दिष्टा च । अतएव चरके जालिनी कफोत्थया निर्द्दिष्टा एव पठिता तद्यथा शराविकाकच्छपिकाजालिनीचेति दुःसहा जायन्ते वास्यतिवल्लाः प्रभूतश्लेष्ममेदसां सम्बा शिराजालवती स्निग्धस्रावा महाश्रया । रुजानिस्तोदबहुलासूक्ष्मछिद्रा च जालिनी । नचातिप्रसक्तिः उक्तं हि समर्थ्यते । अस्मिंश्च समाधाने ये यन्मया इत्यादिनाव्याचक्ष्यते । चरकभोजवचनयोश्चाविरोधार्थं यत्नान्तरं न मृग्यम् । कार्त्तिकस्त्वाह पाककाले पित्तोत्कटत्वं तस्माद्धि सर्व्वे परिपाककाले पचन्ति शोथा स्त्रिभिरेव दोषैरिति वचनात् एतत्तु सर्व्वत्राविशेषान्नाद्रियन्ते ॥१३॥

असाध्यपिडकालक्षणमाह ।

गुदे हृदीत्यादि । सोपद्रवा इति उपद्रवाश्च तृटकासादयः यदाह चरकः

तृटकासमांससङ्कोथ मोहहिक्कामदज्वराः । वीसर्पमर्म्मसंरोधाः पिड़कानामुपद्रवा इति

पिड़कास्तु प्रायेणाधःकाय एव दोषदुष्याणामधःप्रसरणात् रसायनीनाञ्च दौर्ब्बल्यात् गोर्ह्मुत्तिष्ठन्ति दोषा इति वचनाच्च। केचिदाहुः स्त्रीणां प्रमेहो न भवतीति तथाच तन्त्रान्तरं

[15]रजः प्रसेकान्नारीणां मासिमासिविशुध्यति। सर्व्वं शरीरं दोषाश्च न प्रमेहन्त्यतः स्त्रियः

किन्तु स्त्रीषु प्रमेहदर्शनात् एतद्धेतुबलात् अन्यरोगसम्भवत्वाच्च एतत्प्रायो वादमाश्रित्य उक्तम्। मेहनिवृत्तिलक्षणञ्च सुश्रुते पठितं तद्यथा

प्रमेहिणो यदा मूत्रमनाविलमपिच्छिलम्। विशदं तिक्तकटुकं तदारोग्यं प्रचक्ष्यते ॥१४॥

इतिव्याख्यामधुकोषे प्रमेहमधुमेहपिडकानिदानम्।

---

(१५) रजः प्रसेकादित्यादि। रजः प्रसेकात् मासि मासि नारीणां सर्व्वं शरीरं शुद्धति दोषाश्च शुद्धति अतः स्त्रियः न प्रमेहन्तीत्यन्वयः। स्त्रीषु प्रमेहदर्शनात् तथा एतद्धेतुबलात् उक्तरजः प्रसेकरूपकारणसामर्थ्यात् अन्यरोगस्यसम्भवाच्च एतद् न प्रमेहन्त्यतः स्त्रिय इत्येतत् प्रायोवादमाश्रित्य प्रायेण बाहुल्येन न भवतीति विज्ञापयितु मुक्तं अत-एव न प्रमेहन्त्यतस्त्रिय इत्यत्र प्राय इत्यध्याहार्य्यम्।

इति व्याख्यामधुकोषपञ्जिकायां मेहनिदानम्।

अथ मेदोनिदानम्[1]।

अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः।
मधुरोऽन्नरसः प्रायः स्नेहान्मेदः प्रवर्द्धयेत्॥
मेदसावृतमार्गत्वात् पुष्यन्त्यन्येन धातवः।
मेदस्तु चीयते तस्मादसक्तः सर्वकर्मसु॥
क्षुद्रश्वासतृषामोहस्वप्नक्रथनसादनैः।
युक्तः क्षुत्स्वेददुर्गन्धैरल्पप्राणोऽल्पमैथुनः।
मेदस्तु सर्वभूतानामुदरेऽन्वस्थिसंस्थितम्॥
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत्।
मेदसावृतमार्गत्वाद्वायुः कोष्ठे विशेषतः॥

विना प्रमेहमप्येता जायन्ते दुष्टमेदस इत्यत्र मेदःसङ्कीर्त्तनात् मेदो दुष्टेरभिधानात् मेदो दुष्ट्या च स्थौल्यं मधुरश्चान्नरस इति मधुरः प्राय आधारं अन्नरसः सम्भवति न स्नेहात् मेदो जनयति। सुश्रुतेप्युक्तम्। आम एवान्नरसो मधुरतरश्च भवतीत्यादि ननु मेदस्विनस्तीक्ष्णाग्नित्वात् कथमाम एवान्नरसो भवति यदुक्तं चरकेण सन्धुक्षयत्यग्निमिति अग्नौ च मन्दे आमोत्पादः यदाह आमाशयस्थः कायाग्ने दौर्बल्यादविपाचितः। आद्य आहारधातुर्यः स आम इति कीर्त्तितः। उच्यते। श्लेष्मलाहाराध्यशनशीलत्वेन कदाचित् कालव्यतिक्रमभोजने नच वक्ष्यविकारकरणाग्निव्यापत्तेरन्नरसस्यामतुल्यता। अथवा मधुरतरान्नरसोपलिप्तेऽन्नवहस्रोतसि सर्व्व एवान्न-

(१) मेदोनिदानम् सुगमत्वादुपेक्षितम्।

चरन् सन्धुक्षयत्यग्निमाहारं शोषयत्यपि।
तस्मात् स शीघ्रं जरयत्याहारमभिकाङ्क्षति॥
विकारांश्चाप्नुते घोरान् कांश्चित् कालव्यतिक्र-
मात् ॥१॥
एतावुपद्रवकरौ विशेषादग्निमारुतौ।
एतौ तु दहतः स्थूलं वनदावो वनं यथा ॥२॥
मेदस्यतीवसंवृद्धे सहसैवानिलादयः।
विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवि-
तम्। मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः।
अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ॥१॥

रसो मधुरतरो निष्पद्यते। यथा पित्तयुक्तोऽन्नवहस्रोतसि मधुररसस्यापि विदाहः। यदुक्तम्

स्रोतस्यान्नवहे पित्तं पक्तौ वायस्य तिष्ठति। विदाहि भुक्तमन्यद्वा तस्याप्यन्नं विदह्यत इति।

स चामतुल्यत्वादाम इत्युच्यते। अशक्तः सर्वकर्मस्विति। मेदसः सौकुमार्य्यात् क्षुद्रश्वासः कृच्छ्राया सोढव्य इत्यादिनाऽभिहितः श्वयनमकस्मादुच्छ्रासावरोधः। चरन्सन्धुक्षयत्यग्निमिति मेदो रुद्धमार्गत्वात् कुम्भकारपवनन्यायेनान्तर्बलवान् अतिवृद्धो वायुरग्निं दीपयति अतिवृद्धस्तु वायुरग्निवैषम्यजनकः विकारांश्चाप्नुते घोरानिति वातविकाराणामन्यतमान् भोजनकालव्यतिक्रमात् विकारान् दारुणानिति। प्रमेहपिडकाज्वर भगन्दरवि-

द्विधिवातरोगाणामन्यतमान् अपचयोपचयोत्साह इति अपचया बलं मांसोपचयः उत्साहश्च यस्य स तथा॥१॥

इति व्याख्यामधुकोषे मेदोनिदानम्।

अथ उदरनिदानम्।

रोगाः सर्व्वेऽपि मन्देऽग्नौ सुतरामुदराणि च।
अजीर्णान्मलिनैश्चान्नैर्जायन्ते मलसञ्चयात्॥१॥

उदरोत्सेधसाधर्म्यादुदरनिदानम्।

उदरस्य विशेषेण वह्निदुष्टिजन्यत्वमाह॥

रोगाः सर्व्वेऽपि मन्देऽग्नावित्यादि। अग्निमान्द्यञ्च दोषत्रयजनकम्॥ यदुक्तं तेषामग्निबले क्षीणे कुप्यन्तिः पवनादय इति। मलिनैरिति अत्यन्तदोषजनकैर्विरुद्धाध्यशनादिभिः। मलसञ्चयादिति मलादोषाः पुरीषादय स्तेषामितिदृष्टत्वात् तन्त्रान्तरे च।

अतिसञ्चितदोषाणां पापं कर्म्म च कुर्व्वताम्। उदराण्युपजायन्ते मन्दाग्निना विशेषतः इति॥

यद्यपि मन्दाग्नित्वमलिनान्नयोः प्रत्येकमपि दोषत्रयजनकत्वमस्ति तथाप्यत्रो भयहेतुजत्वेन दोषदुष्टिप्रकर्षः ख्याप्यते। अतएव दुष्टिप्रकर्षं ख्यापनार्थं मलसञ्चयादित्यत्र संपूर्ण्वं कृतवान्॥१॥

(१) रोगाइत्यादिमूलम्। मन्देऽग्नौ सति सर्व्वे रोगा जायन्ते सुतरां निर्धारितमपि मन्देऽग्नौ सति अजीर्णादिभिश्च उदराणि जायन्त इति। तद् पूर्व्वरूपमित्यादि। बलवर्णकाङ्क्षोपक्षीणां विनाशः

रुद्ध्वा स्वेदाम्बुवाहीनि दोषाः स्रोतांसि सञ्चिताः।
प्राणाग्न्यपानान् संदूष्य जनयन्त्युदरं नृणाम्॥२॥
आध्मानं गमने शक्तिर्दौर्बल्यं दुर्बलाग्निता।

रुद्ध्वेत्यादौ स्वेदाम्बुवाहीनीति। स्वेदवहानि अम्बुवहानि च अनयोर्भेदः उदकवहानां स्रोतसां तालुमूलं क्लोम च स्वेदवहानां मेदोमूलं लोमकूपश्चेत्यनेनोक्तो ज्ञेयः स्रोतोरोधश्चात्र बहिरेव न पुनरन्तः। यदुक्तञ्चरके। स्वेदस्तु बाह्येषु स्रोतःसु प्रतिहतगतिस्तिर्यगवतिष्ठमानस्तदेवोदकमाप्याययतीति। अत एवोदरपूर्णता अन्तरसेन। प्राणाग्नीति पुनरग्निदूषणाभिधानेन मन्दत्वापन्नः पुनर्दोषकृतं सुतरामग्निमान्द्यं बोधयति। दोषसञ्चयगतेनापि वायुना प्राणापानयोर्दूषणं न विरुद्धं यतो वायुना बाह्यान्तरदुष्टिः क्रियत एव। सुश्रुते तु पूर्वरूपमस्योक्तं तद्यथा।

तत्पूर्वरूपं बलवर्णकाङ्क्षावलीविनाशो जठरे तु राज्यः। जीर्णापरिज्ञानविदाहवत्यो बस्तौ रुजः पादगतश्च शोथ इति॥२॥

उदराणां सामान्यरूपमाह।

आध्मानमित्यादि। मन्दाग्नितेति मन्दोऽग्निर्यस्य यत्र

सर्वं जठरे हि राजयश्च: जीर्णं न परिज्ञायते आध्मताश्च वा विदाह-वत्त्वेति जीर्णापरिज्ञान विदाहवत्त्व इति च राज्य इत्यस्य विशेषणं बस्तौ रुजः पादगतश्च शोथस्तत्पूर्वरूपम् उदराणां पूर्वरूपमिति १

शोथः सदनमङ्गानां सङ्गो वातपुरीषयोः ॥
दाहस्तन्द्रा च सर्वेषु जठरेषु भवन्ति हि ॥२॥
पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ।
संभवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु ॥३॥
तत्र वातोदरे शोथः पाणिपान्नाभिकुक्षिषु ।
कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्वभेदनम् ॥
शुष्ककासाङ्गमर्दाधोगुरुता मलसंग्रहः ।
श्यावारुणत्वगादित्वमकस्माद्वृद्धिह्रासवत् ॥
सतोदभेदमुदरं तनुकृष्णशिराततम् ।
आध्मातदृतिवच्छब्दमाहतं प्रकरोति च ।
वायुश्चात्र सरुक्शब्दो विचरेत्सर्वतो गतिः ॥४॥

हेतु सामान्यमग्नेरतिशयदौर्बल्यं लिङ्गत्वेन ज्ञेयम् उदराण्यष्टाविति यकृद्दाल्युदरस्य प्लीहोदरेण सार्द्धं समानचिकित्सतया तथोत्पत्तिविशिष्टदकोदरात्मकत्वेन दकोदरस्य समानलिङ्गस्यापि चिकित्सितत्वेनाभिन्नत्वात् अष्टावेवोदराणि भवन्ति। प्लीहोदरादीनि च यद्यपि चत्वारि दोषजानि तथापि हेतुलिङ्गचिकित्साभेदात् पृथगुक्तानि ॥ ३ ॥

वातोदरलक्षणे अकस्माद्वृद्धिह्रासवदिति अनियतवृद्धिह्रासयुक्तमुदरम् आध्मातदृतिवदिति वातपूर्णचर्मपुटवदिति। पैत्तिके दह्यत इति उदरमात्रं दह्यते

पित्तोदरे ज्वरो मूर्च्छा दाहस्तृट्कटुकास्यता ।
भ्रमोऽतीसारः पीतत्वं त्वगादावुदरं हरित् ॥
पीतताम्रशिरानद्धं सस्वेदं सोष्म दह्यते ।
धूमायते मृदुस्पर्शं क्षिप्रपाकं प्रदूयते ॥१॥
श्लेष्मोदरेऽङ्गसदनं स्वापश्वयथुगौरवम् ।
निद्रोत्क्लेशोऽरुचिः श्वासः कासः शुक्लत्वगादिता ।
उदरं स्तिमितं स्निग्धं शुक्लराजीततं महत् ।
चिराभिवृद्धं कठिनं शीतस्पर्शं गुरु स्थिरम् ॥१॥४॥
[2]स्त्रियोऽन्नपानं नखलोममूत्र विडार्त्तवै

दाहस्तु सकलदेहस्यैव बोध्यः । धूमायते धूममिवोद्‌-गमतिक्षिप्रपाकमिति क्षिप्रपाकाज्जलोदरतां यातीत्यर्थः । प्रदूयते व्ययते ॥ ४ ॥

सन्निपातोदरमाह ।

स्त्रिय इत्यादि । स्त्रीग्रहणमविवेकि सन्निहितजनोपलक्षणं गरं संयोगजं विषं दुष्टमम्बु सगरमत्स्यत्वगपर्यादि काययुतं विषमेवाम्भ्याद्युपहृतं मन्दप्रभावं वा दूषीविषमुच्यते । यदुक्तम् ।

(२) स्त्रियोऽन्नपानमित्यादि मूलम् । अनायुक्ताः अपचारिणाः स्त्रियः नखरोम मल विड़ार्त्तवयुक्तम् अन्नपानम् अरयः गर्दाश्च यस्मै प्रयच्छन्ति यश्च दुष्टाम्बुदूषीविषसेवनञ्च करोति तस्य ।

तेनेत्यादि । तदेतस्य तेन विशेषेण अनुरक्तं कुपितं दोषाश्च कुपिताः सन्तः सुघोरं त्रिलिङ्गं जठरं कुर्युरित्यन्वयः ।

युक्तमसाधुवृत्ताः। यस्मै प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा॥ तेनाशु रक्तं कुपिताश्च दोषाः कुर्युः सुघोरं जठरं त्रिलिङ्गम्॥१॥

(१)तच्छीतवाते भृशं दुर्दिने च विशेषतः कुप्यति दह्यते च। स चातुरो मुह्यति हि प्रसक्तं पाण्डुः कृशः शुष्यति तृष्णया च॥ दूष्योदरं कीर्त्तितमेतदेव॥१॥५॥

प्लीहोदरं कीर्त्तयतो निबोध। विदाह्य-

जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषितं वा। स्वभावतो वा गुणविप्रहीणं विषं हि दूषीविषतामुपैति।

तेनाशु रक्तमिति विषस्याग्नेयत्वेन रक्तदुष्टिः। कुपिताश्च दोषा इति। स्वभावात् दोषत्रयप्रकोपकं विषं भवति। तत् शीतवातादिषु कुप्यतीति दूषीविषस्य तत्रैव कोपात् मूर्च्छति विषयोगात् प्रसक्तं निरन्तरं दूष्योदरं कीर्त्तितमेतदेवेति एतदेव सन्निपातोदरं दूष्योदरं कीर्त्तितं न पुनरधिकमित्यर्थः। रक्तं दूष्यं दूषयित्वा भवतीति दूष्योदरं किम्वा परस्परं दूषयन्तीति दोषा एव दूष्याः तैः कृतमुदरं दूष्योदरम्॥५॥

प्लीहोदरे यकृत् कफवेल्लक् दृष्टैव तत्तुल्यकारणा-

---

(१) तच्छीत इत्यादि। तज्जठरं धर्म्मधर्म्मिणोरभेदोपचारात् कुप्यति दह्यते चेत्यर्थः। कीर्त्तयतो मम इति शेषः॥

अभिष्यन्दिरतस्य जन्तोः प्रदुष्टमत्यर्थमसृक् कफश्च। प्लीहाभिवृद्धिं कुरुतः प्रवृद्धो प्लीहोत्थमेतज्जठरं वदन्ति। तद्वामपार्श्वे परिवृद्धिमेति विशेषतः सीदति चातुरोऽत्र॥ मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः क्षीणबलोऽतिपाण्डुः॥१॥

सव्यान्यपार्श्वे यकृति प्रवृद्धे ज्ञेयं यकृद्दाल्युदरं तदेव॥१॥६॥

उदावर्त्तरुजानाहैर्मोहतृड्दहनज्वरैः।
गौरवारुचिकाठिन्यैर्विद्यात्तत्र मलान् क्रमात्॥७॥

यस्मान्द्रुमन्नैरुपक्लेऽपिभिर्वा वाताश्मभि

तथा पित्तदुष्टिरप्युच्यते विदाहिना रक्तं पित्तञ्च दूष्यते अतएव पश्चात् वक्ष्यति कफपित्तलिङ्गैरुपद्रुत इति अत्र पित्तस्य लिङ्गं मन्दोज्वरः कफस्य लिङ्गं मन्दाग्नित्वमिति गदाधरः। प्लीहोदर एव यकृद्दाल्युदरस्यावबोधं दर्शयन्नाह सव्यान्यपार्श्वेत्यादि सव्यान्यपार्श्वे दक्षिणपार्श्वे। तदेवेति तादृशमेव तेन प्लीहोदरसममेव न विलक्षणमित्यर्थः। यकृद्दालयति दोषै र्भेदयतीति यकृद्दाल्युदरम्॥६॥

तत्र दोषसम्बन्धमाह।

उदावर्त्त इत्यादि। उदावर्त्तरुजानाहै र्वातं मोहतृड्दहनज्वरैः पित्तं गौरवारुचिकाठिन्यैः कफं जानीयात्॥७॥

र्वापिच्छितं यथावत् । सञ्चीयते तस्य मलः सदोषः शनैः शनैः सङ्करवच्च नाड्याम् ॥ निरुध्यते तस्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम् । हृन्नाभिमध्ये परिवृद्धिमेति तस्योदरं बद्धगुदं वदन्ति ॥ ८ ॥

(४)शल्यं तथान्नोपहितं यदन्त्रं भुक्तं भिन-

बद्धगुदमाह ।

यस्यान्त्रमन्नैरित्यादि । उपलेपिभिः पिच्छिलैरन्नैः शाकशालूकादिभिः पिच्छितं विबद्धं यथावदिति यथार्हं मलः पुरीषं सदोष इति दोषत्रयसहितः नाड्यामित्यन्त्रनाड्यां शङ्कवदिति संमार्ज्जनीक्षिप्यमाण त्वगाद्युपकरो यथा चीयते क्रमेण तथेत्यर्थः । बद्धगुदमिति गुदोपरि अन्त्रस्य बद्धत्वात् बद्धगुदं यदुक्तं चरके पक्ष्मबालैः सहान्नेन भुक्तैर्बद्धायने गुद इति पुरीषायतनस्य बद्धत्वात् हृन्नाभिमध्येऽन्नपाकस्थाने वृद्धिः । गुदमात्रनिरोधे तु मलदोषैर्गुदादूर्द्धमेवोदरवृद्धिः स्यात् ॥ ८ ।

क्षतोदरमाह ।

शल्यं तथान्नोपहितमित्यादि । शल्यं कण्टकशर्क-

(४) शल्यमित्यादि मूलम् । अन्नोपहितम् अन्नयुक्तं भुक्तं शल्यं कण्टकशर्करादि अथवा पक्वाशयात् विलोमेन आगतं सत् यदन्त्रं भिनत्ति अन्यथा वा जृम्भणात्यशनाभ्यां यदन्त्रं भिद्यते तस्मादन्त्रात् भूयो यथा भवति तथा स्रुतः सलिलप्रकाशः सलिलं प्रकाशते

त्रागतमन्यथा वा। तस्मात्स्रुतोऽन्त्रात् सलिलप्रकाशः स्रावः स्रवेद्वै गुदात्तु भूयः ॥ नाभेरधस्तोदरमेति वृद्धिं निस्तुद्यते दाह्यति चातिमात्रम्। एतत्परिस्राव्युदरं प्रदिष्टं दकोदरं कीर्त्तयतो निबोध ॥ ८ ॥

रादि अन्नोपचितमन्नयुक्तं भुक्तं आगतमिति अर्थतः पाकाशयात् विलोमेनागतमन्त्रं भिनत्ति यद्वागतं हि शल्यमपिनान्त्रभेदकम्। अन्यथा वेति जृम्भणाद्यशनाभ्याम् अन्त्रं भिद्यते यदुक्तं चरके।

शर्करातृणलोष्टास्थिकण्टकैरन्नसंयुतैः।

भिद्यतान्त्रं या भुङ्क्ते जृम्भयात्यशनेनवेति ॥

स्रुत इति गलितः स्रावः स्रवेद्वै गुदतस्तु भूय इति। भूयो बहु यथा भवति तथास्रवात् स्रुतः ॥ दोषजेषु पुनरुपक्षेऽन्यायेनाल्प एव स्रावो भूयः पुनःपुनर्गुदतः स्रवेत् यो शब्दस्यार्थे भूवैः शब्दोऽप्यावर्त्तनीयः तेनोक्ता व्याख्यासाध्वी भवति ननु भिन्नान्त्रात् तिर्य्यगत स्रावनिर्गम स्यात्कथं स्राव स्रवेद्वै गुदतस्तु भूय इति प्रपद्यतेनैवं सच्छिद्रान्त्रमार्गेण बहिर्गतस्यातिरिक्तस्य पुदरागमनात् उपक्षेऽन्यायाद्वा

यस्मात् भस्रावः भूयः पुनः पुनर्गुदतः स्रवेत निर्गच्छेत्। तेन च नाभेरध उदरं वृद्धिमेति निस्तुद्यते तोदयुक्तम् अतिमात्रं दह्यते च एतत् परिस्राव्युदरं प्रदिष्टं कथितम्। अतःपरं दकोदरं कीर्त्तयतो मत्तः निबोधजानीहि।

[५]यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथवा निरूढः। पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि॥ स्नेहोप-

गुदतः स्राव उपपन्न एव रचकेऽप्युक्तं पूरयन् गुदमन्त्रञ्च जनयत्युदरं स्रवामिति तेन स्रावेण द्रवस्य निम्नगत्वान्नाभेरधो जठरं वृद्धिमेति तच्छिद्रोदरं नाम जलोदरमपि भवत्येव इति गदाधरः यतश्चरकेनोक्तं तदधो नाभेः प्रायोऽभिनिर्वर्त्तमानं जलोदरं स्यादिति तदन्येनानुमन्यन्ते यतश्छिद्रोदरं शीघ्रं जलोदरं तां यातीत्यभिप्रायेण चरकेणोक्तम् अन्यथा दकोदरं पृथक् न स्यात्॥ ८॥

उत्पत्तिविशिष्टं दकोदरमाह।

यः स्नेहपीत इत्यादि। स्नेहपीत इति कर्त्तरि क्तः तेन स्नेहं पीतवानित्यर्थः। दुष्यन्तीति स्वकर्मसु दुष्टानि भवन्तीति तद्वहानि उदकवहानि। तेष्विति उदकवह

(५) यः स्नेहं पीत इत्यादि सूत्रम्। यः स्नेहं पीतवान् अथवा स्नेहः पीतो येन अनुवासितः कृतस्नेहवस्तिकः वान्तो विरिक्त इति कर्त्तरि क्तः अथवा निरूढः कृतकषायवस्तिकः शीतलं जलम् आशु शीघ्रं पिबेत् तस्य तद्वहानि उदकवहानि स्रोतांसि दुष्यन्ति स्वकर्मस्वि असमर्थानि भवन्ति अत वातेषु उदकवह स्रोतः सु स्नेहोपलिप्तेषु सत् सु यदकोदरं पूर्ववत् अभ्युपैति। यदुदरं स्निग्धं महत् परिवृत्तनाभि परिपूर्णत्वात् स्तनाभिवृत्तं तत् समाततं वेदनया विकीर्य्यमानम् अम्बुना च पूर्णं भवतीत्यर्थः जलपूर्णोदृतिरिव क्षुभ्यति कम्पते च शब्दायते गुड़गुड़ायते तत् दकोदरमित्यन्वयः।

त्स्रिप्तेष्वथवापि तेषु दकोदरं पूर्व्ववदभ्युपैति ।
यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि
दकोदरं तत् ॥१०॥
जन्मनैवोदरं सर्व्वं प्रायः कृच्छ्रतमं मतम् ।

स्रोतः सुपूर्व्ववदिति यथा पूर्व्वमुक्तम् अन्नरस उपस्नेह-
न्यायेन बहिर्निःसृत्योदरं जनयति यथा जलं बहिर्निः-
सृत्योदरं जनयतीति जेज्जडः । गदाधरस्त्वाह वातान्नो-
दरे यथा अधोनाभेरुदराभिवृद्धि र्गुदस्यावश्च तथा जलो-
दरे यथा अधोनाभेरुदराभिवृद्धि र्गुदस्यावश्च तथा जलो-
दरेऽपि भवतीति ननु सर्व्वेषामेव उपस्नेहन्यायेन बहि-
र्निःसृतान्नरसमूलत्वात् कथमनुदकत्वमुच्यते नैवं तेषु हि
प्रथमतो नातिमन्दत्वात् अग्नेरन्नरसस्याल्पत्वाच्चानुदक-
त्वम् अल्पत्वेन तद्व्यपदेशत्वात् अत्र तु प्रागेव भूरिजलो-
त्पत्तिरिति विशेषः । समानतां वेदनया विसार्य्यमाणमि-
वोदरं करोति । यथा दृतिः क्षुभ्यतीति दृतिरिव जल-
पूर्णा क्षुभ्यतीति अन्तर्जलचलनमिव धत्ते शब्दायते गुड़-
गुड़ायते ॥ १० ॥

(१)जन्मनैवोदरमिति उत्पन्नमात्रेणैव । अजातोदकस्यो-
दरस्य लक्षणं चरकेऽवगन्तव्यं तद्यथा ।

(१) जन्मनेत्यादि । जन्मना उत्पत्तिमात्रेणैव सर्व्वम् उदरं
प्रायः कृच्छ्रतमं ज्ञेयम् । बलिनः अजाताम्बु तद् उदरं नवोत्थितञ्चेद
कृच्छ्रसाध्यं मतम् ।

बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितम्॥११॥
पक्षाद्बद्धगुदं तूर्द्ध्वं सर्व्वं जातोदकं तथा।
प्रायो भवत्यभावाय छिद्रान्त्रं चोदरं नृणां॥१२॥

अजातशोथमरुणं सशब्दं नातिभारिकम्।
सदा गुडगुडायन्तं शिराजालोपलक्षितम्॥
नाभिं विष्टभ्य पायौ तु वेगं कृत्वा प्रणश्यति।
हृद्वंक्षणकटीनाभिगुदप्रत्येकशूलिनः॥
कर्कशं सृजतो वातं नातिमन्दे च पावके।
लोलस्य विरसे चास्ये मूत्रेऽल्पे संहते विशि॥
अजातोदकमित्येतैर्ज्ञं विज्ञाय लक्षणैरिति॥

अत्र कर्कशमिति वेगवन्तम्। जातोदकस्य लक्षणं चरके यथा कुक्षेरतिमात्रं वृद्धिः शिरान्तर्धानगमनम् उदकपूर्णदृतिसमानक्षोभस्पर्शनञ्च भवतीति॥ ११॥

पक्षादित्यादि। बद्धगुदमुदरं (क)पक्षादूर्द्ध्वं विनाशय-

(क) पक्षादूर्द्ध्वमित्यादि। पक्षादूर्द्ध्वं बद्धगुदम् उदरं तथा सर्व्वं जातोदकं छिद्रान्त्रं च उदरं नृणाम् अभावाय विनाशाय प्रायो भवति प्रायः ग्रहणात् पक्षादनूर्द्ध्वं भवतीति। अजातोदकोदरस्य लक्षणं चरके तद्यथा अजातशोथमित्यादि। हृद्वंक्षण कटी नाभी गुद प्रत्येक-शूलिनः कर्कशं वेगवन्तं वातं सृजतो लोलस्य चलितचित्तस्य अनतिमन्दे पावके आस्ये विरसे मूत्रे अल्पे संहते विशि सति तस्य अजातशोथं शोथ-शून्यम् अरुणवर्णं सशब्दं नातिभारिकं नाभौ तत्याद्यमानं सदा गुड-गुडायन्तं शिराजालगवाक्षितम् उदरं नाभिं विष्टभ्य आक्रम्य पायौ वेगं कृत्वा प्रणश्यति इत्येतैर्लक्षणैः अजातोदकं विजानीयादिति॥

शूनाक्षं कुटिलोपस्थमुपक्लिन्नतनुत्वचम् ।
बलशोणितमांसाग्निपरिक्षीणञ्च वर्ज्जयेत् ॥
पार्श्वभङ्गान्नविद्वेषशोथातीसारपीडितम् ।
विरिक्तञ्चाप्युदरिणं पुज्यमानं विवर्ज्जयेत् ॥१३॥

तीति जातोदकं पश्चात् प्रायो यत्नेन कदाचित् पश्चादूर्द्ध्वमपि न विनाशाय तथा शल्यशास्त्राभिहितया चिकित्सया कदाचिज्जातोदकं छिद्रान्त्रं बद्धगुदञ्च सिध्यतीति दर्शयति जातोदकं छिद्रान्त्रञ्च विनाशाय पक्षादूर्द्ध्वमिति सम्बन्धः इति केचित् ॥ १२ ॥

साध्यतयाभिहितानामप्यवस्थाविशेषेणासाध्यतामाह ।

शूनाक्षमित्यादि । उदरिणमिति शेषः कुटिलोपस्थमिति वक्रमेहनम् उपक्लिन्ना तनुत्वचश्चेति उपक्लिन्नातन्वीत्वक् यस्य तम् । अग्निपरीक्षणाम् अग्निक्षयश्च यद्यप्युदरे पूर्व्वमेव भवति तथाप्यत्र विशेषेणाग्निक्षयोपलक्षणान्तरयुक्तस्यासाध्यता मिञ्चं सम्भवतीति ज्ञेयम् ॥ १३ ॥

इति व्याख्यामधुकोशे उदरनिदानम् ।

इति व्याख्यामधुकोषपञ्जिकायामुदरनिदानम् ।

अथ शोथनिदानम्।

रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिःशिराः।
नीत्वा रुद्धगतिस्तैर्हि कुर्य्यात्त्वङ्मांससंश्रयम्॥
उत्सेधं संहतं शोथं तमाहुर्निचयादतः ॥१॥
सर्वं हेतुविशेषैस्तु रूपभेदान्नवात्मकम् ॥२॥

उदरे शोथस्योपद्रवकथनात्तदनन्तरं शोथनिदानं तस्य संप्राप्तिमाह।

रक्तपित्तकफानित्यादि। रक्तपित्तकफान् स्वहेतुभिः स्वातन्त्र्येण दुष्टान् कुपितान् दुष्टः स्वहेतुकुपितो वायुर्बहिःशिरास्ताश्च अगम्भीराः शिरा नीत्वा गमयित्वा तैरक्तपित्तकफै रुद्धगतिराहतमार्गो वायुरुत्सेधमुच्छ्रायं कुर्य्यादिति योजना बहिः शिराशब्देनात्रागम्भीरतयोक्तान स्रोतसामपि ग्रहणं त्वङ्मांससंश्रयमित्यनेन व्रणशोथाद्भेदं दर्शयति अष्टसु व्रणवास्तुषु व्रणशोथस्य सम्भवात् यदुक्तं त्वङ्मांसशिरास्नाय्वस्थिसन्धिकोष्ठमर्म्माणीत्यष्टौ व्रणवास्तूनि भवन्तीति संहतं संहतात्मकम्। कुतः संहतात्मकमित्यत आह। निचयादत इति। अतोऽस्मात् पूर्वोक्तात् रक्तसहितदोषत्रयसमुदायादेतेन रक्तसहितत्रिदोषजन्यत्वमस्योक्तं भवति ॥१॥

सर्व्वमित्यादि। सर्व्वमिति पूर्वेण सम्बध्यते सर्व्वमुत्सेधं शोथमाहुः हेतुविशेषैरिति दोषत्रयाभिघातप्रभृतिभिः कारणभेदै र्यो रूपभेदस्तस्मान्नवात्मकमाहुरिति

दोषैः पृथग्द्वयैः सर्व्वैरभिघाताद्विषादपि ॥१॥
तत्पूर्व्वरूपं दवथुः शिरायामोऽङ्गगौरवम् ॥२॥

शुद्ध्यामयाभक्तकृशाबलानां क्षाराम्लतीक्ष्णोष्णगुरूपसेवा। दध्याममृच्छाकविरोधिदुष्ट गरोपसृष्टान्ननिषेवणञ्च ॥ अर्शांस्यचेष्टा नच देहशुद्धिर्मर्म्मोपघातो विषमा प्रसूतिः। मिथ्योपचारः प्रतिकर्म्मणांच निजस्य हेतुः श्वयथोः प्रदिष्टः ॥१॥

सगौरवं स्यादनवस्थितत्वं सोत्सेधमुष्माथ शिरातनुत्वम्। सलोमहर्षश्च विवर्णता च सामान्यलिङ्गं श्वयथोः प्रदिष्टम् ॥३॥

पूर्व्वक्रियया सम्बन्धः। सर्व्वहेतुविशेषैरिति पाठान्तरे सर्व्वेषां हेतुविशेषैरित्यर्थः। द्वयैरिति द्वन्द्वैस्त्रिभिः। दवथुरुपतापः शिरायामः शिराप्रसरणवत् पीड़ा ॥ २ ॥

पूर्व्वरूपानन्तरं कामचारान्निदानमाह।

शुद्ध्यामयेत्यादि। शुद्धिर्वमनविरेचनादि आमया ज्वरादयः अभुक्तमभोजनं विगुणञ्च भोजनं तैः कृशानामबलानाञ्च क्षारादिसेवा निजस्य श्वयथोर्हेतुर्दध्यादयः स्वतन्त्रा एव हेतवः आममपक्वं दुष्टं दोषजनकं मन्दकं संयोगजं विषम् अचेष्टा निष्क्रियत्वं नच देहशुद्धिरिति शोधनार्हेऽपि दोषे देहाशुद्धिर्मर्म्मोपघात इह दोषकृत एव

चलस्तनुत्वक् परुषोऽरुणोऽसितः सुसुप्तिहर्षार्त्तियुतोऽनिमित्ततः । प्रशाम्यति प्रोन्नमति प्रपीडितो दिवाबली च श्वयथुः समीरणात् ॥१॥

मृदुः सगन्धोऽसितपीतरागवान् भ्रमज्वरस्वेदतृषामदान्वितः । य उष्यते स्पृष्टरुगक्षिरागकृत्स पित्तशोथो भृशदाहपाकवान् ॥२॥

भेदः साक्षाद्धेतुस्तु मर्मोपघात आगन्तु शोथहेतुरेव विषमाप्रसूति रामगर्भपतनादिका मिथ्योपचारो सम्यक् करणमसम्यगुपचारः प्रतिकर्मणां वमनादीनाम् । रुगौरवमिति । अनवस्थितत्व विशेषणं तथा रोतृषेधमिति च ॥ १ ॥

वातशोथलिङ्गे तनुत्वक् अवक्कलत्वक् असितः कृष्णः सुप्तिः स्पर्शाज्ञता हर्षो झिनिझिनिवद्वेदना किम्वा रोमहर्षोऽनिमित्ततः प्रशाम्यतोति वायो चलत्वेन कदाचित् निमित्तं विनापि क्षीणो भवति निमित्ततं इति पाठे स्नेहोष्णमर्दनादि निमित्ततः प्रशाम्यति उपशयं प्राप्नोतीति उपशमार्थमेतदुक्तं प्रोन्नमति प्रपीडित इति प्रपीडितः सन् अन्तर्नमतीत्यर्थः दिवाबलीति दिवाबलवान् नक्तंबली स्नेहोष्णमर्दनाद्यैश्च प्रशाम्येत् स च वातिकः यस्त्वापरकृतवर्णाभिः शोथो नक्तं प्रशाम्यतीति चरकवचनात् । पैत्तिके उष्यते इति दह्यते । कफजं रोचकान्वित इति अरोचकव्याधिसहचारी कफजस्य प्रशम इति विरोद्-

गुरुः स्थिरः पाण्डुररोचकान्वितः प्रसेक-
निद्रावमिवह्निमान्द्यकृत्। स कृच्छ्रजन्म प्रशमो
निपीडितो न चोन्नमेद्रात्रिबली कफात्मकः॥२॥४॥
निदानाकृति संसर्गात् श्वयथुः स्याद्विदोषजः॥१॥
सर्वाकृतिः सन्निपाताच्छोथो व्यामिश्रलक्षणः॥२॥५॥
अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः।
हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजैः॥

पक्तिविनाशः रात्रिबलीति रात्रौ स्रोतोऽवरोधजेन देहक्लेदेनाचेष्टया च कफस्य दृढत्वात् तज्जः शोथो बलवान् भवति दिवा तु स्फुटस्रोतसि शरीरे सचेष्टे न कफो बली भवति। किन्तर्हि वायुः तेन तज्जः शोथो दिवाबली भवति॥४॥

व्यामिश्रौषधविधानार्थं क्वापि प्रकृतिसमवेता अपि शिष्यहितैषितया द्वन्द्वसन्निपाता अतिदेशेन पठ्यन्ते ये तु विकृतिविषमसमवेता स्तान् कण्ठरवेण पठन्ति। अतो अतिदेशेन द्वन्द्वत्रय सन्निपातानाह। निदानाकृति संसर्गादित्यादि। व्यामिश्रलक्षण इति मिश्रितवातादित्रयलिङ्गः। अनेनैव सर्वाकृतिरित्यस्यार्थे सिद्धे तदभिधानं वातादि प्रत्येकं कृत्स्नलिङ्गनियमार्थम्॥५॥

अभिघातजं श्वयथुमाह।

अभिघातेनेत्यादि। अभिघातेन यः शोथो शस्त्रादिभि र्भवति। हिमानिलोदध्यनिलैरिति हिमानिल-

रसैः शूकैश्च संस्पर्शाच्छ्वयथुः स्याद्विसर्पवान्।
भृशोष्मा लोहिताभासः प्रायशः पित्तलक्षणः॥६॥
[१]विषजः सविषप्राणि परिसर्पणमूत्रणात्।
दंष्ट्रादन्तनखाघातादविषप्राणिनामपि॥
विण्मूत्रशुक्रोपहत मलवद्वस्त्रसङ्करात्।
विषवृक्षानिलस्पर्शात् गरयोगावचूर्णनात्॥
मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः।

सदध्यनिलैषदधिः समुद्रः भल्लातकपिकच्छुजैः रसैः शूकैश्च कपिकच्छ्वा एव कपिकच्छुः शूकशिम्बा ॥ ६ ॥

विषजः स विषप्राणीत्यादि। स विषप्राणिनः सर्पादय तेषां परिसर्पणं भ्रमणं तस्मात् दंष्ट्रा कुटिलदाढेति ख्याता तद्विपरीतश्च दन्तो गोवलीवर्द्द न्यायात्। विण्मूत्रशुक्रोपहतमलवद्वस्त्रसङ्करादिति स विषप्राणिनां विण्मूत्रादुपहतं मलवच्च वस्त्रं यत्तस्य संस्पर्शनात् अवलम्बी अधोगमनशीलः शीघ्रः शीघ्रोत्पत्तिः अयञ्चागन्तुरपि विशिष्ट लिङ्गचिकित्सायोगात् पृथक्पठितः ॥ ७ ॥

---

(१) विषज इत्यादि मूलम्। सविषप्राणि परिसर्पण मूत्रादिस्पर्शात गरयोगावचूर्णनात् विषजं दुष्टद्रव्यस्य विलेपनात् मृदुश्चल इत्यादि विशेषलक्षणो विषजः श्वयथुः स्यादिति योज्यम्॥

व्याधेरेवाव्यादिरिष्टभूतत्वमिति। तस्य च व्याधेः निमित्तकृतत्वात् हेतुविशेषजन्यत्वात् तथा च शोथः यारिष्ट इत्यादि वचनात् व्याधेरन्यदरिष्टं कश्चित्त विशेषहेतुवशात् व्याधेररिष्टभूतत्वमिति भावः॥

दोषाः श्वयथुमूर्द्ध्वं हि कुर्व्वन्त्यामाशयस्थिताः ।
पक्वाशयस्थामध्येतु वर्च्चःस्थानगतास्त्वधः ॥
कृत्स्नदेहमनुप्राप्ताः कुर्य्युः सर्व्वसरस्तथा ॥८॥
यो मध्यदेशे श्वयथुः सकष्टः सर्व्वगश्च यः ।
[२]अर्द्धाङ्गेऽरिष्टभूतः स्याद्यश्चोर्द्ध्वं परिसर्पति ॥९॥

यतस्थादोषा यत्र देशे शोथं कुर्व्वन्ति तदाह ।

दोषाः श्वयथुमूर्द्ध्वमित्यादि। ऊर्द्ध्वमिति उरः प्रभृत्यूर्द्ध्वदेहे मध्य इति उरः पक्वाशयमध्ये अध इति पक्वाशयादधः सर्व्वसरं सर्व्वशरीर शरणशीलम् ॥ ८ ॥

अतःपरं कृच्छ्रादिभेदमाह ।

यो मध्यदेशः इत्यादि। मध्यदेहगस्य कष्टत्वं तद्देशस्य शोथप्रभावात् सर्व्वग इति सर्व्वदेहगामी सर्व्वज इति पाठान्तरे सर्व्वजः सान्निपातिकः रिष्टभूतः इति रिष्टतुल्यः भूतशब्द उपमाने यथा मातृभूतः पितृभूतः इति। व्याधेरेवात्र रिष्टभूतत्वं तस्य च निमित्तकृतत्वात् भूतशब्द उपात्त इति कार्त्तिकः अन्ये भूतशब्दं स्वरूपवचनमाहुः ।

---

(२) अर्द्धाङ्गेत्यादि मूलम्। अर्द्धाङ्गे यः शोथः यश्च ऊर्द्ध्वं परिसर्पति सोऽरिष्टभूतः नियतमरणाख्यापक चिह्नतुल्यः असाध्य इति यावत् स्यात् भवेत्। रिष्टभूत इति पाठे तु स एवार्थः यदुक्तं रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते। तल्लक्षणमरिष्टं स्यात् रिष्टञ्चापि तदुच्यते। यस्य श्वयथो पादादि भवति शोथश्च विसर्पतीति बोध्यम्। अन्यत्सुगमम् अन्यं रोगम् ।

श्वासः पिपासाच्छर्दिश्च दौर्बल्यं ज्वर एव च।
यस्य चान्ने रुचिर्नास्ति श्वयथुस्तं विवर्जयेत्॥१॥
अनन्योपद्रवकृतः शोथः पादसमुत्थितः।
पुरुषं हन्ति नारीञ्च मुखजो गुदजोऽप्ययम्॥१॥
नवोऽनुपद्रवः शोथः साध्योऽसाध्यः पुरेरितः॥१॥
विवर्ज्जयेत्कुक्ष्युदराश्रितञ्च तथा गले मर्म्मणि

यथोर्द्ध्वं परिसर्पतीति पुरुषविषयमेतत् चकारात् स्त्रिया-श्चोपरिजो योऽधोयातीति सम्बध्यते तथा गुह्यशोथः सर्वगः वचनं हि यस्तु पादाभिनिर्वृत्तः शोथः सर्वाङ्गगो भवेत् पुरुषं हन्ति नारीञ्च मुखजो गुह्यजो द्वयमिति ॥८॥

अनन्योपद्रवकृत इति अन्यस्य उपद्रवा अन्योपद्रवा स्तद्विपरीता अनन्योपद्रवा एतेनायमर्थः शोथस्यैव ये उपद्रवास्तैः कृतश्च।

श्वासः पिपासा दौर्बल्यं ज्वरश्छर्दिररोचकः।
हिक्कातीसारकासाश्च शोथिनं क्षपयन्ति हीति॥
सुश्रुतोक्तिः चरकेणुक्तम्।
छर्दिस्तृष्णारुचिः श्वासो ज्वरोऽतीसार एव च।
सप्तकोऽयं सदौर्बल्यः शोथोपद्रवसंग्रहः इति॥

अथवा अन्यमुपद्रवं करोतीति अन्योपद्रवकृन्निदानं नान्योपद्रवकृतोऽनन्योपद्रवकृत स्मृतः स्वनिदानाख्यात इति शोथः तेन शोथजनकनिदानादेव उत्पन्न इत्यर्थः पाण्डु-रोगादौ तु यः शोथः पादसमुत्थः सोऽन्योपद्रवकृतनिदा-

संस्थितश्च । स्थूलः खरश्चापि भवेद्विवर्णो
यश्चापि बालस्थविराबलानाम् ॥१०॥

अथ वृद्धिनिदानम् ।

क्रुद्धोऽनूर्द्ध्वगतिर्वायुः शोथशूलकरश्चरन् ॥

नान्तरोत्थितः साध्य एव अनन्योपद्रवगत इति पाठान्तरे अयमर्थः पादयोरुत्थितः पूर्व्वं पश्चादाननम् उपद्रवेण प्रसारेण उपद्रवत्वेन वा गतः । तथा च तन्त्रान्तरम् ।

पादप्रवृत्तः श्वयथुर्नृणां यः प्राप्नुयान्मुखम् ।
स्त्रीणां वक्त्रादधो याति वस्तितश्च न सिध्यतीति ॥

क्षारपाणिनाप्युक्तम् ।

ऊर्द्ध्वगामी नरं पद्भ्यामधोगामी मुखात् स्त्रियम् ।
उभयं वस्तिकश्चातः शोथो हन्ति न संशयः इति ॥

गुह्यज इति वस्तिजातः सर्पन् हृदयमिति नरं नारीञ्च असाध्यः पुरेरित इति यद्योऽरिष्टभूत इत्यादिना ॥१०॥

इति व्याख्यामधुकोषे शोथनिदानम् ।

शोथत्व सामान्यात् शोथानन्तरं वृद्धिरभिधीयते ।

वृद्धेः संप्राप्तिमाह ।

क्रुद्धोऽनूर्द्ध्वगति वायुरित्यादि । अनूर्द्ध्वगतिरधोगति

इति व्याख्यामधुकोषपरिशिष्टायां शोथनिदानम् ।

मुष्कौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः ॥
प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः ॥२॥
दोषास्रमेदोमूत्रान्त्रैः स वृद्धिः सप्तधा गदः ॥२॥
मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलम् ॥२॥
वातपूर्णदृतिस्पर्शो रूक्षो वातादहेतुरुक् ॥२॥
पक्वोदुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान् ॥२॥

वायुः मुष्कौ प्राप्य चरन् गच्छन्। वङ्क्षणतो मेढ्रजङ्घासन्धेः सकाशात्। फलकोषाभिवाहिनीरिति फलस्य कोषः फलकोषौ अथवा फलयोः कोषौ तद्वहा धमनीः प्रपीड्य सन्दूष्य वृद्धिं करोति फलकोषयोरिति द्विवचनमुपलक्षणं तेनैककोषेऽपि दृश्यमाना वृद्धिः सङ्गृहीता स वृद्धिरिति क्तिच् क्तौ च संज्ञायामित्यनेन क्तिजन्तो वृद्धिशब्दः पुंलिङ्गः क्तिन्नन्तस्तु स्त्रीलिङ्गः वृद्धिः कुरण्डोऽभिधीयते संख्येय निर्देशादेव संख्यायां लब्धायां सप्तधेति वचनं न्यूनाधिकसंख्यानिरासार्थं तेन द्वन्द्वजादि वृद्धेरधिकाया निरासः असम्भवस्तु तस्या व्याधिस्वभावात् मूत्रान्त्रवृद्ध्योर्वातवृद्ध्यान्तर्भावात् न्यूनसंख्यानिरासार्थम् अनयोर्वातजत्वेऽपि निमित्तचिकित्साभेदात् पृथगभिधानं निमित्तभेदनिबन्धन एव व्याधिभेदः। यदुक्तं दोषदूष्यसंसर्गादायतनविशेषात् निमित्ततश्चैषां व्याधीनां भेदः अत आह मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलमिति अहेतुरुगित्यनिमित्ततो दाहादिरुक् रूक्षे स्पर्शे स्फोटा-

कफाच्छीतो गुरुः स्निग्धः कण्डूमान्कठिनो-ऽल्परुक् ॥१॥

कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः ।
कफवन्मेदसा वृद्धिर्मृदुस्तालफलोपमः ॥१॥
[1]मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः ।
अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुङ्मृदुः॥

वृत इति पित्तजवृद्धिलिङ्गादधिकं तेन हेतुलिङ्गचिकित्साभेदाद्रक्तज वृद्धिः पृथग्गण्यते । मेदोजे तालफलोपम इति पक्वतालफलमिव नीलवर्तुलः । मूत्रजे मूत्रकृच्छ्रमिति मूत्रकृच्छ्रवत् वेदना चलयन् फलकोषयोरिति फलकोषयोश्चलयन्नचलो भवन्नित स्ततो गच्छन् कोऽधः स्यात् चलयन्निति स्वार्थिकोऽपि च ॥ १ ॥

अन्त्रवृद्धिमाह ।

वातकोपिभिरित्यादि । धारणं वेगस्योपस्थितस्य ईरणमप्राप्तस्य वेगस्य क्षोभणैः क्षुभितोऽन्यैरिति बलवद्विग्रहधनुराकर्षणादिभिः क्षुद्रान्त्रावयवमिति वृहदन्त्रव्युदासार्थं विगुणीकृत्येति सङ्कुचीकृत्य । द्विगुणीकृत्येति

(१) मूत्रधारणशीलस्येत्यादि मूलम् । मूत्रधारणशीलस्य पुरुषस्य मूत्रजो वृद्धिर्भवति सवृद्धिर्गच्छतश्च अम्भोभिः पूर्णदृतिवद् क्षोभं याति सरुक् रुजायुक्तः मृदुः स्निग्धश्च यदा तु फलकोषयोश्चलयन् चलो भवन् अनन्तरम् इतस्ततो गच्छन् तयोरधः स्यात् मूत्रकृच्छ्रं मूत्रकृच्छ्रवेदनास्यादिति योज्यम् ।

मूत्रकृच्छ्रमधः स्याच्च चलयन्फलकोषयोः॥ २॥

(२)वातकोपिभिराहारैः शीततोयावगाहनैः।
धारणेरणभाराध्वविषमाङ्गप्रवर्त्तनैः॥
क्षोभणैः क्षोभितन्यैश्च क्षुद्रान्त्रावयवं यदा।
पवनो विगुणीकृत्य स्वनिवेशादधो नयेत्॥
कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा।

उपेक्ष्यमाणस्य च मुष्कवृद्धिमाध्मानरुक-

पाठान्तरे सङ्क्षोभेण द्विगुणीकृत्य स्वनिवेशात् स्वस्थानात् तथा वङ्क्षणसन्धिस्थः सन् वङ्क्षणसन्धौ ग्रन्थिरूपं शोथं श्वयथुं करोति तत्र ग्रन्थिरूपेण स्थित्वा कालान्तरेण फलकोषं गच्छतीति तां मुष्कवृद्धिमाध्मानरुक्स्तम्भवतीं तदा उपेक्ष्यमाणस्य चिकित्सितपुरुषस्य अत्र भोजः।

अन्त्रं द्विगुणमादाय जन्तोर्नयति वङ्क्षणम्।
वङ्क्षणात्तद्वृषणयुक्तं फलकोषं प्रपद्यते इति॥

प्रध्मापयन्निति उक्तं नयन्। अथाध्मोयमिति कथं

---

(२) वातकोपिभिरित्यादि। वातकोपिभिराहारैः दुष्टं शीततोयावगाहनादिभिरन्यैश्च क्षोभनैः क्षुभितो वायुः क्षुद्रान्त्रावयवं विगुणीकृत्य संकुचितीकृत्य यदा स्वनिवेशात् स्वस्थानात् तम् अधो नयेत् तदा वङ्क्षणसन्धिस्थः सन् वङ्क्षणसन्धौ ग्रन्थ्याभं श्वयथुं कुर्य्यात् अन्त्रावनमनस्य वङ्क्षणत्वात् शर्व तदा उपेक्ष्यमानस्य अचिकित्सितपुरुषस्य मरुत् आध्मानरुक् स्तम्भवतीं मुष्कवृद्धिं कुर्य्यात् स्वनिमित्तत् नरवशमागतग्रा ग्रन्थिरूपान्त्रावयवस्य कालान्तरेण मुष्कगतत्वात्।

स्थ श्वयथुं सवायुः । [२]प्रपीड़ितोऽन्तः स्वनवान्
प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः ॥
अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः ॥२॥

अथ गलगण्डगण्डमालापचीग्रन्थ्यर्बुदनिदानम् ।

विवद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले ।

र्विकल्पाविधानात् नैवम् अप्राप्तिफलकोपायाभयं चिकित्साविधिः । प्राप्तफलकोपे त्वसाध्यायाप्यायां वा तस्यां चिकित्साविधिः । यदुक्तं भोजे याप्यां तामन्त्रजां विदुरिति । ब्रध्ननिदानन्तु तन्त्रान्तरे पठ्यते तद्यथा ।

अत्यभिष्यन्दि गुर्वन्नसेवनान्निचयं गतः ।
करोति ग्रन्थिवच्छोथं दोषो वङ्क्षणसन्धिषु ॥
ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्दिशेत् ॥२॥

इति व्याख्यामधुकोषे वृद्धिब्रध्ननिदानम् ।

---

(२) प्रपीड़ित इत्यादि । अयम् अन्त्रवृद्धिः प्रपीड़ितः सन् स्वनवान् शब्दं कुर्व्वन् अन्तः प्रयाति प्रध्मापयन् उच्छूनयन् मुष्कमिति शेषः अन्तर्मुक्तः सन् पुनर्बहिः एति आगच्छति अयम् अन्त्रवृद्धिरसाध्यो वातवृद्धिसमाकृतिश्च ।

इति व्याख्यामधुकोषपञ्जिकायां वृद्धिनिदानम् ।

महान् वा यदि वा ह्रस्वो गलगण्डं तमादिशेत् ॥१॥

वातः कफश्चापि गले प्रदुष्टो मन्ये तु संश्रित्य तथैव मेदः । कुर्व्वन्ति गण्डं क्रमशः स्वलिङ्गैः समन्वितं तं गलगण्डमाहुः ॥२॥

तोदान्वितः कृष्णशिरावनद्धः श्यावोऽरुणो वा पवनात्मकस्तु । पारुष्य युक्तश्चिरवृद्ध्यपाको

इति वृद्धियुक्तमुष्कश्मानलिङ्गताद्गलगण्डनिदानम् ।

तस्य सामान्यलिङ्गमाह ।

निबन्ध श्वयथुरित्यादि । निबन्धोऽनुबन्धवान् मुष्कवद्दण्डवत् ॥ भोजेऽप्युक्तम् ।

महान्तं शोथमल्पं वा हनुमन्यागलाश्रयम् ।

लम्बन्तं मुष्कवद्वा गलगण्डं विनिर्द्दिशेदिति ॥१॥

तस्य संप्राप्तिमाह ।

वातः कफश्चापि गले प्रदुष्ट इत्यादि । वातकफमेदांसि पृथक्गलगण्डकारणानि । तेन त्रय एव गलगण्डाः पैत्तिकस्तु न भवत्येव व्याधिस्वभावात् चातुर्थकज्वरवत् चातुर्थके हि वचनं चातुर्थको दर्शयति प्रभावं द्विविधं ज्वरः जङ्घाभ्यां श्लैष्मिकः पूर्व्वं शिरसोऽनिलसम्भव इति । क्रमशः इत्यनेन शनैरेव वर्द्धनन्दर्शयति । स्वलिङ्गैः समन्वितमिति निबद्धः श्वयथुरित्यादिना उक्त गलगण्ड लिङ्गैरन्वितम् । २ ।

वातजे चिरवृद्धिरिति विकारप्रभावात् वातजोऽपि

यदृच्छया पाकमियात्कदाचित् ॥ वैरस्यमास्यस्य च तस्य जन्तो र्भवेत्तथा तालुगलप्रशोषः ॥१

स्थिरः सवर्णोगुरुरल्पकण्डुः शीतोमहांश्चापि कफात्मकस्तु । चिराभिवृद्धिं भजते चिराद्वा प्रपच्यते मन्दरुजः कदाचित् ॥ माधुर्य्यमास्यस्य च तस्य जन्तो र्भवेत्तथा तालुगल प्रलेपः ॥ १ ॥

स्निग्धोगुरुः पाण्डुरनिष्टगन्धो मेदोभवः कण्डुयुतोऽल्परुक्च । प्रलम्बतेऽलावुवदल्पमूलो देहानुरूपक्षयवृद्धियुक्तः ॥ स्निग्धास्यता तस्य

चिरेण वर्द्धते । यदृच्छया पाकमियादित्यादि [1]कारणाप्रतिनियमेन कदाचित् पाकं याति कारणाप्रतिनियमश्च बाह्योऽभिप्रेतः आभ्यन्तरन्तु पाककारणं पित्तं रक्तञ्च नियतमेव। कदाचिदिति न सर्व्वकालं यदृच्छया चैव भवेत् कदाचिदिति पाठान्तरे पाक इति शेषः । श्लेष्मजे सवर्ण इति प्रकृतिसमवर्णः । मेदोजे देहानुरूपक्षयवृद्धियुक्त इति देहक्षये क्षयं देहवृद्धौ च वृद्धिं यातीत्यर्थः ।

---

(१) कारणा प्रतिनियमेनेति । कारणस्य बाह्यकारणस्य प्रवेपादेः अप्रतिनियमेन प्रतिनियमव्यतिरेकेन तथाच क्वचित् प्रक्षेपादि पाककारणासत्त्वेऽपि पाकस्य सम्भवः अतिशयभावादिति भावः। कारणा प्रतिनियम इत्यत्र कादाचित्कभावोद्भवत् प्रकाशते इति न्यायात् अप्रतिनियतकारणमिति बोध्यम् ।

भवेच्च तान्तो गलेनु शब्दं कुरुते च नित्यम् ॥३॥

कृच्छ्राच्छ्वसन्तं मृदु सर्व्वगात्रं सम्वत्सरातीतमरोचकार्त्तम् । क्षीणञ्च वैद्यो गलगण्डयुक्तं भिन्नस्वरञ्चापि विवर्ज्जयेच्च ॥४॥

कर्कन्धुकोलामलकप्रमाणैः कक्षां समन्या

गलेनुशब्दमिति अनुनादं करोति गले शब्दमिति पाठान्तरं सुगमम् ॥ ३ ॥

असाध्यतामाह ।

कृच्छ्राच्छ्वसन्तमित्यादि दुःखेन श्वासविमोचकारिणं भिन्नस्वरं स्वरभेदवन्तम् ॥ ४ ॥

स्थानतुल्यतया गण्डमालामिहैवाह ।

कर्कन्धुकोलामलकप्रमाणैरित्यादि । कर्कन्धुः शृगालकोलिः ह्रस्वबदरं मेदः कफाभ्यामिति मेदोदुष्टं कफोदोषोऽत्रारम्भकः मेदः कफौ च प्राधान्येनोक्तौ तेन वातपित्तसम्बन्धोऽपि द्रष्टव्यः यदाह भोजः ।

(१)वातपित्तकफाद्दुष्टा मेदश्चापि समाचितम् ।

---

(१) वातपित्तकफेत्यादि । प्रदुष्टाः वातपित्तकफाः समाचितं मेदश्चापि अङ्गुष्ठाः कण्डराः शिराः प्राप्य मन्याभ्यक्कवक्षणान् बहून् ग्रथितान् कुर्व्वन्ति तेभ्यः ग्रन्थिभ्यः पुनः प्रकुपितो वायुः कक्षामन्यागलाश्रित ऊर्द्धगोऽभिगः तान् दोषान् नानाप्रकारान् ग्रन्थिन् कुरुते सा तु अपचीमता प्रोक्ता ताम् अपचीं कण्ठमन्यां च कक्षा वङ्क्षणसन्धिं विजानीयात् गण्डमालाञ्च अपचीत्युच्यमानामिति ॥

गलवङ्क्षणेषु। मेदःकफाभ्यां चिरमन्दपाकैः स्याद्गण्डमाला बहुभिश्च गण्डैः ॥५॥

ते ग्रन्थयः केचिदवाप्तपाकाः स्रवन्ति नश्यन्ति भवन्ति चान्ये। कालानुबन्धं चिरमादधाति सैवापचीति प्रवदन्ति तज्ज्ञाः साध्याः

जङ्घयोः कण्डरां प्राप्य मत्स्याण्ड सदृशान् बहून्
कुर्व्वन्ति ग्रथितान् तेभ्यः पुनः प्रकुपितोऽनिलः।
तान् दोषानूर्द्ध्वगोवक्षः कक्षमन्यागलाश्रितः॥
नानाप्रकारान् कुरुते ग्रन्थीन सात्वपचीमता।
अपची कण्ठमन्यासु कक्षा वङ्क्षणसन्धिषु॥
गण्डमालां विजानीयादपचीतुल्य लक्षणामिति।

स्याद्गण्डमालेति मालातुल्यगण्डयोगाद्गण्डमाला गलमात्र एव गण्डमाला चरके पठिता यथा भेदः कफात् शोणितसंश्रयोत्थो गलस्य मध्ये गलगण्ड एकः। स्याद्गण्डमाला बहुभिश्च गण्डैरिति ॥ ५ ॥

गण्डमालातुल्यतया अपचीमाह।

ते ग्रन्थय इत्यादि। ते इति गण्डमालारम्भकदोषदूष्यतता ये ग्रन्थयः तएवेत्यर्थः। कालानुबन्धंचिरमिति चिरकालानुबन्धं सैवापचीति तादृशी गण्डमालारूपाऽपची भण्यते सैवापचीति इति नाभिहितत्वात् प्रवदन्तीति क्रियायोगेऽपि न द्वितीया अपची निबद्धिक्रियामपरापरोपमानतया अतएव अपप्रकर्षादपचीं वदन्तीति सुश्रुतः

स्मृताः ॥५॥ पीनसपार्श्वशूलकासज्वरच्छर्दि-युता त्वसाध्याः ॥६॥

वातादयो मांसमसृक् प्रदुष्टाः संदूष्य मेदश्च

अयप्रकर्षाद्यापरापरभवनेनैव साधुत्वञ्च नैरुक्तेन विधिना यदुक्तम्।

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तमिति॥

अतएवोक्तं नश्यन्ति भवन्ति चान्य इति साध्याः स्मृताः इति च्छेदः। पीनसादिभिरुपद्रवैरसाध्याः ॥ ६ ॥

अयन्तु ग्रन्थि चरके गण्डमालायामस्ति संग्रहकारेण
तु गण्डमालया सह तुल्यत्वादपच्या अपच्यामेव
ग्रन्थिः पठितः। अनन्तरमपची गुडक-
तुल्यतया ग्रन्थिमाह।

वातादय इत्यादि। वातपित्तकफाः प्रत्येकं दुष्टाः दुष्टि-श्चात्र वृद्धिरेव। न क्षयः क्षीणानां विकारकारणाक्षम-त्वात् यद्येवं तर्हि कथं वातादिक्षये मन्दचेष्टादयः उच्यते तत्क्षये विरोधि दोषकोपात् यथा मधुरस्निग्धादिभिर्वाते क्षीणे तत्समानत्वात् श्लेष्मा प्रकुप्यति वचनं हि वृद्धिश्चापि विरोधिनामिति। [1]संदूष्य मेदश्च मांसमसृक् शिराश्चेत्यनेन

---

(१) मेदश्च शिराश्चेत्यनेनेत्यादि। मेदश्च शिराश्चेत्यनेन कर्म-प्रदेन कफसम्बन्धात् यो मेदसो भवति तथा वायुना शिरा दुष्टा यो

तथा शिराश्च । वृत्तोन्नतं विग्रथितञ्च शोथं
कुर्वन्त्यतो ग्रन्थिरिति प्रदिष्टः ॥७॥

आयम्यते व्यथति तुद्यते च प्रत्यस्यतेमथ्य-
तिभिद्यते च । कृष्णो मृदुर्वस्तिरिवाततश्च
भिन्नः स्रवेच्चानिलजोऽस्रमच्छम् ॥८॥

मेदोजः कफसम्बन्धात् यो भवति तथा शिराजोऽपि वायुना शिरादुष्ट्यायो जन्यते स उच्यते । एवं पञ्चग्रन्थय इति संदूष्यमांसमसृगिति अत्रासृजः क्रमोल्लङ्घनेन पाठोऽप्राधान्य-प्रतिपादनार्थं विसर्पे तु शोणितमेव प्रधानम् । अतएव कश्चिच्चकारम् अप्राधान्यसूचकं निवेशोऽसृक् च इति पाठः । चरके तु ग्रन्थिर्वातकफज एव ग्रन्थिर्विसर्पशब्देनोक्तः । वृत्तोन्नतमिति वृत्तं वर्तुलम् उन्नतम् उच्छूनं विग्रथितं कठिनं कर्कटस्था विग्रथितत्वादेव ग्रन्थिरिति संज्ञा ॥७॥

अनिलग्रन्थिमाह ।

आयम्यत इत्यादि । आयम्यते आकृष्य दीर्घी क्रियते । व्यथतीति छिनत्तीव अत्र दिवादेराकृतिगणत्वात् प्रत्ययितपुरुषप्रणीता अन्येऽपि धातवस्तत्र द्रष्टव्याः तेन व्यथतीत्यस्य साध्यत्वम् । आत्मनेपदानित्यत्वाद्वा प्रत्यस्यते

शिराजोऽपि जन्यते स उच्यते चक्रो भवतीत्यर्थः । उच्छूनं स्फीतम् । कर्कटं कठिनम् । तद्दूषक दोषसहितवेति मांसमेदो दूषकदोष वर्जितयेत्यर्थः ।

दंदह्यते धुप्यति चूच्यते च पापच्यते प्रज्वलतीव चापि। रक्तः स पीतोऽप्यथवापि पित्ताद्भिन्नस्स्रवेदुष्णमतीव चास्रम् ॥९॥

शीतोऽविवर्णोऽल्परुजोऽतिकण्डूः पाषाणवत् संहननोपपन्नः। चिराभिवृद्धिश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनञ्च पूयम् ॥१०॥

शरीरवृद्धिः क्षयवृद्धिहानिः स्निग्धो महान्

क्षिप्यते मथ्यति आलोड़यतीव यथापि पुर्व्ववत् समाध्मानं भिद्यते विदीर्य्यत इव यस्य स्रावम् । ८ ॥

पित्तग्रन्थौ दंदह्यते अत्यर्थं दह्यते अग्निनेव। पापच्यते भृशं पच्यत इव क्षारेण किम्वा उत्काथ्यत इति प्रज्वलतीव ज्वलन् भस्मी भवतीव ॥ ९ ॥

कफग्रन्थौ अविवर्णः प्रकृतिवर्णो ईषद्विवर्णो इति कश्चित् पाषाणवत् संहननोपपन्न इति पाषाणवत् कठिन इत्यर्थः। किम्वा पाषाणवत् भवति हननोपपन्न इति संहतान्वितो महानित्यर्थः ॥ १० ॥

शरीरवृद्धिः क्षयवृद्धिहानिरिति मेदोजे शरीरवृद्धिक्षयाभ्यां यथाक्रमं वृद्धिहानी यस्य स तथा। मेदोजेष्वेवं वृत्तिः धातुस्वभावात् चिरस्थायित्वाद्वा गच्छति चात्र भिन्ने पिण्याकसर्पिःप्रतिमन्तु मेद इति भिन्ने सति पिण्याकतिलकल्कः सर्पिरवस्त्यानं तत्सदृशं मेदः स्रवति भोजे तु मेदो ग्रन्थेः संप्राप्ति पठ्यते यथा।

कण्डूयुतो ऽरुजश्च । मेदःक्षतो गच्छति चात्र भिन्ने पिण्याकसर्पिःप्रतिमन्तु मेदः ॥११॥

व्यायामजातैरबलस्य तैस्तैराक्षिप्य वायुस्तु सिराप्रतानम् । संकुच्य संपीड्य विशोष्य चापि ग्रन्थिं करोत्युन्नतमाशु वृत्तम् ॥१॥

ग्रन्थिः सिराजः स तु कृच्छ्रसाध्यो भवेद्-यदि स्यात्सरुजश्चलश्च ॥२॥

सचारुजश्चाप्यचलो महांश्च मर्मोत्थितश्चापि विवर्ज्जनीयः ॥१२॥

मेदो वायुर्यदा मांसे निक्षिपेदथवा त्वचि ।
तत्र मेदोभवग्रन्थिः स्यावो भवति पाण्डरः ॥
कृशः कृशे महान् स्थूले ग्रन्थि र्भिन्नश्च पीड़ितः ।
तिलकल्कनिभस्रावो घृतमज्जास्य जायते इति ॥११।

सिराजग्रन्थेः संप्राप्तिमाह ।

व्यायामजातैरित्यादि । संकुच्येति अन्तर्भावितोण्यर्थ-त्वेन संकोच्येत्यर्थः । न पिण्डयतीति संहतीकृत्य उन्नतमाशु-वृत्तमिति अस्य सामान्यलक्षणेनैव सिद्धेः पुनस्तदुक्तिरति-शयार्थं सच सिराजोग्रन्थि र्यदि सरुजश्चलश्च स्यात्तदा कृच्छ्रसाध्यः । स चारुजश्चापीत्यादिना न साध्यः भव इति चरकेणारुजत्वादिना मर्म्मयोगादपरेऽपि ग्रन्थयो-ऽसाध्या इति सूचयति । यदुक्तं भोजे ।

मर्म्मैतानरुजो ग्रन्थीन् मर्म्मजानचलांस्त्यजेत् ।

गात्रप्रदेशे क्वचिदेव दोषाः संमूर्च्छिता मांसमसृक् प्रदूष्य। वृत्तं स्थिरं मन्दरुजं महान्तमनल्पमूलं चिरवृद्ध्यपाकम्॥ कुर्वन्ति मांसोच्छ्रयमत्यगाधं तदर्बुदं शास्त्रविदो वदन्ति॥१३॥

वातेन पित्तेन कफेन चापि रक्तेन मांसेन च मेदसा वा। तज्जायते तस्य च लक्षणानि ग्रन्थेः समानानि तदा भवन्ति॥१४॥

कपोलगलमन्यासु दृश्चिकित्स्याश्च सन्धिष्विति॥

अन्ये तु मांसासृग्भ्यां षष्ठं ग्रन्थिं वदन्ति एवं पठन्ति मांसासृजश्चार्बुदलक्षणेन तुल्यं हि दृष्टं च लक्षणेश्चेति। किन्त्वनार्षोऽयं पाठो भोजादिसमानतन्त्रेऽदृष्टत्वात्॥१२॥

मांसशोणितदूष्य साम्यादर्बुदाभिधानं तस्य संप्राप्तिमाह।

गात्रप्रदेशे क्वचिदित्यादि। क्वचिद्देशेत्यनेनानियतदेशेन पुनरपचीवन्नियतदेशे। संमूर्च्छिता इति पाठान्तरे संमूर्च्छिता दृढ़ा दूष्यसंसृष्टा इति कार्त्तिकः। मांसमसृक् प्रदूष्येति सर्वार्बुदसाधारणं दूष्यं मांसार्बुदमेदोर्बुदयोस्तु विशेषेण मांसदुष्टिः मांसार्बुदमेदार्बुदयोरपि तद्दूषकोदोषोऽस्ति। तेन तत्रापि दोषकर्त्तृतया संप्राप्तिरियं भवति मांसोच्छ्रयमिति मांसोच्छ्रयतया प्रतीयमानम्। मेदोजेऽपि मांससमुन्नतत्वमवति अत्यगाधमिति दूरानुप्रविष्टम् अतएवाल्पमूलमित्युक्तम्॥१३॥

वातादिभिरर्बुदं जायते तेन षडर्बुदानि भवन्ति

(*)दोषः प्रदुष्टो रुधिरं शिरास्तु संकुच्य संपीड्य ततस्त्वपाकम्। सास्रावमुन्नह्यति मांसपिण्डं मांसाङ्कुरैराचितमाशुवृद्धिम्। करोत्यजस्रं रुधिरप्रवृत्तिमसाध्यमेतद्रुधिरात्मकन्तु॥ रक्तक्षयोपद्रवपीडितत्वात् पाण्डुर्भवेदर्बुदपीडितस्तु ॥१५॥

अन्यैः समानानीति वातपित्तकफमेदोजग्रन्थिभिः वातपित्तकफमेदोऽर्बुदानां लक्षणानि समानानि शोणितमांसजयोस्तु लक्षणं पृथक् वक्ष्यति ॥ १४ ॥

रक्तार्बुदमाह ।

दोषः प्रदुष्ट इत्यादि । संकुच्येति अन्तर्भावितोऽत्रान्यर्थः । अपाकमीषत्पाकं तेन सास्रावमित्युपपन्नं भवति दोष उन्नह्यति उच्छ्रितो भवति सास्रावमीषत्स्रावं मांसपिण्डमाशुवृद्धिं शीघ्रवर्द्धनं मांसांकुरैराचितं करोति तथाजस्रं रुधिरप्रवृत्तिमपि करोति रुधिरस्यात्राधिष्ठानपूर्व्वीभूत-

---

(*) दोषः प्रदुष्ट इत्यादि मूलम् । प्रदुष्टो दोषो रुधिरं शिरास्तु संकुच्य सम्पीड्य तथार्द्धपिण्डप्रसंहृतं कृत्वा उन्नह्यति उच्छ्रितो भवति ततस्तु अपाकम् ईषत्पाकं सास्रावमीषत्स्रावि यत् उन्नतं मांसपिण्डं तत् आशुवृद्धिं शीघ्रवर्द्धनं मांसांकुरैराचितञ्च करोति तथाऽजस्रं रुधिरप्रवृत्तिमपि करोति । अथवा प्रदुष्टो दोषः मांसपिण्डम् उन्नह्यति उन्नाहयति उन्नतं करोति ततः अपाकं सास्रावं तं मांसपिण्डम् आशुवृद्ध्यादिकं करोति ॥

मुष्टिप्रहारादिभिरर्दितेऽङ्गे मांसं प्रदुष्टं जनयेद्धि शोथम्। अवेदनं स्निग्धमनन्यवर्णम- पाकमश्मोपममप्रचाल्यम्॥ प्रदुष्टमांसस्य नरस्य गाढमेतद्भवेन्मांसपरायणस्य। मांसार्बुदन्त्वे तदसाध्यमुक्तं साध्येष्वपीमानि तु वर्जयेच्च ॥१६॥

शिरागतं प्रवर्त्तते न तु पाकात्। ईषद्देव स्रावस्य क्लेदरूपस्योक्तत्वात् किम्वा उक्तस्यातोऽत्यन्तर्भावितोऽन्यर्थः। तेन मांसपिण्डमुन्नाहयति उन्नतं करोति। दोषाः प्रदुष्टा इति वा पाठः पक्षे स्रावमुन्नह्यतीति पाठः उन्नह्य उन्नाह्य अन्तर्भावितोऽन्यर्थत्वात् हि पादपूरणे ॥ १५ ॥

मांसजन्य सम्प्राप्तिमाह।

मुष्टिप्रहारादिभिरित्यादि। अश्मोपमं पाषाणवत् कठिनम् अप्रचाल्यं स्थिरं यद्यपि रक्तमांसार्बुदेऽप्यति रक्तमांसयो र्हेतुत्वेनोक्ति स्तथापि रक्तजे पित्तं मांसजे वायुरारम्भकः [५]एवमपि ताभ्यां घृतदुग्धन्यायेन व्यपदेशः मांसपरायणस्य मांसाशनशीलस्य तस्य चातिमात्रं मांस- वृद्धिः मांसं मांसेन वर्द्धत इत्यभिधानात् ॥ १६ ॥

(५) एवमपि ताभ्यां घृततैलेत्यादि। ताभ्यां रक्तमांसाभ्यां व्यप- देशः रक्तार्बुदं मांसार्बुदमिति नामाभिधानं तथा च यथा घृततैल- दुग्धेषु पार्थिवत्वेऽपि जलीय महद् स्नेहमादाय तत्र स्निग्धत्व व्यपदेश- स्तथात्रापि रक्तज मांसजयोः पित्तवाय्वारम्भकत्वेऽपि रक्तार्बुद मांसा- र्बुदेति व्यपदेशः।

सम्प्रस्रुतं मर्म्मणि यच्च यातं स्रोतःसु वा यच्च भवेदचाल्यम्। (१)यज्जायतेऽन्यत् खलु पूर्व्वजाते ज्ञेयं तदध्यर्व्वुदमर्व्वुदज्ञैः॥ यद्द्वन्द्वजातं युगपत्क्रमाद्वा द्विरर्व्वुदं तच्च भवेदसाध्यम्॥१७॥

न पाकमायान्ति कफाधिकत्वात् मेदो बहु-

साध्येष्वसाध्यप्रकारानाह।

संप्रस्रुतमित्यादि। संप्रस्रुतं स्रावयुक्तं अवचालापाकित्वेऽपि त्वगवदरणात् मनागवगन्तव्यः स्रोतःसु नाड्यादिषु अचाल्यं स्थिरं यज्जायत इत्यादिनार्व्वुदम् अधिजमर्व्वुदम् अध्यर्व्वुदम् एतद्द्विरर्व्वुदमेव यद्द्वन्द्वजातं युगपत् क्रमाद्वेति द्वन्द्वजातं युगलेन जातं युगपदेव क्रमेण जातद्विरर्व्वुदं न साध्यम्। तथाच भोजः।

अर्व्वुदेऽर्व्वुदं जातं द्वन्द्वजञ्चानुजञ्च यद्द्विरर्व्वुदमिति ज्ञेयं तच्चासाध्यं विनिर्द्दिशेदिति॥ १७॥

अर्व्वुदानां पाकाभावे हेतुमाह।

न पाकमायान्तीत्यादि। सर्व्वार्व्वुदानि पित्तरक्तजान्यपि न पाकमायान्ति कुत इत्यत आह कफाधिकत्वात्

(१)यज्जायतेऽन्यत् खलु पूर्व्वजात इत्यादि मूलम्। पूर्व्वजातेऽर्व्वुदेऽन्यत् यदर्व्वुदं जायते भवति तदध्यर्व्वुदं तत्राधारार्व्वुदाधिकरणकार्व्वुदम् अध्यर्व्वुदम् अधिकार्व्वुदमिति यावत्। यदर्व्वुदं युगपत् एकदा अथवा क्रमेण द्वन्द्वजातं युगलेन जातं तत् द्विरर्व्वुदमित्युच्यते इति॥

त्वाच्च विशेषतस्तु। दोषस्थिरत्वात् ग्रथनाच्च तेषां सर्व्वार्वुदान्येव निसर्गतस्तु ॥१८॥

[1]अथ श्लीपदनिदानम्।

यः सज्वरोवङ्क्षणजो भृशार्त्तिः शोथो नृणां

मेदो बहुत्वाच्च। मन्यपन्यामपि विशेषतः कफमेदसी अधिके ग्रथच तस्याः पाकोऽस्त्येव इत्यत आह। दोषस्थिरत्वादिति कालान्तरेण हि रक्तपित्तमधिकं पाकमारभते तत्रैव दोषस्थिरत्वात् सदा सदृश दोषत्वात् ग्रथितत्वाच्च पाकाभावः। अन्ये तु दोषस्थिरत्वादिति दोषोत्कटाय शोथकाठिन्यादित्याहुः तदप्रयोजनकम् अन्यत्र दोषोत्कटाय शोथकाठिन्येऽपि पाकदर्शनात् अथ कुतो यथोक्तहेतुसम्पदित्याह निसर्गतस्त्विति निसर्गतो व्याधिस्वभावात् भोजेऽप्युक्तम्।

न पच्यंत स्थिरत्वाच्च ग्रथितत्वात् स्वभावत इति ॥१८॥

इति व्याख्यामधुकोषे श्रीकण्ठदत्तविरचित गलगण्ड गण्डमालापचीग्रन्थ्यर्वुदनिदानम्।

इति व्याख्यामधुकोषपञ्जिकायां गलगण्डगण्डमालापचीग्रन्थ्यर्वुदनिदानम्॥

(१) सुगमत्वात् श्लीपदनिदानमुपेक्षितम्।

पादगतः क्रमेण। तच्छ्लीपदं स्यात् करकर्णनेत्र
शिश्नोष्ठनासास्वपि केचिदाहुः ॥१॥
वातजं कृष्णरूक्षञ्च स्फुटितं तीव्रवेदनम्।
अनिमित्तरुजं तस्य बहुशो ज्वर एव च ॥१॥
पित्तजं पीतसङ्काशं दाहज्वरयुतं मृदुः।
श्लैष्मिकं स्निग्धवर्णञ्च श्वेतं पाण्डु गुरुस्थिरम्॥
वल्मीकमिव संजातं कण्टकैरुपचीयते।
अब्दात्मकं महत्तच्च वर्जनीयं विशेषतः ॥२॥

सक्लेदसाधर्म्यात् अर्बुदेन सह कफसम्बन्धाव्यभिचार-
साम्याच्च श्लीपदनिदानं तस्य संप्राप्तिमाह।

यः सज्वर इत्यादि। वङ्क्षणावस्थानमेवास्य पूर्व्वरूपं
क्रमेणेति शनैः शनैः। स तु श्लीपदं स्यादित्यनेन निरुपाधि-
रेवेयं संज्ञेति दर्शयति अन्ये शिलावत् पदं श्लीपदमिति
वदन्ति नैवक्रमेण त्व निधिना साधुत्वं करकर्णादिगत श्लीप-
दानां यथोक्तसंप्राप्त्यभावात् केचिदाहुरिति परम
तेनोक्तिः॥ १॥

एषामसाध्यतामाह।

वल्मीकमिव सञ्जातं कण्टकैरुपचीयते इति सञ्जातं
महद् सत्वल्मीकवद्बहुशिखराकारं ग्रन्थिभिरुपचितं
यद्भवति तदसाध्यम्। अन्ये तु पुनरमुं ग्रन्थिं कफजलपाण-
त्वेन वर्णयन्ति तन्न मनोभिमोति सुश्रुते वल्मीकवज्जात-

त्रीण्यप्येतानि जानीयात् श्लीपदानि कफोच्छ्रयात्।
गुरुत्वञ्च महत्त्वञ्च यस्मान्नास्ति कफं विना॥३॥
पुराणोदकभूयिष्ठाः सर्व्वर्त्तुषु च शीतलाः।
येदेशास्तेषु जायन्ते श्लीपदानि विशेषतः॥४॥

स्याभाव्यत्वेनाभिधानात् तद्यथा तत्र सम्बत्सरातीतमति-महद्वल्मीकमिव सञ्जातं संप्रस्नुतमिति वर्ज्जनीयानि भवन्ति। अब्दात्मकं इत्यादि अब्दात्मकं सम्वत्सरातीतम् अब्दमेकमिति पाठे तु अधिकाब्दमिति शेषः। कच्छ्रदिति अत्युन्नतमुच्छूनं वर्ज्जनीयं विशेषत इति प्रत्याख्येयम्॥२॥

श्लीपदेषु कफस्याव्यभिचारेण प्राधान्यमाह।

त्रीण्यप्येतानीति। ननु यद्यव्यभिचारी सर्व्वत्र कफः कथन्तर्हि एकदोषस्य व्यपदेशः। सर्व्वस्य द्विदोषजत्व-प्रसङ्गात् उच्यते। अनुबन्धोऽत्र कफः नत्वनुबन्ध्य एतस्मात् न द्विदोषजप्रसङ्ग इत्यभिप्रायः॥३॥

श्लीपदसम्भवहेतुन्दर्शयितुमाह।

पुराणोदक इत्यादि। आनुपदेशे हि सलिलं पतितं बहूदकं निम्नतया न शोषमुपयाति जाङ्गले तु आग्नेयो-न्नतभूभागत्वात् न पुराणोदकभूयिष्ठतास्तिमितस्यानुपस्य मन्दातपत्वेनोष्णर्त्तावपि शीततेति अत उक्तं सर्व्वर्त्तुषु च शीतला इति। करकर्णादिगत श्लीपदसन्देहे कोप-द्वारेण ज्वरेण श्लीपदावधारणं करणीयम्॥४॥

साध्यायमनुगतसर्वलिङ्गं सकण्डूरं श्लेष्मयुतं विवर्जयेत् ॥५॥

अथ विद्रधिनिदानम् ।

त्वग्रक्तमांसमेदांसि संदूष्यास्थिसमाश्रिताः ।
दोषाः शोथं शनैर्घोरं जनयन्त्युच्छ्रितं भृशम् ॥
महामूलं रुजावन्तं वृत्तं वाप्यथवायतम् ।
स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः ॥

साध्यावमित्याद्युपरमसाध्यलक्षणम् अनुगतसर्वलिङ्गमिति येन दोषेणारब्धं श्लीपदं तस्यानुगतानि अतिदृष्टानि सर्वाणि लिङ्गानि यत्र तत्तथा स कण्डूरमिति अत्यन्तकण्डूमत् श्लेष्मयुतमिति श्लेष्मानुगम् ॥ ५ ॥

इति वैद्यमहामहोपाध्याय श्रीकण्ठदत्तविरचिते मधुकोषे श्लीपदनिदानम् ।

शोथस्य सामान्याद्विद्रधिनिदानम् ।

तस्य संप्राप्तिमाह ।

त्वग्रक्तमांसमेदांसीत्यादि । घोरमित्यन्येभ्योऽपि शोथसकाशादनेभ्यो ग्रन्थ्यादिभ्य आशुकारित्वाद्दारुणं उच्छ्रिता भृशमिति अत्यर्थं उन्नताः । अस्थिसमाश्रिता इत्यनेन स्थानसंश्रयोऽभिहितः उच्छ्रिता भृशमित्यनेन प्रकोप आविष्कृतः एतेनैव नान्तरीयकतयाचय प्रसरावस्थाभिहितौ

पृथग्दोषैः समस्तैश्च क्षतेनाप्यसृजा तथा ।
षण्णामपि हि तेषान्तु लक्षणं संप्रवक्ष्यते ॥१॥
कृष्णोऽरुणो वा विषमो भृशमत्यर्थं वेदनः ।
चित्रोत्थानप्रपाकश्च विद्रधिर्वातसम्भवः ॥१॥

मधुकोषः मज्जामूलमस्थ्यादिसमाश्रयत्वाद्वस्थीरकूलम् । कथावदतामिति उत्पन्नावेव कृत्वा प्रकर्षवन्तम् अतिशाय-नेयन्तु: वृत्तमिति वर्तुलं वृत्तायतत्वाभ्यां मध्यरादि विल-क्षणता आयतं दीर्घं विद्रधिरिति ख्यात इति ग्रन्थेन [1]निरुपाधिसङ्केतमात्राद्विद्रधिसंज्ञेति दर्शयति चरके तु विदाह प्रकर्षाद्विद्रधिसंज्ञा यदुक्तम् ।

स वै शीघ्रविदाहित्वाद्विद्रधीत्यभिधीयते इति ।

वातिके विषमो भृशमिति कदाचिदल्पः कदाचि-न्महान् चित्रोत्थानप्रपाक इति चित्रौ नानाविधौ वायो-र्विषमक्रियत्वात् उत्थानप्रपाकौ यस्य स तथा । पैत्तिके ज्वरदाहादुत्थानकाल एव । पाककाले तु प्रकर्षवन्तौ भवत इति शेषः । कफजे शरावसदृश इति प्रभूतत्वसूच-नपरम् ॥ १ ॥

---

(१) निरुपाधि सङ्केतमात्राद् विद्रधिसंज्ञेति । उपाधि भेदको धर्मस्तद्रहितो यो वा सङ्केतः शब्दादर्थधर्मो बोद्धव्य इत्याकारक सङ्केतमात्राद् विद्रधीति संज्ञा तथा च विदाहोपाधिमन्तरेण इच्छा बोद्धव्या चरकमते तु भेदक विदाहधर्मसम्बन्धात् सोपा-धीति भावः । मतं कात्स्न्येनभारत रत्नाकरः ।

पक्वोडुम्बरसङ्काशः श्यावो वा ज्वरदाहवान्।
क्षिप्रोत्थानप्रपाकश्च विद्रधिः पित्तसम्भवः ॥१॥
शरावसदृशः पाण्डुः शीतः स्निग्धोऽल्पवेदनः।
चिरोत्थानप्रपाकश्च सकण्डुश्च कफोत्थितः ॥१॥
तनुपीतसिताश्चैषामास्रावाः क्रमशः स्मृताः॥२॥
नानावर्णरुजास्रावो घाटालो विषमो महान्।
विषमं पच्यते चापि विद्रधिः सान्निपातिकः ॥३॥

पाकानन्तरं भूता स्रावलिङ्गमाह।

तनु पीतसिताश्चैषामित्यादि। क्रमशः इति यथाक्रमं तेन वातेन तनुः पित्तेन पीतः कफेन सितः तनुश्यावो वातानुरूपो वर्णो ज्ञेयः ॥ २ ॥

सन्निपातजे नानावर्ण रुजास्राव इति नानाशब्दः प्रत्येकमभिसम्बध्यते नाना बहुविधा वर्णाः कृष्णपीतशुक्ल-वर्णाः तोददाहकण्ड्वादिका रुजाः तनुपीतशीताः स्रावा यस्य स तथा। अन्यत्र शोथे पाककाले नानारुजा अत्र तु सर्वदा। घाटाल इति घाटायस्यास्ति स घाटालः इति मत्वर्थीयो लच् अश्रस्तुस्तम्भवत् महान् अत्युच्छ्रितायतत्वेन घाटाल इव विषमोऽसाध्यत्वात् विषमं पच्यत इति चिराक्षिप्र गम्भीरोत्तानोच्छूनादिभेदेन विषमं यथा भवति तथा पच्यत इति विषमम् अयमं नतु विषमपाकित्वं वातिके विद्रधावुक्तं यथानुपक्रान्तो च शोथे यथा योऽभ्युत्थितोऽल्पो यदि

तैस्तैर्भावैरभिहते क्षते वापथ्यकारिणः।
क्षतोष्मा वायुविक्षिप्तः सरक्तं पित्तमीरयेत्॥
ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः।
आगन्तुर्विद्रधिर्ह्येष पित्तविद्रधिलक्षणः॥४॥

वा महान् स्यात् क्रियां विना पाकमुपैति शोथः विशाल-मूलो विषमो विदग्धः स कृच्छ्रतां यात्यवगाढदोष इति। अतः संशये कथं मिथोभेद प्रतीति उच्यते अप्रतीकारेणैव विषमपाकित्वं प्रतीकारेणैव भेदितम्। इह पुनः प्रतीकारेऽपि वैषम्यं यातीति तु पाकमात्र वैषम्यं न तु गाम्भीर्या-दिना अतएव वाह्य साध्यः॥३॥

अभिघातजस्यागन्तोः संप्राप्तिमाह।

तैस्तैरित्यादि। तैस्तैरिति काष्ठलोष्ट्रपाषाणादिभिः अभिहत इति अक्षतरक्तस्य भवितपिच्चितादेरुपलक्षणं क्षत इति क्षतरक्तस्य छिन्नभिन्नादेः द्वयोरभिहतक्षतयो-रपथ्यकारिण इति विशेषणं क्षतोष्मेति क्षतस्य हिंसा-मात्रपरिग्रहात् अनभिहतयोरप्युष्मा क्षतोष्मशब्देनोच्यते वायुविक्षिप्त इति क्षते रक्तक्षयात् अभिहते अभिघाता-देव वातकोपः कुपितेन वातेन विक्षिप्तः प्रक्षिप्तो वायुवि-क्षिप्तः यद्यप्ययं वातपित्तरक्तज स्तथापि प्रागभिघातसम्भव-त्वेनागन्तुकीर्तितपित्तरक्तानां जनकत्वेनैव विलक्षणास्य संप्राप्तिः पित्तविद्रधिलक्षण इति यथोक्तज्वरादिव्यक्ति-लिङ्गसंस्थानवर्णवेदनादि पित्तविद्रधिवदुक्त इत्यर्थः॥४॥

कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाज्वरः।
पित्तविद्रधिलिङ्गस्तु रक्तविद्रधिरुच्यते ॥५॥
पृथक् सम्भूय वा दोषाः कुपिता गुल्मरूपिणम्।
वल्मीकवत्समुन्नद्धमन्तः कुर्वन्ति विद्रधिम् ॥
गुदे बस्तिमुखे नाभ्यां कुक्षौ वङ्क्षणयोस्तथा।
वृक्कयोः प्लीह्नि यकृति हृदि वा क्लोम्नि चाप्यथ ॥
तेषामुक्तानि लिङ्गानि बाह्यविद्रधिलक्षणैः ॥६॥
अधिष्ठानविशेषेण लिङ्गं शृणु विशेषतः।
गुदे वातनिरोधश्च बस्तौ कृच्छ्राल्पमूत्रता ॥

रक्तजे पित्तविद्रधिलिङ्गातिदेशेन लब्धावपि दाहज्वरौ तीव्रत्वविशेषार्थमुक्तौ। श्याव इति पित्तविद्रधिलिङ्गातिदेशे प्राप्तस्य पीतोद्भवस्य श्यावशब्दापवादः। केचन आगन्तुजं धातुरक्तजं विद्रधिं परित्यज्य क्षतसंभवमागन्तुजं रक्तजं पठन्ति। तेषां मतेनागन्तुजेन सह षड्विद्रधयः; सुश्रुते तु धातुरक्तजोऽपि तथागन्तुसम्भवोऽपि विद्रधिः सामान्येन रक्तजः षड्विद्रधय इति बोद्धव्यम् ॥५॥

अधिष्ठानविशेषेण लिङ्गविशेषं साध्यतामसाध्यतां च
प्रतिपादयितुमाभ्यन्तरविद्रधीनाह।

पृथक् सम्भूय वा इत्यादि पृथगभिधानविधानार्थमुक्तापि संप्राप्तिर्विद्रधेः पुनरुच्यते। अभ्यन्तरस्य रक्तजस्य तथा-न्योऽव विद्रधेर्दर्शयितुमपदेशादि यत्नेन तत्रापि संप्राप्ति

नाभ्यां हिक्का तथाटोपः कुक्षौ मारुतकोपनम् ।
कटीपृष्ठग्रहस्तीव्रो वङ्क्षणोत्थे तु विद्रधौ ॥
वृक्कयोः पार्श्वसङ्कोचः प्लीह्न्युच्छ्वासावरोधनम् ।
सर्वाङ्गप्रग्रहस्तीव्रो हृदि कासश्च जायते ॥
श्वासो यकृति हिक्का च क्लोम्नि पेपीयते पयः॥६॥
(१)नाभेरुपरिजाः पक्वा यान्त्यूर्ध्वमितरे त्वधः ।
अधःस्रुतेषु जीवेत्तु स्रुतेषूर्ध्वं न जीवति ॥७॥

ऊर्ध्वेति कश्चित् बाह्यागन्तुवत् आभ्यन्तराणन्तु संप्राप्तिरित्यर्थः अतश्चाभ्यन्तराभावान्निर्दिष्टः अतश्च इति तु जेज्जटः । गुल्मरूपिणमिति गुल्मवत् संहतम् एतदाभ्यन्तरविद्रधीनां सामान्यरूपं विशेषमन्तु विद्रधिलक्षणैरेव ज्ञेयं वल्मीकवदिति वल्मीक उर्ध्वीभूय संहत् समुन्नतं एतदपि पच्यमानावस्थायां सर्वेषां समानं बहिर्मुख इति बहिर्मुख एव विद्रध्याधारभूतमांसादिसम्भवात् न वक्षौ तत्र आटोपो रुजापूर्व्वक क्षोभः मारुतकोपनमिति मार्गावरोधाद्वायोः कोपः वृक्कयोरिति वृक्कसञ्ज्ञमांसं सर्वाङ्गप्रग्रहः प्रत्यङ्गव्यथा सर्व्वशिराधिष्ठानत्वात् हृदयस्य क्लोम्नीति वृक्कादूर्ध्वं पिपासास्थानं क्लोम्नि पेपीयते पय इति पुनःपुनर्जलं पातुमिच्छतीत्यर्थः ॥ ६ ॥

स्रावनिर्गममार्गमाह ।

नाभेरुपरिजा इत्यादि उपरिजा वृक्कप्लीहादिजायास्तु

---

(१) नाभेरुपरिजा इत्यादि मूलम् । तत्रायं सङ्क्षेपः नाभेरुप-

विद्रधिर्नाभिसञ्जातः ऊर्ध्वमधोऽपि च ।
हृन्नाभिवस्तिवर्ज्या ये तेषु भिन्नेषु बाह्यतः ।
जीवेत्कदाचित् पुरुषो नेतरेषु कदाचन ॥१॥
साध्या विद्रधयः पञ्च विवर्ज्यः सान्निपातिकः ॥२॥
आमपक्वविदग्धत्वं तेषां शोथवदादिशेत् ।
आध्मातं बद्धनिष्यन्दं छर्दिहिक्कातृषान्वितम् ॥
रुजाश्वाससमायुक्तं विद्रधिर्नाशयेन्नरम् ॥७॥

त नाभिजः उभयमार्गस्रावी ऊर्ध्वाधः स्रावश्च तथा [illegible]नित्वाद्दातस्य यदाह हारीतः ।

ऊर्ध्वं प्रभिन्नेषु मुखान्तराणां प्रवर्त्तते ऽसृक् सहितोऽपि पूयः । अधः प्रभिन्नेषु च पायुमार्गात् द्वाभ्यां प्रवृत्तिस्त्विह नाभिजेषु इति ॥

इतर इति नाभिवस्ति वङ्क्षणजाः अधः स्रुतिस्थिति स्वयमेव यदा नाभ्यादिजा भिन्ना अधः स्रवन्ति तदा

[illegible] विद्रधय ऊर्ध्वं स्रवन्ति इतरे नाभिवस्ति वङ्क्षणजा अधः स्रवन्ति नाभिजस्तु ऊर्ध्वाधः उभयमार्गं स्रावीति एतेषां [illegible] निर्गममार्गं [illegible] यदा नाभ्यादिजाः स्वयमेव भिन्नाः अधः स्रवन्ति तदा [illegible] यदा [illegible] ऊर्ध्वं स्रवन्ति तदा [illegible] न [illegible] तत्र [illegible] विद्रधयः [illegible] कदाचिज्जीवनम् इतरेषु [illegible] भिन्नेषु [illegible] न जीवनम् ॥

इति व्याख्यामधुकोषपञ्जिकायां विद्रधिनिदानम् ।

जीयति चुतेपूहं न [illegible] यस्त्रा मध्यन्नि-र्भमात्मजीयमं छर [illegible] ति सोतलोमाद्दिया भिन्नेपु मान्नात इति [illegible] भिन्नेपु चन्ये मन्चा-न्नाश्रयजे [illegible] इति व्याचचते चन्तर्भिन्ने-ष्वप [illegible] कः नेतरेष्विति छन्नाभिचक्षि-ते [illegible] श्रित्वात् बाह्याभ्यन्तरा वा, वक्ष्यौः [illegible] वपाकै वा तथाच भोजः।

[illegible] र्भ्रमी ज्ञेयः पक्कोऽपक्कश्च विद्रधिः।
[illegible] तोत्थितोऽप्येवं मक्क एव तु वर्त्तितः॥
[illegible] कृता नाभेरश्चौ यश्च साध्यो [illegible]।
चापक्कश्चैव पक्कश्च साध्यो नोपरि नाभिजः इति॥

अत्र मर्म्मशब्देन हृदयमभिगाबुध्यते बहुनिष्यन्द-मिति महम्मत्तं एतद्धक्तिले प्रायः॥ ७॥

इति व्याख्यामधुकोषे विद्रधिनिदानम्।

कलिकाता।
निमतलाघाट ष्ट्रीट ८ संख्यक भवने
श्रीयुक्त बाबु भुवनचन्द्र बसाकद्वारा संवाद
ज्ञानरत्नाकरयन्त्रे मुद्रित।
१८०१।